# चतुर्वेदि-संस्कृतरचनावली

**( म० म० श्री गिरिधरशर्मा चतुर्वेदी विरचित निबन्ध-संग्रह )**

प्रस्तुत पुस्तक में २३ निबन्ध हैं जो ५ खण्डों में विभाजित हैं—
१. वेद-खण्ड, २. पुराण-खण्ड, ३. शब्दशास्त्र-खण्ड, ४. धर्मशास्त्र-खण्ड तथा ५. काव्य-साहित्य-खण्ड। वेदखण्ड में—'( १. ) ऋतं च सत्यं च' ( २ ) 'वेदेषु विज्ञानं तस्य क्रमिको ह्रासश्च' एवं ( ३ ) 'वेदेषु पितरः' ये तीन मुख्य प्रतिपाद्य निबन्ध हैं। इन निबन्धों में प्राच्य-पाश्चात्य उभय मतों का प्रतिपादन किया गया है। द्वितीय-खण्ड में—( १ ) 'पुराणेषु विकासवादः' ( २ ) कूर्म-पुराणविषयालोचनम्' ( ३ ) 'मुद्गलपुराणविषयालोचनम्' ( ४ ) वेदेषु पुराण-महत्त्वम्' तथा ( ५ ) 'पुराण-लक्षणानि' ये पाँच निबन्ध हैं। तृतीय खण्ड में—'पुरातनानि व्याकरणानि वैयाकरणाश्च' इस प्रधान सन्दर्भ के अन्तर्गत ७ निबन्ध हैं—( १ ) प्रचलित शाकटायन-व्याकरणविचारः, ( २ ) पाणिनेः पूर्वमपि व्याकरणसत्तासाधनम्, ( ३ ) प्रातिशाख्यानां पाणिनेश्च पौर्वापर्य-विचारः' ( ४ ) निरुक्तकृतः पौर्वापर्यम्, ( ५ ) पाणिनिदेशकालौ, ( ६ ) कात्या-यनदेशकालौ, तथा ( ७ ) पतञ्जलेर्देशकालौ। तृतीय खण्ड में—( १ ) 'चातुर्वर्ण्यम्' ( २ ) 'प्रमीतपतिकाधर्मालोचनम्' ( ३ ) 'स्पर्शादौ शास्त्रीया व्यवस्था' तथा ( ४ ) 'पितृविवेकः' नामक निबन्ध हैं। मूल्य २०–००

# प्रबन्धरत्नाकरः

( शास्त्री, आचार्य, बी० ए०, एम० ए० आदि परीक्षोपयोगी शताधिक निबन्धों का अभूतपूर्व संग्रह। ) मूल्य १६–५०

लेखक—**डॉ० उमेशचन्द्र शुक्ल**

प्राध्यापक : संस्कृत विभाग, बारहसैनी कालेज, अलीगढ़

**शुभाशंसक-**

Library IIAS, Shimla
S 891. 202 4 C 392 N
00045942

**( १ ) डॉ० सुरेन्द्रना**

उपकुलपति : वाराणसेय संस्कृत वि

**( २ ) पं० ब्रह्मानन्द शु**

प्रधानाचार्य : श्री राधाकृष्ण संस्कृत

**( ३ ) डॉ० रामसुरेश त्रिपाठी**

अध्यक्ष : संस्कृत विभाग, अलीगढ़ विश्वविद्यालय, अलीगढ़

---

प्राप्तिस्थानम्—चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला
२७२

॥ श्रीः ॥

# निबन्धादर्शः

सम्पादकः
महामहोपाध्यायः
पं० गिरिधरशर्मचतुर्वेदः

चौखम्बा संस्कृत सीरीज आफिस वाराणसी १
परिवर्धित मूल्य 3/

S
891.2024
C 392 N

... त सीरीज आफिस, वाराणसी-१

S
891.2024
C392N

INDIAN INSTITUTE OF
ADVANCED STUDY
LIBRARY * SIMLA

॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला
२७२

॥ श्रीः ॥

# निबन्धादर्शः

संग्राहकः
महामहोपाध्याय-
श्री पं० गिरिधरशर्मा चतुर्वेदः

सम्पादकः
श्री पं० शिवदत्तशर्मा चतुर्वेदः एम० ए०
साहित्यव्याकरणाचार्यः
( प्राध्यापक : संस्कृतमहाविद्यालय काशीहिन्दूविश्वविद्यालय, वाराणसी )

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

१९६७

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : द्वितीय, सं० २०२४
मूल्य : २-५०

© The Chowkhamba Sanskrit Series Office,
P. O. Chowkhamba, Post Box 8,
Varanasi-1 ( India )
1967
Phone : 3145

THE

HARIDAS SANSKRIT SERIES

272

*****

# NIBANDHĀDARS'A

( A Collecton of Ideal Sanskrit Essays )

Compiled By

MAHĀMAHOPĀDHYĀYA

PT. GIRIDHARA S'ARMĀ CHATURVEDĪ

Edited By

PT. SHIVADATTA S'ARMĀ CHATURVEDĪ M. A.

THE

CHOWKHAMBA SANSKRIT SERIES OFFICE

VARANASI-1

1967

Library IIAS, Shimla
S 891.202 4 C 392 N
00045942

Second Edition
1967
Price Rs. 2–50

S
891.2024
C392N
45942
22.1.74
11.1

*Also can be had of*

**THE CHOWKHAMBA VIDYABHAWAN**
Publishers & Antiquarian Book-Sellers
Post Box 69, Varanasi–1 ( India )
Phone : 3076

# दो शब्द

ई० १६६६ में चौखम्बा संस्कृत सीरीज, वाराणसी में प्रस्तुत पुस्तक ( निबन्धादर्श ) के सम्पादक मेरे पूज्य पिता महामहोपाध्याय पंडित गिरिधर शर्मा जी की संस्कृत रचनाओं के संग्रह का प्रथम भाग 'चतुर्वेदिसंस्कृतरचनावली' नाम से प्रकाशित हुआ और चौखम्बा प्रकाशन परिवार की ओर से पूज्य पिता जी को समर्पित किया गया। पूज्य पिता जी ने उस पर संतोष व्यक्त करते हुए मुझे निर्देश दिया था कि इस 'चतुर्वेदिसंस्कृतरचनावली' के दूसरे भाग में उनकी समस्त महत्त्वपूर्ण कृतियों का समावेश हो जाय। उसी समय उन्होंने बतलाया था कि संस्कृत में निबन्धलेखन की समुचित शिक्षा के लिए उन्होंने 'संस्कृतनिबन्धादर्शः' नामक पुस्तक का सम्पादन किया था। वह कई वर्ष पूर्व प्रकाशित और बहुमानित हो चुका था और वर्तमान में वह अनुपलब्ध है। इस पुस्तक का नाम मैंने कई पाठ्यक्रमों में छपा देखा था परन्तु पुस्तक हमारे घर पर भी उपलब्ध नहीं थी। पिताजी ने उसका भी पुनर्मुद्रण कराने की प्रेरणा दी। कुछ दिनों में श्री ईश्वरप्रसाद चतुर्वेदी एम० ए० के प्रयत्न से पुस्तक की प्रति मिली और चौखम्बा संस्कृत सीरीज से ही इसके भी प्रकाशन का आदेश पिताजी ने दिया। विगत १० जून को हमारे ऊपर काल का भीषण वज्रपात हुआ और ज्ञान का वह प्रदीप्त पुञ्ज, वह स्नेह-समुद्र, हम अभागों के देखते देखते ही सूख गया ? पूज्य पिताजी के दिवंगत होने के तत्काल पश्चात्

वाराणसी में उपस्थित विद्वानों ने उनके अवशिष्ट अप्रकाशित साहित्य को प्रकाशित करने के लिए 'श्री गिरिधर साहित्यिक शोध संस्थान' की स्थापन की, जिसके अध्यक्ष, पिताजी के परम प्रिय शिष्य, विख्यात संस्कृत विद्वान्, राष्ट्रपति संमानित, महामहोपाध्याय श्री परमेश्वरानन्द शास्त्री जी बनाए गए। उनसे संस्थान की कार्यविधि का निश्चय हुआ और निर्णय किया गया कि 'चतुर्वेदिसंस्कृतरचनावली' के द्वितीय भाग को संपादित कर पिताजी की 'आत्मकथा' तथा 'संस्कृतनिबन्धादर्श' आदि को शीघ्र प्रकाशित कराया जाय।

पाठकों को यह सूचना देते हुए प्रसन्नता होती है कि ये तीनों ही कार्य सुसम्पादित हो चुके हैं, निबन्धादर्श तो पाठकों के हाथों में जा ही रहा है, 'आत्मकथा' भी प्रेस में जा चुकी है, तथा 'चतुर्वेदि-संस्कृतरचनावली' का द्वितीय भाग भी चौखम्बा प्रकाशन से इसके तत्काल उपरान्त ही प्रकाशित किया जायगा।

आशा है प्रस्तुत ग्रन्थ, जिसके पुनर्मुद्रण की आवश्यकता का अनुभव बहुत दिनों से हो रहा था, पाठकों को समुचित मनस्तोष प्रदान करेगा।

वाराणसी,<br>
अक्षय तृतीया<br>
वि० सं० २०२४

—निवेदक<br>
शिवदत्तशर्मा चतुर्वेदी

# प्रास्ताविकम्

ननु 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायानुसारेण किन्नु प्रयोजनमुद्दिश्य ग्रन्थस्यास्य प्रवृत्तिरिति चेदुच्यते। प्रथमं तावत्तत्परीक्षापाठ्यविध्यनुसारेणैव प्रचरति साम्प्रतमध्ययनाध्यापने तत्परीक्षार्थं नियतरूपेणैव निबन्धलेखनस्यावश्यकता अतिरोहितैव सर्वेषाम्। छात्रावस्थाया अनन्तरं व्यावहारिकजीवनदशायां प्रविश्य तत्तत्सभासु भाषणद्वारा समाचारपत्रादिषु च लेखद्वारा साफल्येन स्वाभिप्रायाविष्करणार्थमपि निबन्धरचनापाटवमधिकमुपकारीत्यपि कस्याविदितं भवेत्। अत एव निबन्धरचनाया अतिमहत्त्वमत्युपयोगिता च सर्वैः स्वीक्रियते उद्घोष्यते च।

परं सन्त्येवानेके ग्रन्था विषयमेनमुद्दिश्य प्रवृत्ताः। अयं तु ग्रन्थोऽनन्यसाधारणमेव किञ्चित्प्रयोजनमुद्दिश्य प्रवृत्त इत्येवाधस्तात्प्रदर्श्यते। प्रायेण निबन्धरचनाया विषयो नूतन आधुनिक एव वेति बहूनां मतिः। निबन्धरचनाविषयका ग्रन्थाः सर्वथा नूतना एवोपलभ्यन्त इति हेतुश्चापि पूर्वोक्तां मतिमेव द्रढयति। सैषा मतिर्निराधारैवेति दर्शयितुमेव वस्तुतो ग्रन्थस्यास्य रचना संजाता। अत एव एकान्ततः प्राचीनाचार्याणां प्रसिद्धानामसाम्प्रतिकानां विदुषां च विशिष्टग्रन्थेभ्य एव समुद्धृत्य आदर्शभूता निबन्धा अत्र संगृहीताः। ते ते विश्रुतग्रन्थकाराः कथमिव स्वविचारसन्दर्भान् निबबन्धुरित्यमुमर्थं स्वच्छादर्श इव प्रदर्शयन्नयं निबन्धादर्शश्छात्राणामुपकाराय विदुषाञ्च मनोऽनुरञ्जनाय भविष्यतीति विश्वसिमः।

अस्मिन्हि निवन्धादर्शे न केवलमद्यत्वे वस्तुवर्णनात्मकवृत्तान्तवर्णनात्मक-विचारात्मकरूपेण प्रसिद्धा निवन्धभेदा एव प्रदर्शिताः, किन्तु पत्रलेखन-ताम्रपत्रादिलेखन-गल्पजीवनचरितादिविषयका अपि प्राचीना निवन्धाः समुद्धृताः सन्ति। परन्ततोऽप्यतिशयेनोपयोगी अंशस्त्वस्य ग्रन्थस्य संस्कृत-साहित्यविषयका निबन्धा एव। नूनं तद्द्वारा छात्राः संस्कृतस्य प्रधानभूत-साहित्येतिहासेन परिचिता भविष्यन्ति। तदेवं प्रदर्शितमस्य ग्रन्थस्यानन्य-साधारणं प्रयोजनम्। प्राचीननिबन्धानां विषये हि झटिति समायाति स्मृतिपथमेतत् पद्यम्—

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते।
अनुज्झितार्थसंबन्धः प्रबन्धो दुरुदाहरः॥

अपि च—

रीतिं विचिन्त्य विगणय्य गुणान्विगाह्य
शब्दार्थसार्थमनुसृत्य च सूक्तिमुद्राः।
कार्यो निवन्धविषये विदुषा प्रयत्नः
के पोतयन्त्ररहिता जलधौ प्लवन्ते॥

काशी
वि० सं० १९९४

—गिरिधरशर्मा चतुर्वेदः

# विषयानुक्रमः

दो शब्द

प्रास्ताविकम्

## निबन्धाः

| | | | पृ० |
|---|---|---|---|
| १ | सद्वृत्तम् | ( चरकसंहितायाः ) | १ |
| २ | तिस्र एषणाः पुनर्भवसिद्धिश्च | ( ,, ,, ) | ५ |
| ३ | आयुषो नियतकालप्रमाणत्वं न वा | ( ,, ,, ) | ८ |
| ४ | आत्मलज्जयैव सत्पुरुषा नाचारवेलां लङ्घयन्ति | ( आर्यशूरविरचितजातकमालायाः ) | ११ |
| ५ | प्रविवेकसुखरसज्ञानां विडम्बनेव विहिंसेव कामाः प्रतिकूला भवन्ति | ( आर्यशूरविरचितजातकमालायाः ) | १५ |
| ६ | प्राचीनपत्रलेखनपद्धतिः | ( महावीरचरितादेः ) | २२ |
| ७ | महाराजाधिराजश्रीहर्षस्य ताम्रपत्रलेखः | | २६ |
| ८ | कोसलाधिपतेस्तीवरदेवस्य ताम्रपत्रलेखः | | २८ |
| ९ | श्रीशंकराचार्यः | ( आनन्दगिरिकृतशंकरविजयात् ) | ३० |
| १० | निर्वृतिर्नाम नगरी | ( उपमितिभवप्रपञ्चाख्यकथायाः ) | ३७ |
| ११ | निर्वृतिनगरीमार्गः | ( ,, ,, ) | ४० |
| १२ | अगस्त्याश्रमवर्णनम् | ( कादम्बर्याः ) | ४५ |
| १३ | पम्पासरोवरवर्णनम् | ( ,, ) | ४७ |

| | | | |
|---|---|---|---|
| १४ | जाबाल्याश्रमवर्णनम् | ( कादम्बर्याः ) | ४८ |
| १५ | सन्ध्यावर्णनम् | ( ,, ) | ५२ |
| १६ | उज्जयिनीवर्णनम् | ( ,, ) | ५५ |
| १७ | प्रभातवर्णनम् | ( ,, ) | ६० |
| १८ | आर्यावर्तवर्णनम् | ( नलचम्प्वाः ) | ६२ |
| १९ | निषधानगरीवर्णनम् | ( ,, ) | ६६ |
| २० | दक्षिणदेशस्य वर्णनम् | ( ,, ) | ६९ |
| २१ | कुण्डिननगरस्य वर्णनम् | ( ,, ) | ७१ |
| २२ | उषःकालवर्णनम् | ( ,, ) | ७४ |
| २३ | प्रभातसमयवर्णनम् | ( ,, ) | ,, |
| २४ | विन्ध्यवनस्थलीवर्णनम् | ( ,, ) | ७५ |
| २५ | चन्द्रोदयवर्णनम् | ( ,, ) | ८१ |
| २६ | वर्षासमयवर्णनम् | ( वासवदत्तायाः ) | ८२ |
| २७ | प्रस्थानभेदः | ( मधुसूदनसरस्वतीस्वामिनः ) | ८३ |
| २८ | वेदस्वरूपं वेदशाखाश्च | ( आर्यविद्यासुधाकरात् ) | ९२ |
| २९ | वेदाङ्गानि तदुपयोगश्च | ( सायणीयऋग्वेदभाष्यभूमिकायाः ) | १०९ |
| ३० | वेदोपाङ्गानि | ( आर्यविद्यासुधाकरात् ) | ११९ |
| ३१ | पुराणमतसंग्रहः | ( ,, ,, ) | १२१ |
| ३२ | तान्त्रिकसाहित्यम् | ( ,, ,, ) | १२४ |
| ३३ | संस्कृतकवीनां विषये प्राचीना उक्तयः | | १२७ |

# निबन्धादर्शः

म० म० श्री गिरिधरशर्मा चतुर्वेदः

॥ श्रीः ॥

# निबन्धादर्शः

## १. सद्वृत्तम्

आत्महितं चिकीर्षता सर्वेण सर्वं सर्वदा स्मृतिमास्थाय सद्वृत्तमनुष्ठेयम् । तद्ध्यनुष्ठानं युगपत् संपादयत्यर्थद्वयमारोग्यमिन्द्रियविजयं चेति ।

तत्सद्वृत्तमखिलेनोपदेक्ष्यामः । तद्यथा देवगोब्राह्मणगुरुवृद्धसिद्धाचार्यानर्चयेत् । अग्निमुपाचरेत् । ओषधीः प्रशस्ता धारयेत् । द्वौ कालावुपस्पृशेत् । मलायतनेष्वभीक्ष्णं पादयोश्च वैमल्यमादध्यात् । त्रिः पक्षस्य केशश्मश्रुलोमनखान् संहारयेत् । नित्यमनुपहतवासाः सुमनाः सुगन्धिः स्यात् ।

साधुवेशः, प्रसाधितकेशः मूर्धश्रोत्रघ्राणपादतैलनित्यः, पूर्वाभिभाषी, सुमुखः, दुर्गेष्वभ्युपपत्ता, होता, यष्टा, दाता, बलीनामुपहर्ता, अतिथीनां पूजकः, पितॄणां पिण्डदः, काले हितमितमधुरार्थवादी, वश्यात्मा, धर्मात्मा, हेतावीर्षुः, फले नेर्षुः, निश्चिन्तः, निर्भीकः, धीमान्, ह्रीमान्, महोत्साहः, दक्षः, क्षमावान्, धार्मिकः, आस्तिकः, विनयबुद्धिविद्याभिजनवयोवृद्धसिद्धाचार्याणामुपासिता, छत्री, दण्डी, मौनी[1], सोपानत्कः, युगमात्रदृग् विचरेत् ।

---

१. मौली-इति पाठान्तरम् ।

मङ्गलाचारशीलः, कुचेलास्थिकण्टकामेध्यकेशतुषोत्करभस्मकपालस्नानवलिभूमीनां परिहर्ता। प्राक् श्रमाद् व्यायामवर्जी स्यात्। सर्वप्राणिषु बन्धुभूतः स्यात्। क्रुद्धानामनुनेता, भीतानामभ्युपपत्ता, सत्यसन्धः, सामप्रधानः, परपरुषवचनसहिष्णुः, अमर्षघ्नः, प्रशमगुणदर्शी, रागद्वेषहेतूनां हन्ता।

नानृतं ब्रूयात्। नान्यस्वमादध्यात्। नान्यस्त्रियमभिलषेत्, नान्यश्रियम्। न वैरं रोचयेत्। न कुर्यात्पापम् न पापेऽपि पापी स्यात्। नान्यदोषान् ब्रूयात्। नान्यरहस्यमागमयेत्।

नाधार्मिकैर्न नरेन्द्रद्विष्टैः सहासीत, नोन्मत्तैर्न पतितैर्न भ्रूणहन्तृभिर्न क्षुद्रैर्न दुष्टैः। न दुष्टयानान्यारोहेत्। नानास्तीर्णमनुपहितमविशालमसमं वा शयनं प्रपद्येत। न गिरिविषममस्तकेष्वनुचरेत्। न द्रुममारोहेत्। न जलोग्रवेगमवगाहेत। कूलच्छायां नोपासीत। नाग्न्युत्पातमभितश्चरेत् नोच्चैर्हसेत्। न शब्दवन्तं मारुतं मुञ्चेत्। नासंवृतमुखो जृम्भां क्षवथुं हास्यं वा प्रवर्तयेत्। न नासिकां कुष्णीयात्। न दन्तान्विघट्टयेत्। न नखान् वादयेत् नास्थीन्यभिहन्यात्। न भूमिं विलिखेत्। न छिन्द्यात्तृणम्। न लोष्टं मृद्नीयात्।

न विगुणमङ्गैश्चेष्टेत। ज्योतींष्यग्निञ्चामेध्यमशस्तं च नाभिवीक्षेत। नैकः शून्यगृहं न चाटवीमनुप्रविशेत्। न पापवृत्तान् स्त्रीमित्रभृत्यान् भजेत। नोत्तमैर्विरुध्येत। नावरानुपासीत। न जिह्मं रोचयेत्। नानार्यमाश्रयेत्। न भयमुत्पादयेत्। न साहसातिस्वप्नप्रजागरस्नानपानाशनान्यासेवेत। नोर्ध्वजानुश्चिरं तिष्ठेत्। न व्यालानुपसर्पेत्। न दंष्ट्रिणः न विषाणिनः। पुरोवातातपावश्यायातिप्रवातान् जह्यात्। कलिं नारभेत। नाविगतक्लमो नानाप्लुतवदनो न नग्न उपस्पृशेत्। न स्नानशाट्या स्पृशेदुत्तमाङ्गम्। नोपस्पृश्य ते एव वससी बिभृयात्। न पूज्यमङ्गलान्यपसव्यं गच्छेत्। नेतराण्यनुदक्षिणम्।

नारत्नपाणिर्नास्नातो नोपहतवासाः नाजपित्वा नाहुत्वा देवताभ्यो नानिरूप्य पितृभ्यो नादत्वा गुरुभ्यो नातिथिभ्यो नोपाश्रितेभ्यो नापुण्यगन्धो नामाली नाप्रक्षालितपाणिपादवदनो नाशुद्धमुखो नोदङ्मुखो न विमानाभक्ताशिष्टाशुचिक्षुधितपरिचरो न पात्रीष्वमेध्यासु नादेशे नाकाले नाकीर्णे नादत्त्वाग्रमग्नये नानोक्षितं प्रोक्षणोदकैर्न मन्त्रैरनभिमन्त्रितं न कुत्सयन्न कुत्सितं न प्रतिकूलोपहितमन्नमाददीत, न पर्युषितम्। नाशेषभुक् स्यात् अन्यत्र दधिमधुलवणसक्तुसर्पिर्भ्यः। न नक्तं दधि भुञ्जीत। न सक्तूनेकानश्नीयात्, न निशि न भुक्त्वा न बहून्न द्विर्नोदकान्तरितान्। न छित्वा द्विजै[1]र्भक्षयेत्।

नानृजुः क्षुयान्नाश्नान्न शयीत। न वेगितोऽन्यकार्यः स्यात्। न वाय्वग्निसलिलसोमार्कद्विजगुरुप्रतिमुखं निष्ठीवितावातवर्चोमूत्राण्युत्सृजेत्। न पन्थानमवमूत्रयेत्। न जनवति नान्नकाले न जपहोमाध्ययनबलिमङ्गलक्रियासु श्लेष्मसिङ्घाणकं मुञ्चेत्।

न स्त्रियमवजानीत्, नातिविश्रम्भयेत्, न गुह्यमनुश्रावयेत्, नाधिकुर्यात्। न सतो न गुरून्परिवदेत्। न विमत्स्वनार्त्तवीषु नाभ्युदितासु[2] दिक्षु नाग्निसंप्लवे न भूमिकम्पे न महोत्सवे नोल्कापाते न महाग्रहोपगमने[3] न नष्टचन्द्रायां तिथौ न संध्ययोर्नामुखाद् गुरोर्नावपतितं[4] नातिमात्रं न तान्तं[5] न विस्वरं नानवस्थितपदं नातिद्रुतं न विलम्बितं नात्युच्चैर्नातिनीचैः स्वरैरध्ययनमभ्यस्येत्।

---

१. द्विजैर्दन्तैः।

२. अभ्युदितासु दिक्षु दाहवतीसु दिक्षु—इति चक्रदत्तः।

३. महाग्रहोपगमनं चन्द्रसूर्यग्रहणम्।

४. अवपतितं हीनवर्णम्—इति चक्रदत्तः।

५. तान्तं रूक्षस्वरम्।

नातिसमयं[1] जह्यात्। न नियमं भिन्द्यात्। न बालवृद्धलुब्ध-मूर्खक्लिष्टक्लीबैः सह सख्यं कुर्यात्। न गुह्यं विवृणुयात्। न कञ्चिदवजानीयात्। नाहंमानी स्यात्। नाधीरो नात्युच्छ्रितसत्त्वः स्यात्, नाभृतभृत्यो नाविश्रब्धस्वजनो नैकः सुखी न दुःखशीलाचरोपचारो न सर्वविश्रम्भी न सर्वाभिशङ्की न सर्वकालाविचारी। न कार्यकालमतिपातयेत्। नापरीक्षित-मभिनिविशेत्। नेन्द्रियवशगः स्यात्।

न चञ्चलं मनो भ्रामयेत्। न बुद्धीन्द्रियाणामतिभारमादध्यात्। नातिदीर्घसूत्री स्यात्। क्रोधहर्षावनुविदध्यात्। न शोकमनुवसेत्[2]। न सिद्धावौत्सुक्यं गच्छेत्, नासिद्धौ दैन्यम्। प्रकृतिमभीक्ष्णं स्मरेत्। नतुप्रभावनिश्चितः स्यात्। हेत्वारम्भनित्यश्च। न कृतमित्यावसेत्। न वीर्यं जह्यात्। नापवादमनुस्मरे।

आत्मानमाशीर्भिराशासानः "अग्निर्मे नापगच्छेच्छरीरात्, वायुर्मे प्राणानादधातु, विष्णुर्मे बलमादधातु, इन्द्रो मे वीर्यम्, शिवा मां प्रविशन्त्वापः, आपो हि ष्ठे"त्यपः स्पृशेत्। द्विः परिमृज्यौष्ठौ पादौ चाभ्युक्ष्य मूर्धनि खानि चोपस्पृशेदद्भिः। आत्मानं हृदयं शिरश्च। ब्रह्मचर्यज्ञानदानमैत्रीकारुण्यहर्षा-पेक्षाप्रशमपरश्च स्यादिति।

अत्र श्लोकाः।

स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति।
स समाः शतमव्याधिरायुषा न वियुज्यते॥
नृलोकमापूरयते यशसा साधुसम्मतः।
धर्मार्थावेति भूतानां बन्धुतामुपगच्छति॥
परान् सुकृतिनो लोकान् पुण्यकर्मा प्रपद्यते।
तस्माद् वृत्तमनुष्ठेयमिदं सर्वेण सर्वदा॥ [चरकसंहितायाः]

---

१. अतिसमयो बहुभिर्मिलित्वा कृतो नियमः।

२. न चिरं शोकवशगः स्यादित्यर्थः।

# २. तिस्र एषणाः पुनर्भवसिद्धिश्च

इह खलु पुरुषेणानुपहतसत्त्वबुद्धिपौरुषपराक्रमेण हितमिह चामुष्मिंश्च लोके समनुपश्यता तिस्र एषणा पर्येष्टव्या भवन्ति। तद्यथा। प्राणैषणा धनैषणा परलोकैषणेति।

आसां तु खल्वेषणानां प्राणैषणा तावत्पूर्वतरमापद्यते। कस्मात्? प्राणपरित्यागे हि सर्वत्यागः। तस्यानुपालनं—स्वस्थस्य स्वस्थवृत्तिरातुरस्य विकारप्रशमनेऽप्रमादस्तदुभयमेतदुक्तं वक्ष्यते च। तद्यथोक्तमनुवर्तमानः प्राणानुपालनाद्दीर्घमायुरवाप्नोतीति *प्रथमैषणा* व्याख्याता भवति।

अथ द्वितीयां धनैषणामापद्येत। प्राणेभ्यो ह्यनन्तरं धनमेव पर्येष्टव्यं भवति। न ह्यतः पापात्पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः। तस्मादुपकरणानि पर्येष्टुं यतेत। तत्रोपकरणोपायाननुव्याख्यास्यामः। तद्यथा। कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि। यानि चान्यान्यपि सतामविगर्हितानि कर्माणि वृत्तिपुष्टिकराणि विद्यात्तान्यारभेत कर्तुम्। तथा कुर्वन्दीर्घजीवितं जीवत्यनवमतः पुरुषो भवतीति द्वितीया *धनैषणा* व्याख्याता भवति।

अथ तृतीयां परलोकैषणामापद्येत। संशयश्चात्र। कथम्? भविष्याम इतश्च्युता न वेति। कुतः पुनः संशय इति? उच्यते। सन्ति ह्येके प्रत्यक्षपराः परोक्षत्वात् पुनर्भवस्य नास्तिक्यमाश्रिताः। सन्ति चापरे ये त्वागमप्रत्ययादेव पुनर्भवमिच्छन्ति। श्रुतिभेदाच्च ( संशयः )—

मातरं पितरञ्चैके मन्यन्ते जन्मकारणम्।
स्वभावं परनिर्माणं[1] यदृच्छां चापरे जनाः॥

इत्यतः संशयः—किन्नु खल्वस्ति पुनर्भवो नवेति।

---

१. पर ऐश्वर्यादिगुणयुक्त आत्मविशेषस्तेन संसार्यात्मनिरपेक्षिणा निर्माणमित्यर्थः।

तत्र बुद्धिमान्नास्तिक्यबुद्धिं जह्याद्विचिकित्सां च। कस्मात्। प्रत्यक्षं ह्यल्पमनल्पमप्रत्यक्षमस्ति यदागमानुमानयुक्तिभिरुपलभ्यते। यैरेव तावदिन्द्रियैः प्रत्यक्षमुपलभ्यते तान्येव सन्ति चाप्रत्यक्षाणि।

सतां च रूपाणामतिसन्निकर्षादतिविप्रकर्षादावरणात् करणदौर्बल्यान्मनोऽनवस्थानात्समानाभिहारादभिभवादतिसौक्ष्म्याच्च प्रत्यक्षानुपलब्धिः तस्मादपरीक्षितमेतदुच्यते—प्रत्यक्षमेवास्ति नान्यदस्तीति।

द्विविधमेव खलु सर्वं सच्चासच्च। तस्य चतुर्विधा परीक्षा। आप्तोपदेशः प्रत्यक्षमनुमानं युक्तिश्चेति।

तत्राप्तागमस्तावद्वेदः। यश्चान्योऽपि कश्चिद् वेदार्थादविपरीतः परीक्षकैः प्रतीतः शिष्टानुमतो लोकानुग्रहप्रवृत्तः शास्त्रवादः स चाप्तागमः। आप्तागमादुपलभ्यते दानं तपो यज्ञः सत्यमहिंसा ब्रह्मचर्यमित्यभ्युदयनिःश्रेयसकराणीति। न चानतिवृत्तसत्वदोषाणा[1]मदोषै[2]रपुनर्भवो धर्मद्वारेषू[3]पदिश्यते। धर्मद्वारावहितैश्च व्यपगतभयरागद्वेषलोभमोहमानैर्ब्रह्मपरैराप्तैः कर्मविद्भिरनुपहतसत्त्वबुद्धिप्रचारैः पूर्वैः पूर्वतरैर्महर्षिभिर्दिव्यचक्षुर्भिर्दृष्ट्वोपदिष्टः पुनर्भव इति व्यवस्येदेवं पुनर्भवम्।

प्रत्यक्षमपि चोपलभ्यते। मातापित्रोर्विसदृशान्यपत्यानि। तुल्यसम्भवानां वर्णस्वराकृतिसत्त्वबुद्धिभागविशेषाः। प्रवरावरकुलजन्म। दास्यैश्वर्यम्। सुखासुखमायुः। आयुषो वैषम्यम्। इहाकृतस्यावाप्तिः। अशिक्षितानां च रुदितस्तनपानहासत्रासादीनां च प्रवृत्तिः। लक्षणो-

---

१. अतिवृत्तावनुपशान्तौ सत्त्वदोषौ मानसौ रजस्तमोरूपौ येषां ते तथा, तेषाम्।

२. अदोषैर्महर्षिभिः।

३. धर्मद्वारेषु शास्त्रेषु।

त्पत्तिः[१]। कर्मसामान्ये फलविशेषः। मेधा क्वचित्, क्वचित् कर्मण्यमेधा। जातिस्मरणम्। इहागमनमितश्च्युतानाञ्च भूतानाम्। समदर्शने प्रियाप्रियत्वम्।

अत एवानुमीयते यत्स्वकृतमपरिहार्यमविनाशि पौर्वदेहिकं दैवसंज्ञकमानुबन्धिकं कर्म तस्यैतत् फलम्, इतश्चान्यद्भविष्यतीति फलाद्बीजमनुमीयते, फलञ्च बीजात्।

युक्तिश्चैषा। षड्धातुसमुदयाद् गर्भजन्मा आत्मा च परलोकसम्बन्ध एवेति कर्तृकरणसंयोगात्क्रिया। कृतस्य कर्मणः फलं नाकृतस्य। नाङ्कुरोत्पत्तिरबीजात्। कर्मसदृशं फलम्। नान्यस्माद्बीजादन्यस्योत्पत्तिरिति युक्तिः।

एवं प्रमाणैश्चतुर्भिरुपदिष्टे पुनर्भवे धर्मद्वारेष्ववधीयेत। तद्यथा गुरुशुश्रूषायामध्ययने व्रतचर्यायां दारक्रियायामपत्योत्पादने भृत्यभरणेऽतिथिपूजायां दानेऽनभिध्यायां[२] तपस्यनसूयायां देहवाङ्मानसे कर्मण्यक्लिष्टे देहेन्द्रियमनोऽर्थबुद्ध्यात्मपरीक्षायां मनःसमाधाविति। यानि चान्यान्येवंविधानि कर्माणि सतामविगर्हितानि स्वर्ग्याणि वृत्तिपुष्टिकराणि विद्यात्तान्यारभेत कर्तुम्। तथा कुर्वन्निह चैव यशो लभते प्रेत्य च स्वर्गमिति तृतीया *परलोकैषणा* व्याख्याता भवति ॥

[ चरकसंहितायाः ]

---

१. सामुद्रिकलक्षणप्रतिपादितलक्षणोत्पत्तिः।

२. अभिध्या तु परस्वविषये स्पृहेत्यमरः।

# ४. आयुषो नियतकालप्रमाणत्वं न वा

भगवन्तमात्रेयमग्निवेश उवाच। किन्नु खलु भगवन्! नियतकालप्रमाणमायुः सर्वं न वेति।

भगवानुवाच—

इहाग्निवेश ! भूतानामायुर्युक्तिमपेक्षते।
दैवे पुरुषकारे च स्थितं ह्यस्य[1] बलाबलम्॥
दैवमात्मकृतं विद्यात् कर्म्म यत् पौर्वदैहिकम्।
स्मृतः पुरुषकारस्तु क्रियते यदिहापरम्॥
बलाबलविशेषोऽस्ति तयोरपि च कर्म्मणोः।
दृष्टं हि त्रिविधं कर्म्म हीनं मध्यममुत्तमम्॥
तयोरुदारयो[2]र्युक्तिर्दीर्घस्य स्वसुखस्य च।
नियतस्यायुषो हेतुर्विपरीतस्य चेतरा[3]॥
मध्यमा मध्यमस्येष्टा कारणं शृणु चापरम्।
दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते॥
दृष्ट्वा[4] यदेके मन्यन्ते नियतं मानमायुषः॥
कर्म्म किञ्चित् क्वचित् काले विपाके नियतं महत्[5]।
किञ्चित्त्वकालनियतं प्रत्ययैः प्रतिबोध्यते[6]॥ इति।

---

१. अल्पायुषः।
२. तयोर्दैवपुरुषकारयोः प्रशस्तत्वेनोत्तमयोरित्यर्थः।
३. अनियतस्यायुषोऽसुखस्य च हीनयोर्दैवपुरुषकारयोर्युक्तिर्हेतुरित्यर्थः।
४. दैवेन पराभूतं पुरुषकारं दृष्ट्वेति भावः।
५. बलवदित्यर्थः।
६. दृष्टकारणैरुद्रिक्तं क्रियत इत्यर्थः।

तस्मादुभयदृष्टत्वादेकान्तग्रहणमसाधु। निदर्शनम[1]पि चात्रोदाहरिष्यामः। यदि हि नियतकालप्रमाणमायुः सर्वं स्यात्, तदायुष्कामानां न मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनाद्याः क्रिया इष्टयश्च प्रयुज्येरन्।

न उद्भ्रान्तचण्डचपलगोगजोष्ट्रखरतुरगमहिषादयः पवनादयश्च दुष्टाः परिहार्य्याः स्युः, न प्रपातगिरिविषमदुर्गाम्बुवेगाः। तथा न प्रमत्तोन्मत्तोद्भ्रान्तचण्डचपलमोहलोभाकुलमतयः, नारयः, न च प्रवृद्धोऽग्निः, न च विविधविषाश्रयाः सरीसृपोरगादयः। न साहसम्, नादेशकालचर्य्या, न नरेन्द्रप्रकोपः। इत्येवमादयो भावा नाभावकराः स्युः, आयुषः सर्वस्य नियतकालप्रमाणत्वात्।

न चानभ्यस्ताकालमरणभयनिवारकाणामकालमरणभयमागच्छेत् प्राणिनाम्। व्यर्थाश्चारम्भकथाप्रयोगबुद्धयः स्युर्महर्षीणां रसायनाधिकारे।

नापीन्द्रो नियतायुषं शत्रुं वज्रेणाभिहन्यात्। नाश्विनावार्त्तं भेषजेनोपपादयेताम्। नर्षयो यथेष्टम् आयुस्तपसा प्राप्नुयुः, न च विदितवेदितव्या महर्षयः ससुरेशाः सम्यक् पश्येयुरुपदिशेयुराचरेयुर्वा[2]।

अपि च सर्वचक्षुषामेतत् परं यदैन्द्रं चक्षुः[3], यदङ्गास्माकं तेन प्रत्यक्षं यथा पुरुषसहस्राणामुत्थायोत्थायाहवं कुर्वताम् अकुर्वताञ्चातुल्यायुष्ट्वम्, तथा जातमात्राणाम् अप्रतीकारात् प्रतीकाराच्च।

---

१. निदर्शनं युक्तिः।

२. भेषजमिति शेषः।

३. सर्वचक्षुषां सर्वप्रमाणानामित्यर्थः। एतत्परमभ्रान्तत्वेन श्रेष्ठं यदैन्द्रं चक्षुः प्रत्यक्षप्रमाणमित्यर्थः।

अविषविषप्राशिनाञ्चापि अतुल्यायुष्ट्वम् । न च तुल्यो योगक्षेम उदपानघटानां चित्रघटानाञ्चोत्सीदताम्[१] ।

तस्माद्धितोपचारमूलं जीवितम् । अतो विपर्ययात् मृत्युः ।

अपि च देशकालात्मगुणविपरीतानां कर्मणामाहारविहाराणाञ्च क्रियोपयोगं सम्यक्, सर्वातियोगसन्धारणम्[२], असन्धारणमुदीर्णानाञ्च गतिमताम्, साहसानाञ्च वर्जनमारोग्यानुवृत्तौ उपलभामहे हेतुमुपदिशामः सम्यक् पश्यामश्चेति ।

अतः परमग्निवेश उवाच । एवं सति अनियतकालप्रमाणायुषां भगवन्! कथं कालमृत्युरकालमृत्युर्वा भवतीति । तमुवाच भगवान् आत्रेयः । श्रूयताम् अग्निवेश! यथा यानसमायुक्तोऽक्षः प्रकृत्यैवाक्षगुणैरुपेतः स्यात्, स च सर्वगुणोपपन्नो वाह्यमानो यथाकालं स्वप्रमाणक्षयादेवावसानं गच्छेत्; तथायुः शरीरोपगतं बलवतः प्रकृत्या यथावदुपचर्य्यमाणं स्वप्रमाणक्षयादेव अवसानं गच्छति । स मृत्युः काले ।

यथा च स एवाक्षोऽतिभाराधिष्ठितत्वाद् विषमपथादपथादक्षचक्रभङ्गाद्वाह्यवाहकदोषादणिमोक्षात्[३] पर्य्यसनादनुपाङ्गा[४] च्चान्तरा व्यसनमापद्यते, तथायुरप्ययथाबलमारम्भादयथाग्न्यभ्यवहरणाद्विषमाभ्यवहरणात् विषमशरीरन्यासादतिमैथुना-दसत्संश्रयादुदीर्णवेगविनि

---

१. चित्रघटोऽयं चित्रित एव स्थाप्यते, स हि पानीयवहनादिप्रत्यवायहेत्वभावात् चिरं तिष्ठति । उदपानघटस्तु जलसंबन्धाद् तथा वहनसमये पतनादिना च शीघ्रमुत्सीदति । अतस्तयोरतुल्यो योगक्षेमः ।

२. सन्धारणं वर्जनम् ।

३. अणिमोक्षात्कीलमोचनात् ।

४. पर्यसनं परिक्षेपः । अनुपाङ्गात् स्नेहादानात् ।

ग्रहात् विधार्यवेगाविधारणाद् भूत-विषवाय्वग्न्युपतापादभिघातादाहारप्रतीकारविवर्जनाच्चान्तरा व्यसनमापद्यते । स मृत्युरकाले । तथा ज्वरादीनप्यातङ्कान्मिथ्योपचरितानकालमृत्यून्[1] पश्याम इति ॥

[ चरकसंहितायाः ]

---

# ४. आत्मलज्जयैव सत्पुरुषा नाचारवेलां लङ्घयन्ति

तद्यथानुश्रूयते । बोधिसत्त्वः किल कस्मिंश्चिदनुपक्रुष्ट[2] गोत्रचारित्रे स्वधर्मानुवृत्तिप्रकाशयशसि विनयाचारश्लाघिनि महति ब्राह्मणकुले जन्मपरिग्रहं चकार । स यथाक्रमं गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मादिभिः कृतसंस्कारक्रमो वेदा-ध्ययननिमित्तं श्रुताभिजनाचारसम्पन्ने गुरौ प्रतिवसति स्म ।

तस्य श्रुतग्रहणधारणपाटवञ्च
भक्त्यन्वयश्च सततं स्वकुल प्रसिद्धः ।
पूर्वे वयस्यपि शमाभरणा स्थितिश्च
प्रेमप्रसाद सुमुखं गुरुमस्य चक्रुः ॥ १ ॥

वशीकरणमन्त्रा हि नित्यमव्याहता गुणाः ।
अपि द्वेषाग्नितप्तानां किम्पुनः स्वस्थचेतसाम् ॥ २ ॥

अथ तस्याध्यापकः सर्वेषामेव शिष्याणां शीलपरीक्षा-निमित्तं स्वाध्यायविश्रामकालेष्वात्मनो दारिद्र्यदुःखान्यभीक्ष्ण-मुपवर्णयामास ।

---

१. अकालमृत्युम् अकालमृत्युकरान् ।

२. अनुपक्रुष्टम् = अनिन्दितम् ।

स्वजनेऽपि निराक्रन्दमुत्सवेऽपि हतानन्दम् ।
धिक् प्रदानकथामन्दं दारिद्र्यमफलच्छन्दम् ॥ ३ ॥
परिभवभवनं श्रमास्पदं सुखपरिवर्जितमत्यनूर्जितम् ।
व्यसनमिव सदैव शोचनं धनविकलत्वमतीव दारुणम् ॥ ४ ॥

अथ ते तस्य शिष्याः प्रतोदसञ्चोदिता इव सदश्वा गुरुस्नेहात्समुपजातसंवेगाः सम्पन्नतरं प्रभूततरञ्च भैक्षमुपसंहरन्ति स्म । तानुवाच । अलमनेनात्र भवतां परिश्रमेण । न भैक्षोपहारा कस्यचिद्दारिद्र्यक्षामतां क्षपयन्ति । अस्मत्परिक्लेशामर्षिभिस्तु भवद्भिरयमेव यत्नो धनाहरणं प्रति युक्तः कर्तुं स्यात् । कुतः ।

क्षुधमन्नं जलं तर्षं मन्त्रवाक्सागदा गदान् ।
हन्ति दारिद्र्यदुःखन्तु सन्तत्याराधनं[1] धनम् ॥ ५ ॥

शिष्या ऊचुः । किं करिष्यामो मन्दभाग्या वयं यदेतावान्नः शक्तिप्रयामः[2] । अपि च ।

भैक्षवद् यदि लभ्येरन्नुपाध्याय ! धनान्यपि ।
नेदं दारिद्र्यदुःखन्ते वयमेवं सहेमहि ॥ ६ ॥
प्रतिग्रहकृशोपायं विप्राणां हि धनार्जनम् ।
अप्रदाता जनश्चायमित्यगत्या हता वयम् ॥ ७ ॥

अध्यापक उवाच । सन्त्यन्येऽपि शास्त्रपरिदृष्टा धनार्जनोपायाः । जरानिष्पीतसामर्थ्यास्तु वयमयोग्यरूपास्तत्प्रतिपत्तौ ।

शिष्या ऊचुः । वयमुपाध्याय जरयानुपहतपराक्रमाः । तद्यदि नस्तेषां शास्त्रविहितानामुपायानां प्रतिपत्तिसहतां मन्यसे तदुच्यताम् । यावदध्यापनपरिश्रमस्यानृण्यन्ते गच्छाम इति ।

अध्यापक उवाच । तरुणैरपि व्यवसायशिथिलहृदयैर्दुरभिस-

---

१. सन्तत्याः सन्तानस्य आराधनम् ।

२. प्रयामो दैर्घ्यम् । इयत्तेति यावत् ।

म्भवाः खल्वेवंविधा धनार्जनोपायाः। यदि त्वयमत्र भवतां निर्बन्धः, तच्छ्रूयतां साधुः कतम एको धनोपार्जनक्रमः।

आपद्धर्मः स्तेयमिष्टं द्विजानामापच्चान्त्या निःस्वता नाम लोके।
तस्माद्भोज्यं स्वं परेषामदुष्टैः सर्वं चैतद्ब्राह्मणानां स्वमेव ॥ ८ ॥

कामं प्रसह्यापि[1] धनानि हर्तुं शक्तिर्भवेदेव भवद्विधानाम्।
न त्वेष योगः[2], स्वयशो हि रक्ष्यं, शून्येषु तस्माद् व्यवसेयमेव ॥९॥

इति मुक्तप्रग्रहास्तेन ते छात्राः परममिति तत्तस्य वचनमयुक्तमपि युक्तमिव प्रत्यश्रौषुरन्यत्र बोधिसत्त्वात्।

स हि प्रकृतिभद्रत्वात्तन्नोत्सेहेऽनुमोदितुम्।
कृत्यवत्प्रतिपन्नं तैर्व्याहन्तुं सहसैव तु[3] ॥ १० ॥

व्रीडावनतवदनस्तु बोधिसत्त्वो मृदु विनिःश्वस्य तूष्णीमभूत्।

अथ स तेषामध्यापको बोधिसत्त्वमवेक्ष्य तं विधिमनभिनन्दन्तमप्रतिक्रोशन्तं[4] निविष्टगुणसम्भावनस्तस्मिन्महासत्त्वे किन्नु खल्वयमव्यवसितत्त्वान्निःस्नेहतया वा मयि स्तेयं न प्रतिपद्यते, उताधर्मसंज्ञयेति समुत्पन्नविमर्शस्तत्स्वभावव्यक्तिकरणार्थं बोधिसत्त्वमुवाच। भो महाब्राह्मण !

अमी द्विजा मद्व्यसनासहिष्णवः समाश्रिता वीरमनुष्यपद्धतिम्।
भवाननुत्साहजडस्तु लक्ष्यते न नूनमस्मद्व्यसनेन तप्यते ॥११॥

परिप्रकाशेऽप्यनिगूढविस्तरे मयात्मदुःखे वचसा विदर्शिते।
कथन्नु निःसम्भ्रमदीनमानसो भवानिति स्वस्थवदेव तिष्ठति ॥१२॥

---

१. बलप्रयोगेणापि।

२. योगः प्रयोगः, समुचित इति शेषः।

३. तैः कृत्यवत्प्रतिपन्नं सहसैव व्याहन्तुं प्रतीकर्तुं तु न उत्सेहे इत्यर्थः।

४. अगर्हयन्तम्।

अथ बोधिसत्त्वःससम्भ्रमोऽभिवाद्योपाध्यायमुवाच। शान्तं पापम्। न खल्वहं निःस्नेहकठिनहृदयत्वादपरितप्यमानो गुरुदुःखैरेवमवस्थितः, किन्त्वसम्भवादुपाध्यायप्रदर्शितस्य क्रमस्य। नहि शक्यमदृश्यमानेन क्वचित्पापमाचरितुम्। कुतः। रहोऽनुपपत्तेः।

नास्ति लोके रहो नाम पापं कर्म प्रकुर्वतः।
अदृश्यानि हि पश्यन्ति ननु भूतानि मानुषान् ॥१३॥
कृतात्मानश्च मुनयो दिव्योन्मिषितचक्षुषः।
तानपश्यन् रहोमानी बालः पापे प्रवर्तते ॥ १४ ॥
अहं पुनर्न पश्यामि शून्यं क्वचन किञ्चन।
यत्राप्यन्यं न पश्यामि नन्वशून्यं मयैव तत् ॥ १५ ॥
परेण यच्च दृश्येत दुष्कृतं स्वयमेव वा।
सुदृष्टतरमेतत्स्याद् दृश्यते स्वयमेव यत् ॥ १६ ॥
स्वकार्यपर्याकुलमानसत्वात्पश्येन्न वान्यश्चरितं परस्य।
रागार्पितैकाग्रमतिः स्वयन्तु पापं प्रकुर्वन्नियमेन वेत्ति ॥ १७ ॥

तदनेन कारणेनाहं व्यवस्थित इति। अथ बोधिसत्त्वः समभिप्रसादितमनसमुपाध्यायमवेत्य पुनरुवाच--

न चात्र मे निश्चयमस्ति मानसं धनार्थमेवं प्रतरेद्[1] भवानपि।
अवेत्य को नाम गुणागुणान्तरं गुणोपमर्दं धनमूल्यतां नयेत् ॥ १८ ॥

स्वाभिप्रायं खलु नवेदयामि—

कपालमादाय विवर्णवाससा वरं द्विषद्वेश्मसमृद्धिरीक्षिता।
व्यतीत्य लज्जां न तु धर्मवैशसे सुरेन्द्रतार्थेऽप्युपसंहृतं मनः ॥१९॥

अथ तस्योपाध्यायः प्रहर्षविस्मयाक्षिप्तहृदय उत्थायासनात्सम्परिष्वज्यैनमुवाच। साधु साधु पुत्रक! साधु महाब्राह्मण! प्रतिरूपमेतत्ते प्रशमालङ्कृतस्यास्य मेधाविकस्य।

---

१. प्रतरेत् = प्रतारयेत्।

निमित्तमासाद्य यदेव किञ्चन
स्वधर्ममार्गं विसृजन्ति वालिशाः ।
तपःश्रुतज्ञानधनास्तु साधवो
न यान्ति कृच्छ्रे परमेऽपि विक्रियाम् ॥ २० ॥

त्वया कुलं सममलमभ्यलङ्कृतं समुद्यता नभ इव शारदेन्दुना ।
तवार्थवत्सुचरितविश्रुतं श्रुतं सुखोदयः सफलतया श्रमश्च मे ॥२१॥

तदेवमात्मलज्जयैव सत्पुरुषा नाचारवेलां लङ्घयन्तीति ह्रीवलेनार्येण भवितव्यम् ।

[ जातकमालायाः ]

---

## ५. प्रविवेकसुखरसज्ञानां विडम्बनेव विहिंसेव च कामाः प्रतिकूला भवन्ति ।

तद्यथानुश्रूयते । बोधिसत्त्वः किल कस्मिंश्चिन्महति गुणप्रकाशयशसि वाच्यदोषविरहिते ब्राह्मणकुले जन्मपरिग्रहं चकार । तस्य यत्र कनीयांसः षडपरे भ्रातरस्तदनुरूपगुणाः स्नेहबहुमानगुणान्नित्यानुगुणा बभूवुः, सप्तमी च भगिनि । स कृतश्रमः साङ्गेषु, समधिगतविद्यायशाः, सम्मतो जगति, दैवतवन्मातापितरौ परया भक्त्या परिचरन् आचार्य इव पितेव तान् भ्रातॄन्विद्यासु विनयकुशलो गृहमावसति स्म । स कालक्रमान्मातापित्रोः कालक्रियया संविग्नहृदयः, कृत्वा तयोः प्रेतकृत्यानि, व्यतीतेषु शोकमयेष्विव केषुचिदेव दिवसेषु, तान् भ्रातॄन् सन्निपात्यो[१]वाच ।

---

१. एकत्रीकृत्य ।

एष लोकस्य नियतः शोकातिविरसः क्रमः ।
सह स्थित्वापि सुचिरं मृत्युना यद्वियोज्यते ॥ १ ॥
तत्प्रव्रजितुमिच्छामि श्रेयः श्लाघ्येन वर्त्मना ।
पुरा मृत्युरिपुर्हन्ति गृहसंरक्तमेव माम् ॥ २ ॥

यतः सर्वानेव भवतः संबोधयामि । अस्त्यत्र ब्राह्मणकुले धर्मेण यथाधिगता विभवमात्रा । शक्यमनया वर्तितुम् । तत्सर्वैरेव भवद्भिः परस्परं स्नेहगौरवाभिमुखैः शीलसमुदाचारेष्वशिथिलादरैर्वेदाध्ययनपरैर्मित्रातिथिस्वजनप्रणयवत्सलैर्धर्म्मपरायणैर्भूत्वा सम्यग्गृहमध्यावस्तव्यम् ।

विनयश्लाघिभिर्नित्यं स्वाध्यायाध्ययनोद्यतैः ।
प्रदानाभिरतैः सम्यक्परिपाल्यो गृहाश्रमः ॥ ३ ॥
एवं हि वः स्याद्यशसः समृद्धिर्धर्मस्य चार्थस्य सुखास्पदस्य ।
सुखावगाहश्च परोऽपि लोकस्तदप्रमत्ता गृहमावसेत ॥ ४ ॥

अथास्य भ्रातरः प्रव्रज्यासंकीर्तनाद्वियोगाशङ्काव्यथितमनसः शोकाश्रुदुर्दिनमुखाः प्रणम्यैनमूचुः । नार्हत्यत्रभवान्पितृवियोगशोकशल्यव्रणमसंरूढमेव नो घट्टयितुमपरेण दुःखाभिनिपातक्षारेण ।

अद्यापि तावत्पितृशोकशल्यक्षतानि रोहन्ति न नो मनांसि ।
तत्साध्विमां संहर धीर बुद्धिं मा नः क्षते क्षारमिवोपहार्षीः ॥५॥
अथाक्षमं वेत्सि गृहानुरागं श्रेयःपथं वा वनवाससौख्यम् ।
अस्माननाथानपहाय गेहे कस्माद् वनं वाञ्छसि गन्तुमेकः ॥६॥

तद्यात्रभवतो गतिः सास्माकम् । वयमपि प्रव्रजाम इति ।

बोधिसत्त्व उवाच—

अनभ्यासाद्विवेकस्य कामरागानुवर्तिनः ।
प्रपातमिव मन्यन्ते प्रव्रज्यां प्रायशो जनाः ॥ ७ ॥

इति मया निगृह्य[1] नाभिहिताः स्थ प्रव्रज्याश्रयं प्रतिजानतापि

---

१. आत्मानमिति शेषः ।

गृहवनवासविशेषम् । तदेतच्चेदभिरुचितं भवतामेव प्रव्रजाम इति । ते सप्तापि भ्रातरो भगिन्यष्टमाः स्फीतं गृहविभवसारमश्रुमुखञ्च मित्रस्वजनबन्धुवर्गं विहाय तापसप्रव्रज्यया प्रव्रजिताः । तदनुरक्तहृदयश्चैनान् सहाय एको दासी दासश्चानुप्रव्रजिताः ।

तेऽन्यतरस्मिन् महत्यरण्यायतने ज्वलितमिव विकसितकमलवनशोभया विहसदिव च फुल्लकुमुदवनैः, अनिभृतमधुकरगणम् अमलनीलसलिलं महत्सरः संनिश्रित्य प्रविविक्तमनोज्ञासु च्छायाद्रुमसमुपगूढास्वसन्निकृष्ट-विनिविष्टासु पृथक् पृथक् पर्णशालासु व्रतनियमपरा ध्यानानुयुक्तमनसो विजह्रुः । पञ्चमे पञ्चमे दिवसे बोधिसत्त्वसमीपं धर्मश्रवणार्थमुपजग्मुः । स चैषां ध्यानोपदेशप्रवृत्तां कामादीनव[1]दर्शनीं संवेजनीयां प्रविवेकसंतोषवर्णबहुलां कुहना[2] लपनकौसीद्यादिदोषविगर्हणीमुपशमप्रसादपद्धतिं तां तां धर्म्यां कथां चकार । सा चैनान्दासी बहुमानानुरागवशा तथैव परिचचार । सा तस्मात्सरसो विसानुद्धृत्य महत्सु पद्मिनीपर्णेषु शुचौ तीरप्रदेशे समान्विन्यस्य च भागान् काष्ठसंघट्टनशब्देन कालं निवेद्यापक्रामति स्म । ततस्तेषामृषीणां कृतजपहोमविधीनां यथावृद्धमेकैकोऽभिगम्य ततो बिसभागमेकैकं यथाक्रममादाय स्वस्यां स्वस्यां पर्णशालायां विधिवत् परिभुज्य ध्यानाभियुक्तमतिर्विजहार । त एवं प्रवृत्ता नैव परस्परं ददृशुरन्यत्र धर्मश्रवणकालात् ।

तेषामेवंविधेन निरवद्येन शीलवृत्तसमुदाचारेण प्रविवेकाभिरत्या ध्यानप्रवणमानसतया च सर्वत्र यशः समुपश्रुत्य शक्रो देवानामिन्द्रस्तत्परीक्षानिमित्तं तत्राभिजगाम । तच्चैषां ध्यानाभिमुखत्वं कुकार्येष्वप्रसङ्गमनुत्कण्ठां प्रशमाभिरामं चावस्थानमवेत्य स्थिरतरगुणसम्भावनस्तत्परीक्षानिमित्तमवहितमना बभूव

१. आदीनवास्रवौ क्लेशे—इत्यमरः ।

२. कुहना लोभान्मिथ्येर्यापथकल्पना—इत्यमरः ।

अनुत्सुको वनान्तेषु वसञ्छमपरायणः ।
आरोपयति साधूनां गुणसम्भावनां हृदि ॥ ८ ॥

अथ द्विपकलभदशनपाण्डुकोमलानि समुद्धृत्य प्रक्षाल्य च बिसानि मरकतहरितप्रभेषु पद्मिनीपत्रेषु कमलदलकेशरोपहारालङ्कृतान्विरचय्य समान्भागान्काष्ठसंघट्टनशब्देन निवेद्य कालं तेषामृषीणामपसृतायां तस्यां दास्यां बोधिसत्त्वपरीक्षार्थं शक्रो देवानामिन्द्रः प्रथममेव बिसभागमन्तर्धापयामास ।

प्रवर्तने हि दुःखस्य तिरस्कारे सुखस्य च ।
धैर्यप्रयामः साधूनां विस्फुरन्निव गृह्यते ॥ ९ ॥

अथ बोधिसत्त्वोऽभिगतः प्रथमे बिसभागस्थाने बिसभागविरहितं पद्मिनीपत्रं परिव्याकुलीकृतोपहारमभिसमीक्ष्य गृहीतः केनापि मे बिसप्रत्यंश इत्यवधृतमतिरपेतचेतःसंक्षोभसंरम्भस्तत एव प्रतिनिवृत्य प्रविश्य पर्णशालायां यथोचितं ध्यानविधिमारेभे । वैमनस्यपरिहारार्थं चेतरेषामृषीणां तमर्थं न निवेदयामास । इतरे त्वस्य भ्रातरो नूनमनेन गृहीतः प्रत्यंश इति मन्यमाना यथोचितानेव स्वान्स्वाननुक्रमेण बिसभागानादाय यथास्वं पर्णशालासु परिभुज्य ध्यायन्ति स्म । एवं द्वितीये तृतीये चतुर्थे पञ्चमे च दिवसे शक्रस्तस्य तं बिसप्रत्यंशमुपनिदधे । बोधिसत्त्वोऽपि च महासत्त्वस्तथैव निःसंक्षोभप्रशान्तचित्तो बभूव ।

मनःसंक्षोभ एवेष्टो मृत्युर्नायुःक्षयः सताम्[१] ।
जीवितार्थेऽपि नायान्ति मनःक्षोभमतो बुधाः ॥ १० ॥

अथापराह्णसमये धर्मश्रवणार्थमृषयस्ते यथोचितं बोधिसत्त्वस्य पर्णशालां समभिगता ददृशुश्चैनं कृशतरशरीरं परिक्षामकपोलनयनं परिम्लानवदनशोभमसम्पूर्णस्वरगाम्भीर्यं परिक्षीणमप्यपरिक्षीणधैर्यप्रशमगुणमभिनवेन्दुप्रियदर्शनमुपेत्योपचारपुरःसरं ससम्भ्रमाः

---

१. सतां मनः संक्षोभ एव मृत्युरिष्टः न आयुःक्षय इत्यन्वयः ।

किमिदमिति कार्श्यनिमित्तमेनमपृच्छन् । तेभ्यो बोधिसत्त्वस्तमर्थं यथानुभूतं निवेदयामास । अथ ते तापसाः परस्परमीदृशमनाचारम-सम्भावयन्तस्तत्पीडया च समुपजातसंवेगाः कष्टं कष्टमित्युक्त्वा व्रीडावनतवदनाः समतिष्ठन्त शक्रप्रभावाच्च समावृतज्ञानगतिविषयाः कुत इदमिति न निश्चयमुपजग्मुः । अथ बोधिसत्त्वस्यानुजो भ्राता स्वमावेगमात्मविशुद्धिञ्च प्रदर्शयञ्छपथातिशयमिमं चकार—

समृद्धिचिह्नाभरणं स गेहं प्राप्नोतु भार्याञ्च मनोऽभिरामाम् ।
समग्रतामेतु च पुत्रपौत्रैर्बिसानि ते ब्राह्मण ! यो ह्यहार्षीत् ॥ ११ ॥

अपर उवाच—

मालाः स्रजश्चन्दनमंशुकानि बिभ्रद्विभूषाश्च सुताभिमृष्टाः ।
कामेषु तीव्रां स करोत्वपेक्षां बिसान्यहार्षीद् द्विजमुख्य ! यस्ते ॥ १२ ॥

अपर उवाच—

कृष्याश्रयावाप्तधनः कुटुम्बी प्रमोदमानस्तनयप्रलापैः ।
वयोऽप्यपश्यन् रमतां स गेहे बिसानि यस्ते सकृदप्यहार्षीत् ॥ १३ ॥

अपर उवाच ।

नराधिपैर्भृत्यविनीतचेष्टैरभ्यर्च्यमानो नतलोलचूडैः ।
कृत्स्नां महीं पातु स राजवृत्त्या लोभादहार्षीत्तव यो बिसानि ॥ १४ ॥

अपर उवाच—

पुरोहितः सोऽस्तु नराधिपस्य मन्त्रादिना स्वस्त्ययनेन युक्तः ।
सत्कारमाप्नोतु तथा च राज्ञस्तवापि यो नाम बिसान्यहार्षीत् ॥ १५ ॥

अपर उवाच—

अध्यापकं सम्यगधीतवेदं तपस्विसम्भावनया महत्या ।
अर्चन्तु तं जानपदाः समेत्य बिसेषु लुब्धो न गुणेषु यस्ते ॥ १६ ॥

सहाय उवाच—

चतुःशतं ग्रामवरं समृद्धं लब्ध्वा नरेन्द्रादुपयातु भोक्तुम् ।
अवीतरागो मरणं स चैतु लोभं बिसेष्वप्यजयन्न यस्ते ॥ १७ ॥

दास उवाच—

स ग्रामणीरस्तु सहायमध्ये स्त्रीनृत्तगीतैरुपलाप्यमानः ।
मा राजतश्च व्यसनानि लब्ध-बिसार्थमात्मार्थमशीशमद्यः ॥ १८ ॥

भामिन्युवाच—

विद्योतमानां वपुषा श्रिया च पत्नीत्वमानीय नराधिपस्ताम् ।
योषित्सहस्राग्रसरीं करोतु या त्वद्विधस्यापि बिसान्यहार्षीत् ॥ १९ ॥

दास्युवाच—

एकाकिनी सा समतीत्य साधून्स्वादूपभोगे प्रणयं करोतु ।
सत्कारलब्धा मुदमुद्वहन्ती बिसान्यपश्यत्तव या न धर्मम् ॥ २० ॥

अथ तत्र धर्मश्रवणार्थं समागतास्तद्वनाध्युषिता यक्षद्विरदवानरास्तां कथामुपश्रुत्य परां व्रीडां संवेगञ्चोपजग्मुः ।

अथ यक्ष आत्मविशुद्धिप्रदर्शनार्थमिति शपथमेषां पुरतश्चकार—

आवासिकः सोऽस्तु महाविहारे
कचङ्गलायां नवकर्मिकश्च ।
आलोकसन्धिं दिवसैः करोतु
यस्त्वय्यपि प्रस्खलितो बिसार्थम्[1] ॥२१॥

हस्त्युवाच—

षड्भिर्दृढैः पाशशतैः स बन्धं प्राप्नोतु रम्याच्च वनाज्जनान्तम् ।
तीक्ष्णाङ्कुशाकर्षणजा रुजश्च यस्ते मुनिश्रेष्ठ बिसान्यहार्षीत् ॥ २२ ॥

वानर उवाच—

स पुष्पमाली त्रपुघृष्टकण्ठो यष्ट्या हतः सर्पमुखं परैतु ।
वैकक्ष्यबद्धश्च वसेद् गृहेषु लौल्यादहार्षीत्तव यो बिसानि ॥ २३ ॥

---

१. काश्यपबुद्धसमये महाविहारे वसन् कचङ्गलानामकनगर्यां नवकर्मिकः सन्नेको देवपुत्रः प्रतिदिवसमेकैकगवाक्षनिर्माणे विवशः प्रवृत्तोऽभूदिति कथात्रानुसन्धेया । आलोकसन्धिं गवाक्षमित्यर्थः ।

अथ बोधिसत्त्वस्तान् सर्वानेवानुनयविनीताक्षरं शान्तिगाम्भीर्यसूचकमित्युवाच—

यो नष्टमित्याह न चास्य नष्टमिष्टान्स कामानधिगम्य कामम् ।
उपैतु गेहाश्रित एव मृत्युं भवत्सु यः शङ्कत ईदृशं वा ॥ २४॥

अथ शक्रो देवेन्द्रस्तेन तेषां कामोपभोगप्रातिकूल्यसूचकेन शपथातिशयेन समुत्पादितविस्मयबहुमानः स्वेनैव वपुषाभिज्वलता तानृषीनभिगम्य सामर्षवदुवाच । मा तावद्भोः !

यत्प्राप्तिपर्युत्सुकमानसानां सुखार्थिनां नैति मनांसि निद्रा ।
यान्प्राप्तुमिच्छन्ति तपःश्रमैश्च तान्केन कामानिति कुत्सयध्वे ॥ २५ ॥

बोधिसत्त्व उवाच । अनन्तादीनवा मार्ष ! कामाः । संक्षेपतस्तु श्रूयतां यदभिसमीक्ष्य कामान्न प्रशंसन्ति मुनयः ।

कामेषु बन्धमुपयाति वधञ्च लोकः
शोकं क्लमं भयमनेकविधञ्च दुःखम् ।
कामार्थमेव च महीपतयः पतन्ति
धर्मोपमर्दरभसा नरकं परत्र ॥ २६ ॥

यत्सौहृदानि सहसा विरसीभवन्ति
यन्नीतिशाठ्यमलिनेन पथा प्रयान्ति ।
कीर्त्या वियोगमसुखैः परतश्च योगं
यत् प्राप्नुवन्ति ननु कारणमत्र कामाः ॥ २७ ॥

इति हीनविमध्यमोत्तमानामिह चामुत्र च यद् वधाय कामाः ।
कुपितान्भुजगानिवात्मकामा मुनयस्तानिति शक्र नाश्रयन्ते ॥ २८ ॥

अथ शक्रो देवानामिन्द्रस्तस्य तद्वचनं युक्तमित्यभिनन्द्य तेन चैतेषामृषीणां माहात्म्येनाभिप्रसादितमनास्तेभ्यः स्वमपराधमाविश्चकार ।

गुणसम्भावनाव्यक्तिर्यत् परीक्ष्योपलभ्यते ।
मया विनिहितान्यस्मात्प्रसीदतार्थं बिसानि वः ॥ २९ ॥

95942

तत्सनाथं जगद्दिष्ट्या मुनिभिस्तथ्यकीर्तिभिः।
विशुद्धिः स्थिरचारित्रे तदेतानि बिसानि ते ॥ ३० ॥

इत्युक्त्वा तानि बिसानि बोधिसत्त्वस्य समुपजहार। अथ बोधिसत्त्वस्तदस्यासमुदाचारधार्ष्ट्यं तेजस्विनिभृतेन वचसा प्रत्यादिदेश।

न बान्धवा नैव वयं सहाया न ते नटा नापि विडम्बकाः स्मः।
कस्मिन्नवष्टभ्य न देवराज! क्रीडापथेनैवमृषीनुपैषि ॥ ३१ ॥

इत्युक्ते शक्रो देवेन्द्रः ससम्भ्रमापास्तकुण्डलकिरीटविद्युदुद्भासुरवदनः सबहुमानमभिप्रणम्यैनं क्षमयामास।

उक्तप्रयोजनमिदं चापलं मम निर्मम!।
पितेवाचार्य इव च क्षन्तुमर्हति तद् भवान् ॥ ३२ ॥
निमीलितज्ञानविलोचनानां स्वभाव एष स्खलितुं समेऽपि।
क्षमाश्च तत्रात्मवतां प्रपत्तुमतोऽप्यदश्चेतसि मा स्म कार्षीः ॥ ३३ ॥

इति क्षमयित्वा शक्रस्तत्रैवान्तर्दधे।

तदेवं प्रविवेकसुखरसज्ञानां विडम्बनेव विहिंसेव च कामाः प्रतिकूला भवन्ति ॥ [ जातकमालायाः ]

---

# ६—प्राचीनपत्रलेखनपद्धतिः

## ( १ )

स्वस्ति। महेन्द्रद्वीपात् परशुरामो लङ्कायाममात्यं माल्यवन्तमभ्यर्हयति। विदितमेतद्वो यदस्माभिर्दण्डकारण्यतीर्थोपासकेभ्यस्तपोधनेभ्यः प्रतिज्ञातमभयम्। तत्र विराधदनुकबन्धप्रभृतयः केऽप्यतिचरन्तीति श्रुतम्। तत्तान्प्रतिषिध्य सद्वृत्तिमस्मद्धितां च माहेश्वरप्रीतिमनुरुध्यन्तां भवन्तः।

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥

[ महावीरचरितस्य द्वितीयाङ्कात् ]

( २ )

स्वस्ति । सुगृहीतनामधेयस्य देवस्य चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणामितोऽपक्रम्य वध्यमलयकेतुमाश्रितानां प्रमाणलेख्यपत्रमिदम् । तत्र प्रथममेव तावद् गजाध्यक्षो भद्रभटः, अश्वाध्यक्षः पुरुषदत्तः, महाप्रतीहारस्य चन्द्रभानोर्भागिनेयो हिङ्गुरातः, देवस्य स्वजनसम्बन्धी महाराजो बलगुप्तः, देवस्यैव कुमारसेवको राजसेनः, सेनापतेः सिंहबलस्य कनीयान्भ्राता भागुरायणः, मालवराजपुत्रो लोहिताक्षः, क्षत्रगणमुख्यो विजयवर्मेति । वयं देवस्य कार्येऽवहिताः स्म इति । [ मुद्राराक्षसस्य तृतीयाङ्कात् ]

( ३ )

स्वस्ति । यथास्थाने कुतोऽपि कोऽपि कमपि पुरुषविशेषमवगमयति । अस्मत्प्रतिपक्षं निराकृत्य दर्शिता सत्यवता सत्यवादिता । साम्प्रतमेतेषामपि प्रथममुपन्यस्तसन्धीनामस्मत्सुहृदां पूर्वप्रतिज्ञातसन्धिपरिपणनप्रोत्साहनेन सत्यसन्धः प्रीतिमुत्पादयितुमर्हति । एते ह्येवमुपगृहीताः सन्तः स्वाश्रयविनाशेनोपकारिणमाराधयिष्यन्ति । अविस्मृतमेतत्सत्यवतः स्मारयामः । एतेषां मध्ये केचिदरेः कोषदण्डाभ्यामर्थिनः केचिद्विषयेणेति । अलङ्कारत्रयं च सत्यवता यदनुप्रेषितं तदुपगतम् । मयापि लेखस्याशून्यार्थं किञ्चिदनुप्रेषितं तदुपगमनीयम् । वाचिकं चाप्ततमात् सिद्धार्थकाच्छ्रोतव्यमिति ।

[ मुद्राराक्षसस्य पञ्चमाङ्कात् ]

( ४ )

स्वस्ति । यज्ञशरणात्सेनापतिः पुष्यमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ राज-

सूययज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः स सिन्धोर्दक्षिणे रोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः। तत उभयोः सेनयोर्महानासीत् सम्मर्दः।

ततः परान्पराजित्य वसुमित्रेण धन्विना।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः॥

सोऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये। तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति॥

[ मालविकाग्निमित्रस्य पञ्चमाङ्कात् ]

( ५ )

स्वस्ति। श्रीवाराणस्यां महाराजाधिराजपरमेश्वरमहामोहपादान् श्रीपुरुषोत्तमायतनात् मदमानौ साष्टाङ्गं प्रणम्य सविनयं विज्ञापयतो यथा। भद्रमव्याहतम्। अन्यत्। देव! पुनर्देवी शान्तिर्मात्रा श्रद्धया सह विवेकस्य दूत्यमापन्ना विवेकसङ्गमाय देवीमुपनिषदमहर्निशं प्रबोधयति। अपि च। कामसहचरोऽधर्मोऽपि वैराग्यादिभिरुपप्लुत इव लक्ष्यते। यतः कामाद्विच्छिद्य कुतश्चिन्निगूढश्चरति। तदेवं ज्ञात्वा देवः प्रमाणमिति॥

[ प्रबोधचन्द्रोदयस्य द्वितीयाङ्कात् ]

( ६ )

स्वस्ति। श्रीमहाराजदेवपालदेवः सङ्ग्रामसिंहमण्डलेश्वरं समादिशति। अस्माभिर्निजविजयश्रीवशीकरणकारणं त्वत्कृते प्रहितमिदमश्वरत्नम्। त्वया तु सततमत्रैव कटके स्थातव्यम्। यदा गुर्जरावनिं प्रविशतोऽस्य नृपस्य वयमाकस्मिकागमनेन समरसंरम्भं सम्भावयामः तदा निजपितृवधभववैरार्णवोत्तरणाय तरीकरणीयः करवाल इति॥

[ हम्मीरमदमर्दनस्य द्वितीयाङ्कात् ]

( ७ )

स्वस्ति । श्रीजनमनोवृत्तेः श्रीमोहमहाराजो गुर्जरराजराजधान्यां कल्याणमित्रं कलिकन्दलमतिनिबिडमालिङ्ग्य समादिशति यथा। क्षेमोऽस्माकम् । भवतापि निखिलप्रवृत्तिगर्भिणी निजकौशलकथातिलकिता निरन्तरमस्मन्मनःप्रमोदाय प्रहेया विज्ञप्तिः । तथा विपक्षपरिजनोपजापकर्मणि नित्यमवहितेन स्थातव्यम् । यश्च त्वत्पार्श्वे मिथ्यात्वराशिनामा तापसच्छद्मा रसप्रदश्चिरात्प्रहितोऽस्ति स यथाकालं प्रस्तुतप्रयोजने व्यापारयितव्यः । ये च चत्वारः कोपगर्वच्छद्मलौल्यनामानस्तीदृशास्त्वन्निकटे प्रहिताः सन्ति तेऽपि न चिरादधिकृतकार्ये नियोजयितव्याः । अत्रार्थे भवन्तं त्वरयितुं संस्कारको नाम लेखहारकः प्रहितोऽस्तीति ॥

[ मोहपराजयस्य चतुर्थाङ्कात् ]

( ८ )

स्वस्ति । उज्जयिनीतः सकलराजन्यशिखण्डशेखरीकृतचरणारविन्दः परममाहेश्वरो महाराजाधिराजो देवस्तारापीडः सर्वसम्पदामायतनं चन्द्रापीडमुदञ्चच्चारुचूडामणिमरीचिचक्रचुम्बिन्युत्तमाङ्गे चुम्बन्नन्दयति । कुशलिन्यः प्रजाः । किन्तु कियानपि कालो भवतोऽदृष्टस्य । बलवदुत्कण्ठितं नो हृदयम् । देवी च सहान्तःपुरैर्ग्लानिमुपनीता । अतो लेखवाचनविरतिरेव प्रयाणकालतां कल्याणिना नेतव्येति ॥

[ कादम्बर्याः । ]

——

# ७—महाराजाधिराजश्रीहर्षस्य ताम्रपत्रलेखः

ओं स्वस्ति । महानौहस्त्यश्वजयस्कन्धावाराच्छ्रीव*र्धमानकोटया* महाराजश्रीनरवर्धनस्तस्य पुत्रस्तत्पादानुध्यातः श्रीवज्रिणीदेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीराज्यवर्धनस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदप्सरोदेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीमदादित्यवर्धनस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमहासेनगुप्तादेव्यामुत्पन्नश्चतुस्समुद्रातिक्रान्तकीर्तिः प्रतापानुरागोपनतान्यराजो वर्णाश्रमव्यवस्थापनप्रवृत्तचक्र एकचक्ररथ[१] इव प्रजानामार्तिहरः परमादित्यभक्तः परमभट्टारकमहाराजाधिराजश्रीप्रभाकरवर्धनस्तस्य पुत्रस्तत्पादानुध्यातः स्मितयशःप्रतानविच्छुरितसकलभुवनमण्डलः परिगृहीतधनदवरुणेन्द्रप्रभृतिलोकपालतेजाः सत्पथोपार्जितानेकद्रविणभूमिप्रदानसंप्रीणितार्थिहृदयोऽतिशयितपूर्वराजचरितो देव्याममलयशोमत्यां श्रीयशोमत्यामुत्पन्नः परमसौगतः सुगत इव परहितैकरतः परमभट्टारकमहाराजाधिराजश्रीराज्यवर्धनः ।

राजानो युधि दुष्टवाजिन इव श्रीदेवगुप्तादयः
कृत्वा येन कशाप्रहारविमुखाः सर्वे समं संयताः ।
उत्खाय द्विषतो विजित्य वसुधां कृत्वा प्रजानां प्रियं
प्राणानुज्झितवानरातिभवने सत्यानुरोधेन यः ॥ १ ॥

तस्यानुजस्तत्पादानुध्यातः परममाहेश्वरो महेश्वर इव सर्वसत्त्वानुकम्पी परमभट्टारकमहाराजाधिराजश्रीहर्षः *अहिच्छत्राभुक्तावङ्गदीयवैषयिकपश्चिमपथक*[२] *सम्बद्धमर्कटसागरे* समुपगतान्महासामन्तमहाराज-

---

१. एकचक्ररथः = सूर्यः ।

२. भुक्ति, विषय, पथक—इत्येते शब्दाः देशस्य विभिन्नविभागद्योतकाः क्रमेण 'जिला', 'तहसील', 'तालुका' समानार्थका भवेयुरिति प्रतिभाति ।

दौस्साधसाधनिकप्रमातारराजस्थानीयकुमारामात्योपरिकविषयपतिभटचाटसेवकादीन्[1] प्रतिवासिजानपदांश्च समाज्ञापयति—

विदितमस्तु यथायमुपरिलिखितग्रामः स्वसीमापर्यन्तः सोद्रङ्ग[2] सर्वराजकुलाभाव्यप्रत्याय[3]समेतः सर्वपरिहृतपरिहारो[4] विषयादुद्धृतपिण्डः[5] पुत्रपौत्रानुगश्चन्द्रार्कक्षितिसमकालीनो भूमिच्छिद्रन्यायेन मया पितुः परमभट्टारकमहाराजाधिराजश्रीप्रभाकरवर्धनदेवस्य मातुर्भट्टारिकामहादेवीराज्ञीश्रीयशोमतीदेव्या ज्येष्ठभ्रातृपरमभट्टारकमहाराजाधिराजश्रीराज्यवर्धनदेवपादानां च पुण्ययशोऽभिवृद्धये भरद्वाजसगोत्रबह्वृचच्छन्दोगसब्रह्मचारिभट्टबालचन्द्रभद्रस्वामिभ्यां प्रतिग्रहधर्मेणाग्रहारत्वेन[6] प्रतिपादितो विदित्वा भवद्भिः समनुमन्तव्यः प्रतिवासिजानपदैरप्याज्ञाश्रवणविधेयैर्भूत्वा यथासमुचिततुल्यमेयभागभोगकरहिरण्यादिप्रत्याया एतयोरेवोपनेयाः सेवोपस्थानं च करणीयमित्यपि च

अस्मत्कुलक्रममुदारमुदाहरद्भि-
र्न्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनञ्च ॥ १ ॥

---

१. महासामन्त, महाराज, दौःसाधसाधनिक, प्रमातार, राजस्थानीय, कुमारामात्य, उपरिक, विषयपति, भट, चाट, सेवक—एते सामन्तविशेषाणां, विभिन्नाधिकारिणां, विभिन्नकार्यकारिणां सेवकानां च उपाधयः ।

२. राजार्थं ग्रहीतव्यधान्यादिसमेतः, ग्रामवसतिसमेत इत्यर्थो वा ।

३. य आया राजानं नोपगच्छन्ति ते ।

४. परिहारः=राजकरः ।

५. विषयाख्याद्देशविभागात्पृथक्कृत इत्यर्थः ।

६. अग्रहारः—क्षेत्रोत्पन्नशस्यादुद्धृत्य ब्राह्मणोद्देशेन स्थाप्यं धान्यादि । गुरुकुलादावृत्तब्रह्मचारिणे देयं क्षेत्रादि, ग्रामभेदश्च । इति वाचस्पत्यबृहदभिधाने ।

कर्मणा मनसा वाचा कर्तव्यं प्राणिभिर्हितम् ।
हर्षेणैतत्समाख्यातं धर्मार्जनमनुत्तमम् ॥ २ ॥

दूतकोऽत्र महाप्रमातारमहासामन्तश्रीस्कन्दगुप्तः । महाक्षपटलाधिकरणाधिकृत[1] महासामन्तमहाराजभानुसमादेशादुत्कीर्णमीश्वरेणेदमिति । संवत् २०२ कार्तिक वदि १ । स्वहस्तो मम महाराजाधिराजश्रीहर्षस्य ।

[ Banskherā Copper-plate Inscription of Harsha, of Harsha Saṃvat 22 (628 A.D.) (Epigraphia Indica, Vol- IV, p. 208. ]

---

## ८—कोसलधिपतेस्तीवरदेवस्य ताम्रपत्रलेखः

श्रीमत्तीवरदेवस्य कोसलाधिपतेरिदम् ।
शासनं धर्मवृद्ध्यर्थं स्थिरमाचन्द्रतारकम् ॥ १ ॥
जयति जगत्त्रयतिलकः क्षितिभृत्कुलभवनमङ्गलसूत्रः ।
श्रीमत्तीवरदेवो धौरेयः सकलपुण्यकृताम् ॥ २ ॥

स्वस्ति श्रीपुरात्समधिगतपञ्चमहाशब्दानेकनतनृपतिकिरीटकोटिघृष्टचरणनखदर्पणोद्भासितोऽपि कण्ठदुन्मुख(?)प्रकटरिपुराजलक्ष्मीकेशपाशाकर्षणदुर्ललितपाणिपल्लवः, निशितनिस्त्रिंशघनघातपातितारिद्विरदकुम्भमण्डलगलद्बहलशोणितसदासिक्तमुक्ताफलप्रकरमण्डितरणाङ्गणविविधरत्नसम्भारलाभलोभविजृम्भमाणारिक्षारवारिबाडवानलः, चन्द्रोदय इवाकृतकरोद्वेगः, क्षीरोद इवाविर्भूतानेकातिशायिरत्नसम्पत्, गरुत्मानिव भुजङ्गोद्धार[2]चतुरः, परामृष्टशत्रुकलत्रनेत्राञ्जन-

---

१. अक्षपटल इति राज्ञोऽधिकरणविशेषस्य संज्ञा ।
२. उद्धारोऽपनयनम्, विनाश इति यावत् ।

कोमलकपोलकुङ्कुमपत्रभङ्गत् (? भङ्गः), शिष्टाचारव्यवस्थापरिपालनैकदत्तचित्तः। अपि च प्राक्तने तपसि यशसि रहसि चेतसि चक्षुषि वपुषि च पूजितो जनेनाक्लिष्टतया नितान्तमवितृप्तः[1], गूढः गाढस्वच्छप्रसन्नवदनेन चालङ्कृतः, स्वामिभवनेऽप्यबहुलपनोऽनुज्झितः, कुतृष्णोऽपि नितान्तत्यागी, रिपुजनप्रचण्डोऽपि सौम्यदर्शनः भूतिविभूषणोऽप्यपरुषः स्वभावतः, किञ्चासन्तुष्टो धर्मार्जने न सम्पल्लाभे, स्वल्पक्रोधे न प्रभावे; लुब्धो यशसि न परवित्तापहारे, शक्लः (? सक्तः) सुभाषितेषु न कामिनीक्रीडासु, प्रतापानलदग्धाशेषरिपुकुलतूलराशिस्तुहिनशिलाशैलधवलयशोराशिप्रकाशितदिगन्तः, कान्तः प्रकृत्या, श्रीमदिन्द्रबलसूनोरलङ्कृतपाण्डुवंशस्य श्रीनन्नदेवस्य तनयप्राप्तः, स्वपुण्यसम्भारप्रशमिताशेषजगदुपद्रवः, स्वप्रज्ञाशुचि(? सूचि)-समुद्धृताखिलकण्टकः, परमवैष्णवो मातापितृपादानुध्यातः श्रीमहाशिवतीवरराजः कुशली *पेण्ठामभुक्तोर्यापिम्परिपद्रके* ब्राह्मणान्सम्पूज्य प्रतिवासिनः समाज्ञापयति--

विदितमस्तु भवतां यथास्माभिरयं ग्रामो यावद्रविशशिताराकिरणप्रतिहतघोरान्धकारं जगदवतिष्ठते तावदुपभोग्यः सनिधिः सोपनिधिरचाटभटप्रवेशो दारद्रणकसर्वकरादानसमेतो मातापित्रोरात्मनश्च पुण्याभिवृद्धये भारद्वाजसगोत्रवाजसनेयमाध्यन्दिनभट्टगौरीदत्तपुत्रभट्टभवदत्तभट्टहरदत्ताभ्यां ज्येष्ठद्वादश्यामुदकपूर्वं प्रतिपादित इत्यवगम्य भवद्भिर्यथोचितमाभ्यां भोगभागमुपनयद्भिः सुखं प्रतिवस्तव्यमिति। भाविनश्च भूमिपालानुद्दिश्येदमभिधीयते।

भूमिप्रदा दिवि ललन्ति, पतन्ति हन्त
हृत्वा महीं नृपतयो नरके नृशंसाः।
एतद् द्वयं परिकलय्य चलां च लक्ष्मी-
मायुस्तथा कुरुत यद्भवतामभीष्टम्॥ १॥

---

१. अवितृप्तः=न मदोद्धतः।

रक्षापालनयोस्तावत्फलं सुगति दुर्गति ।
को नाम स्वर्गमुत्सृज्य नरकं प्रतिपद्यते ॥ २ ॥
अग्नेरपत्यं प्रथमं सुवर्णं
भूर्वैष्णवी सूर्यसुताश्च गावः ।
दत्तास्त्रयस्तेन भवन्ति लोका
यः काञ्चनं गां च महीं च दद्यात् ॥ ३ ॥
प्रवर्धमानविजयराज्यसंवत्सरे ७ कार्तिकदिवसेऽष्टमे ८।

[ Rāgim Copoer:plate Inscription of Tīvaradeva of the 7th year of his reign (of the last quarter of the 8th century A. D. Fleets Gupta Inscription No. 81. ]

---

## ६—श्रीशङ्कराचार्यः

नमामि शङ्कराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि सर्वज्ञोऽहं सदास्म्यलम् ॥

अनन्तानन्दगिरिरहमप्रतिहताज्ञस्य भगवतः शिष्यः स्वगुरोरवतारप्रयोजनं वर्णयामि ।

अथ सर्गादौ भगवांश्चतुर्मुखः स्वमुखबाहूरुपादेभ्यः किल ब्रह्मक्षत्रवैश्यशूद्रान् निर्माय संस्थानचक्राधिदेवशिवविष्णुब्रह्मगणपत्युपासकान् कृत्वा जातिधर्मपरिपालनतपोविधिमाकल्पपर्य्यन्तमाचकार । ततः प्रवृत्तेषु कृतादियुगेषु ब्राह्मणादयः सत्यधर्म्मतपोविद्यादिपरिशोभितशीलाः सर्व्वदेवमयः स्वजातिदेव इति सम्यग्विचारसम्पन्नाः स्वैशैक्यनिर्जितभिदाद्यन्तरायाः सदाद्यर्थपर्यालोचनतत्परा बभूवुः ।

पूज्येषु सेवका नीचाः पुण्यमार्गक्रियानुगाः ।
तत्तदेव पदं चापुर्यथाजातिकुलस्थिति ॥

विप्राणां दैवतं शम्भुः क्षत्रियाणान्तु माधवः ।
वैश्यानान्तु भवेद् ब्रह्मा शूद्राणां गणनायकः ॥

इति मनुस्मृतेः। ब्राह्मणेन शिवः शिवतत्त्वविदा सेवितव्यः, क्षत्रियादिना तु तत्तत्तत्त्वविदेति निरवद्यं मनुस्मृतेरितरथा कर्त्तुमशक्यत्वात्। परन्तु क्षीणे पुण्ये लुप्तधर्मतया क्लेशभाजि कलियुगे परस्परारागादिग्रस्तेषु ब्राह्मणादिषु सत्यज्ञानशून्येषु निगमाचारपरित्यक्तेषु लोकप्रवृत्तिः काचिदासीत्।

केचिच्छम्भुरताः परे हरिरता वाणीरताः केचन
केचिद् वह्निरता दिवाकररता विघ्नेशभक्ताः परे ।
केचिच्छक्तिरताश्च भैरवरताः केचित्तु मल्लारिगा
विष्वक्सेनरताः परे मदनगाः केचिद्भजन्त्यर्थदम् ॥

केचित्सुरेशमपरे यममप्पतिञ्च
वायुं महीमुदकमम्बरमादिमूर्तिम् ।
केचिद्द्विराजमपरे त्रिगुणान् यथेष्टं
केचित् प्रधानमपरेऽणुमुपात्तकर्म्म ॥

केचिच्चन्द्रपराः परे कुजपराः केचितु सौम्योत्सुकाः
केचिज्जीवपराः परे भृगुपराः केचित्तु मन्दाश्रिताः ।
केचित् कालपराः परे पितृपराः केचित्तु नागेशगाः
केचित्तार्क्ष्यपराश्च सिद्धनिचयं सेवन्ति(?) केचिद्धिया ॥

केचिद् गन्धर्वसाध्यादीन् भूतवेतालगाः परे ।
एवं नानाप्रभेदानां नृणां वृत्तिर्यथेप्सिता ॥

केचित् स्ववृत्तिं वेदार्थैः प्रतिपाद्यां समूचिरे ।
केचिद्धर्म्मैरियं मुक्तिरिति जल्पं समास्थिताः ॥

अन्योन्यमत्सरग्रस्ताः परस्परजयैषिणः ।
निजेच्छाकृतिमङ्गेषु धारयन्ति रुषान्विताः ॥

कर्म्मभ्रष्टान्परानन्ददूरान् मूढान्नराधमान् ।
तान् दृष्ट्वा नारदः शीघ्रमाप ब्रह्मपदान्तिकम् ॥
भो तात ! नूतनमभूज्जगदेतदर्वा-
ग्वाक्चित्रयुक्तिपरिकल्पितकर्मशीलम् ।
कालादिजातनिगमार्थपरम्परा स्या-
द्व्यर्था तदा यदि भवन्मतमप्रमाणम् ॥

भवद्भिः पूर्वमिदमुक्तम्—सदेव सौम्येदमग्र आसीत् । ब्रह्म वा इदमग्र आसीत् । आत्मा वा इदमेक एवाग्र आसीत् । वासुदेवो वा इदमग्र आसीत् ।

यदाऽतमस्तन्न दिवा न रात्रि-
र्नसन्न चासंश्छिव (?-सच् छिव) एव केवलः ।
तदक्षरं तत्सवितुर्वरेण्यं
प्रज्ञा च तस्मात्प्रसृता पुराणी ॥

स्मृतिश्च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ इति ।
तत्प्रीतये कर्म करोतु विप्रः क्षत्रस्तु भूमिं महसा भुनक्तु ।
वैश्यो ददात्वर्थमथास्य तुष्ट्यै शूद्रः करोत्वग्रजपूजनं हि ॥ इति ।

तस्माद् द्विजातीनामेकमेव दैवतं सदादिशब्दवाच्यम् । तस्य गुणातीतवृत्तेर्लिङ्गाभावात् तत्सत्त्वे मानाभावाच्च निरुपाधिकं ब्रह्मैव मुमुक्षुभिरुपासनीयमिति ।

एवं नारदवचनं निशम्य ब्रह्मापि चिरं ध्यात्वा स्वलोकात् पुत्रमित्रभक्तादियुक्तः शिवलोकं प्राविशत् । तत्र मध्याह्नकोटिसूर्य्यकोटितेजसं कोटिहिमांशुशीतलं पञ्चवक्त्रं चन्द्रमौलिं विद्युत्पिङ्गजटाधरं पार्वतीवामार्द्धशरीरिणं सर्वेश्वरं महादेवं दृष्ट्वा दण्डवत् सगणः प्रणनाम । उत्थाय सम्पुटितहस्तयुगः सगणो ब्रह्मा किलोवाच । भो महादेव ! सर्वज्ञ सर्वलोकेश सर्वसाक्षिन् सर्वमय सर्वकारण सर्वात्मक सर्वातीत

सर्वदेववन्दितचरणारविन्द, प्रणवरूप, प्रणवातीत, प्रणवगोचर, कालरूप कालातीत, कमनीयविग्रह, कन्दर्पहर, कामितार्थप्रद, करुणाकर, श्रीपरमेश्वर ! सावधानेन मदीयां विज्ञापनामवधारय। तुरीयप्रणवातीताद् ब्रह्मणः सत्यज्ञानानन्दलक्षणाद् भगवतः किलार्द्धबिन्दुरूपा प्रकृतिरुत्पन्ना । तवैतस्याश्चन्द्रचन्द्रिकान्यायेन शुद्धाद्वैता सा त्वमेवेति सिद्धम् । तत्सकाशादकारः शुक्लः सत्त्वसम्पन्नः, तस्मादुकारः कृष्णः तामसगुणप्रधान उत्पन्नः। तस्मान्मकारः शोणवर्णः रजःसम्पन्नोऽहम् । भवदाज्ञया जरायुजादिचतुर्विधजङ्गमान् पर्वतादीन् स्थावरांश्च सृष्ट्वा समुद्रद्वीपगिरिनदीवनपुरग्रामगोतुरगमर्त्यकरिसिंहव्याघ्रभल्लूकादीन् ब्रह्मक्षत्रियवैश्यशूद्रजातीन् प्राणिनश्च तत्तद्धर्मसमाचारशीलान् कृत्वा भवच्चरणारविन्दध्यानासक्ते मयि सत्यलोकाश्रिते भूलोके कश्चिदुपद्रवः समुत्थितोऽभवत् । तदवधारय—

श्रुत्याचारं परित्यज्य मिथ्याचारं समाश्रिताः।
विप्रादयो विचित्रैस्तु लिङ्गैः सन्तप्तदेहिनः॥
हुतं नैव यथाकालमग्नौ हव्यमृगन्ततः।
लिङ्गिनो वयमित्युच्चैरभिमानान्नराधमाः॥
न दत्तं पर्वणि प्राप्ते काव्ये पित्रादितृप्तये।
नाध्यापितं ब्रह्मयज्ञं सत्यलोकस्य सिद्धये॥
नाग्निष्टोमं नाग्रयणं न संन्यासं कदाचन।
करोति मनुजः कश्चित्सर्वे पाषण्डमाप्नुयुः॥
विष्णुदासा वयञ्चेति वयमीशानलिङ्गिनः।
भैरवार्कगणेशानां देव्या भक्ताश्च केचन॥
केचित्कापालिकाचारा मद्यमांसाशिनः सदा।
एकस्यैव मतस्यापि भेदषट्कं समाश्रिताः॥

एवं बहवश्चार्वाकमतसिद्धान्ताश्रिताः तत्स्वरूपमेव परमिति तदाचाराः सत्यशौचादिधर्मज्ञानरहिताः पशव इव द्वैतवादिनः श्रुति-

स्मृतीतिहासपुराणोपपुराणादिकलितकर्मज्ञानरूपमार्गद्वयं परित्यज्य तृतीयपथा मूढतात्पर्येण हि विहिताविहितमविज्ञाय शुद्धाद्वैतविरोधिनः दुर्नीत्या श्रुत्यर्थविरुद्धं तात्पर्यं स्वीकृत्य सर्वे कुमतशीला बभूवुः।

कर्त्ता त्वमीश! जगतां मम केशवस्य
तेजोभुगन्तसमये लयकर्तृकत्वात्।
तस्मात्कुविप्रबलकुत्सितदुर्मतानां
नाशाय चिन्तय समुद्धर वेदमार्गम्॥

इति ब्रह्मणा प्रस्तुतः श्रीपरमेश्वरः सन्तुष्टान्तरः सन्निदमुवाच—

ब्रह्मन् यथासुखं गच्छ सन्तुष्टोऽस्मि तवोक्तितः।
शङ्कराचार्यनाम्नाहं सम्भवामि महीतले॥
यद्धितं तव विष्णोश्च तदेव स्थापयाम्यहम्।
मम भक्तावुभौ यस्मात्सत्यं नान्यद्विचिन्तय॥
मद्विभूतिर्हरिस्त्वं हि चेन्द्राद्यष्टदिगीश्वराः।
वसवो द्वादशादित्या गन्धर्वाश्च मरुद्गणाः॥
यक्षाः सिद्धास्तथा साध्या गरुडाः किन्नरादयः।
किमत्र बहुनोक्तेन सर्वं चेदं चराचरम्॥
मदङ्गभेदसञ्जातं लये मय्येव लीयते।
अहमेकोऽक्षरः कर्त्ता ध्रुवः शाश्वत एव च॥
आत्मा गुहाशयः सर्ववेदार्थप्रणवात्परः।
तस्मात्सर्वेषु कालेषु मामद्वैतमुपाश्रय॥
इति सम्बोधितो ब्रह्मा प्रणिपत्य महेश्वरम्।
सगणः प्राप सत्याख्यं निजलोकमनन्यधीः॥
ततः सर्वात्मको देवश्चिदम्बरपुराश्रितः।
आकाशलिङ्गनाम्ना तु विख्यातोऽभून्महीतले॥
तत्र विद्वन्महेन्द्रस्य कुले द्विजगुणाश्रिते।
जातः सर्वज्ञनाम्ना तु कश्चिद् द्विजकुलेश्वरः॥

कामाक्षीति सती चाभूत्तस्य लक्षणलक्षिता ।
चिदम्बरेश्वरं ध्यात्वा तावुभौ प्रापतुः सुताम् ॥
सा कुमारी सदा ध्यानसक्ताभूज्ज्ञानतत्परा ।
विशिष्टेति च नाम्ना तु प्रसिद्धाभून्महीतले ॥
तामष्टमेऽब्दे विप्राय शान्तायाद्भुतकर्म्मणे ।
प्रददौ विश्वजिन्नाम्ने सर्वज्ञोऽस्याः पिता स्वयम् ॥
सा सदा पतिमद्वैतं ध्यात्वाकाशात्मकं शिवम् ।
तस्याराधनमत्युग्रमाचकार विवेकिनी ॥
तादृशीमपि सन्त्यज्य ययौ विश्वजिदद्भुतम् ।
अरण्यं तपसे कृत्वा मनो निश्चयतां गतम् ॥
तदाप्रभृति सा नारी चिदम्बरमहेश्वरम् ।
तोषयामास पूजाभिर्ध्यानैरात्मगतैः सदा ॥
स देवः सर्वपूर्णोऽपि तस्या वदनपङ्कजम् ।
प्रविश्य विस्मितान् कुर्वन् जनानन्यान् समागतान् ॥
महोग्रतेजसा जुष्टा विशिष्टाभूद्यथाम्बिका ।
सर्वैः सम्पूजिता नित्यं पित्रादिभिरुपाश्रिता ॥
अतीते मासि गर्भस्य वृद्धिरासीद्दिने दिने ।
चिदम्बरेश्वरं कृत्वा यजमानं द्विजोत्तमाः ॥
तृतीयादिषु मासेषु चक्रुः कर्माणि वेदतः ।
प्राप्ते तु दशमे मासि विशिष्टागर्भगोलतः ॥
प्रादुरासीन्महादेवः शङ्कराचार्य्यनामतः ।
आसीत्तदा पुष्पवृष्टिर्देवसङ्घैः प्रचोदिता ।
नेदुर्दुन्दुभयो दिव्याः स्वर्गे लोके चिरं सुखम् ॥

विचित्ररूपतेजोगुणगाम्भीर्यादियुक्तः शैशवेऽपि प्राकृतमागधगीर्वाणादिसर्वभाषाकुशलः, सरस्वतीविलास इव समवर्त्तत । तृतीये वर्षे चौलकर्म, पञ्चमे वर्षे मौञ्जीबन्धं विध्युक्तितश्चक्रुर्विप्रौघाः । तदनु

विद्यागुरुसमीपे सकृच्छ्रवणादेवावगतसर्वविद्याप्रपञ्चातीत इव, समज्ञानवशाज्जीवन्मुक्त इव किलानालस्यादभवद् भगवान् श्रीमदाचार्यः। षड्दर्शनमूलः, इतिहासस्थाणुः, निगमशाखः, षडङ्गपल्लवः, सूत्रपुष्पः, मन्त्रशलाटुः[1] ज्ञानपक्वफलः श्रीशङ्करकल्पवृक्ष आसीत्।

स्वर्गे यथा कल्पतरुस्तथा भूमौ हि शङ्करः।
सुराणां भूसुराणाञ्च वाञ्छितार्थप्रदो गुरुः॥

वेदे ब्रह्मसमस्तदङ्गनिचये गार्ग्योपमस्तत्कथा-
तात्पर्यार्थविवेचने गुरुसमस्तत्कर्मसंवर्णने।
आसीज्जैमिनिरेव तद्वचनदर्पोद्राधकन्दे[2] समो।
व्यासेनेव मदीयसद्गुरुसौ श्रीशङ्कराख्यः क्षितौ॥

अद्वैतार्णवपूर्णचन्द्रमभिधापद्माटवीभास्करं
विद्वत्कोटिसमर्चिताङ्घ्रियुगलं प्रद्वेपिकक्षानलम्।
हृद्यावद्यसमस्तवेदजनितप्रोद्यद्विवेकाङ्कुरं
स्विद्यद्रागमृतं परात्परगुरुं श्रीशङ्करं तं भजे॥

अर्द्धेन्दुललाटः, पूर्णेन्दुमुखः, विशालवक्षाः, आजानुबाहुः उन्नितम्बः, पीनोरुः, गूढगुल्फः, स्वल्पपादः, शोणनखः, करपादमध्यस्थलेषु शङ्खचक्रादिचिह्नितः, शिरसि वामभागे त्रिशूलचिह्नं दक्षिणभागे त्वर्द्धचन्द्रचिह्नमेवमङ्कद्वयेन साक्षाच्चिदम्बरेश्वर इव विराजमानः, समप्रमाणशरीरः, मौञ्जिदण्डाजिनतिलकधारणभिक्षाशनादिभिः शास्त्रविधिरेवमनुष्ठेय इति सर्वमर्त्यान् बोधयन्।

शिष्यबोधनार्थमुपाध्यायानुज्ञावशाद् ब्रह्मासने चतुःषष्टिकलापरागके चतुर्दशविद्यामणिविराजिते सहस्रवेदप्रभादीपिते सूत्रेतिहासतन्तुविराजिते तापनीयागममन्त्रतन्त्रयन्त्रादिषट्त्रिंशदङ्गुलोच्छ्रिते प्रागद्रौ

---

१. शलाटुः = अपक्वफलम्।

२. तद्वचनदप्रोद्बोधकन्धे—इति पाठान्तरम्।

बालभानुरिव, ब्रह्माण्डगोलकीले ध्रुव इव, जनककृतद्वादशवार्षिके सत्रे याज्ञवल्क्य इव, परीक्षिन्नरेन्द्रस्य ज्ञानबोधसमये शुक इव, मेरुमस्तके तपश्चर्याङ्गीकारोचितव्यास इव, रामकथाप्रदातृत्वकाले वाल्मीकिरिव, भाष्योपदेशकाले पतञ्जलिरिव, देवानां शिक्षासमये सुराचार्य्य इव, नारदोपदेशकाले ब्रह्मेव, धर्मराजस्य तत्त्वोपदेशकाले श्रीकृष्ण इव, समासीनः श्रीशङ्कराचार्य्यगुरुरनेकशिष्याणां निगमादिसर्वशास्त्रप्रपञ्चस्य सदुपदेशमाचकार।

[ आनन्दगिरिकृतशंकरविजयात् ]

---

## १०—निर्वृतिर्नाम नगरी

जरा रुजा मृतिश्चेति खलता च कुरूपता।
दरिद्रता दुर्भगता उद्दिष्टाः क्रमशो यखा॥
एताश्चैवं विवल्गन्ते विपक्षक्षयमुच्चकैः।
कुर्वाणा भवचक्रेऽत्र लोकपीडनतत्पराः॥

*प्रकर्षेणो*दितं माम! किमासां विनिवारकाः।
लोकपाला न विद्यन्ते नगरेऽत्र नृपादयः॥

*विमर्शेनो*दितं वत्स! नैताः शक्या नृपादिभिः।
निवारयितुमित्यत्र कारणं ते निवेदये॥
ये केचिद्वीर्यभूयिष्ठाः प्रभवो भुवनोदरे।
तेष्वपि प्रभवन्त्येताः सर्वेषु प्रसभं सदा॥

सर्वत्र विचरन्तीनामासामुद्दामलीलया।
गजानामिव मत्तानां नास्ति मल्लो जगत्त्रये॥
स्वप्रयोजनवीर्येण विलसन्तीर्निरङ्कुशम्।
को नाम भुवने साक्षादेताः स्खलयितुं क्षमः॥

*प्रकर्षेणोक्तम्* । माम ! तत्किं पुरुषेण न यतितव्यमेवामूषां निराकरणे ?

*विमर्शेनोक्तम्* । वत्स ! निश्चयतो निराकरणे न यतितव्यमेव । यतो न शक्यत एवावश्यंभाविनीनामासां निराकरणं कर्तुम् । विमृश्यकारो च पुरुषः कथमशक्येऽर्थे प्रवर्तते । न हि कर्मपरिणामकालपरिणतिस्वभावलोकस्थितिभवितव्यतादिसम्पूर्णकारणसामग्रीबलप्रवर्तितानामवश्यमाविर्भवन्तीनाममूषामन्येषां वा कार्यविशेषाणां निराकरणे यतमानः पुरुषः प्रयासादृते कञ्चिदर्थं पुष्णाति ।

*प्रकर्षः* प्राह । माम ! पूर्वं भवता प्रत्येकमासां जरारुजादीनामपराण्येवान्तरङ्गबहिरङ्गाणि प्रवर्तकानि निर्दिष्टानि । तत्कथमिदानीं कर्मपरिणामादीनि प्रवर्तकत्वेनोच्यन्ते ?

*विमर्शेनोक्तम्* । तानि विशेषकारणानीति कृत्वा प्राधान्येनोक्तानि । परमार्थतस्तु यथानिर्दिष्टकर्मपरिणामादिकारणकलापव्यापारमन्तरेण न नयननिमेषोन्मेषमात्रमपि कार्यजातं किञ्चिज्जगति जायते ।

*प्रकर्षः* प्राह । माम ! यद्येवं ततः पुरुषेण किमात्मनो निजवर्गीणस्य वामूरभ्यर्णवर्तिनीरापतन्तीरुपलभ्य न कर्तव्य एव कश्चिदासां निवारणोपायः ? किन्नान्वेषणीया एव वैद्यौषधमन्त्रतन्त्ररसायनचतुर्विधदण्डनीत्यादयः समुपस्थित जरारुजामृत्य्वादिनिर्घातनोपायाः ? किं सर्वथा पादप्रसारिकैवात्र श्रेयस्करी ? किमकिञ्चित्कर एव पुरुषो हेयोपादेयहानोपादने ? ननु प्रत्यक्षविरुद्धमिदम्, यतः प्रवर्तन्त एव पुरुषा हिताहितयोरवाप्तिनिराकरणकामनया । प्रवृत्ताश्चोपाये प्राप्नुवन्ति हितमर्थं निराकुर्वन्ति चोपस्थितमभ्युपायत एवाहितमिति ।

*विमर्शेनोक्तम्* । वत्स ! विश्रब्धो भव मोत्तालतां यासीः । परामृश वचनैदंपर्यम् । निश्चयतो हि मयोक्तं यथा मा प्रवर्तिष्ट पुरुषः, व्यवहारतस्तु तत्प्रवृत्तिं को वारयति । पुरुषेण हि सर्वत्र पुरुषापराधमलः सद-

नुष्ठाननिर्मलजलेन क्षालनीयः। तदर्थं हि तत्प्रवृत्तिः। यतो नाकलयत्यसौ तदा भाविकार्यपरिणामं ततो व्यवहारतः सर्वहेयोपादेयहानोपादानसाधनं समाचरत्येव। किञ्च। चिन्तितञ्चानेन। यदुताहं न प्रवर्ते तथाप्यसावप्रवर्तमानो नासितुं लभते। यतः कर्मपरिणामादिकारणसामग्र्या वेतालाविष्ट इव हठात् प्रवर्तत एव। न चाकिञ्चित्करः पुरुषः। किं तर्हि स एव प्रधानः। तदुपकरणत्वात्कर्मपरिणामादीनाम्। न च पादप्रसारिका श्रेयस्करी। व्यवहारतः पुरुषप्रवृत्तेर्हिताहितनिर्वर्तनापवर्तनक्षमत्वात्। निश्चयतस्तु निःशेषकारणकलापपरिणामसाध्यत्वात् कार्याणाम्। अन्यथा पूर्वमाकलिते पुरुषेण वैपरीत्येन तु परिणते पश्चात् प्रयोजनेन विधेयौ न हर्षविषादौ। समालम्बनीयो निश्चयाभिप्रायः। यथेत्थमेवानेन विधातव्यमिति भावनया विधेयो मध्यस्थभावः। न चतच्चिन्तनीयं यद्येवमहमकरिष्यं ततो नेत्थमभविष्यदिति। यतस्तथावश्यंभाविनः कार्यस्य कुतोऽन्यथाकरणम्। नियता हि निश्चयाकूतेन नियतकारणसामग्रीजन्या च सकलकालं तथैवानन्तकेवलिज्ञानगोचरीभूता च समस्तापि जगति बहिरङ्गान्तरङ्गकार्यपर्यायमाला। सा यया परिपाट्या व्यवस्थिता यैश्च कारणैराविर्भावनीया, तयैव परिपाट्या तान्येव च कारणान्यासाद्याविर्भवति। कुतस्तस्यामन्यथाभावः। अतोऽतीतचिन्ता मोहविलसितमेव। व्यवहारतोऽपि हितावाप्तयेऽहित निषेधाय च प्रवर्तमानेन पुरुषेण सुपर्यालोचितकारिणा नानकान्तिकानात्यन्तिके तत्साधने भेषजमन्त्रतन्त्ररसायनदण्डनीत्यादौ महानादरो विधेयः; अपि त्वैकान्तिकात्यन्तिकं तत्साधनमन्वेषणीयम्। सर्वथा सदनुष्ठानोपायेन तत्र यातव्यं यत्रैते जरारुजादयः सर्वेऽप्युपद्रवा न प्रभवन्ति।

*प्रकर्षः* प्राह। माम ! कुत्र पुनरेते न प्रभवन्ति।

*विमर्शे*नोक्तम्। अस्ति सन्नगरी रम्या निर्वृतिर्नाम विश्रुता।
अनन्तानन्दसन्दोहपरिपूर्णा निरत्यया॥

तस्यां न प्रभवन्त्येव संस्थितानामुपद्रवाः ।
जरारुजाद्याः सा यस्मात् सर्वोपद्रववर्जिता ॥
तस्याञ्च गन्तुकामेन सेव्याः सद्वीर्यवृद्धये ।
पुरुषेण सदा तत्त्वबोधश्रद्धानसत्क्रियाः ॥
ततो विवृद्धवीर्याणां तस्या मार्गेऽपि तिष्ठताम् ।
तनूभवन्ति दुःखानि वर्द्धते सुखपद्धतिः ॥

[ उपमितिभवप्रपञ्चाख्यकथायाः ]

---

## ११—निर्वृतिनगरीमार्गः

अस्त्यत्र निर्वृतिर्लोके नगरी सुमनोहरा ।
सा च भुक्तेरतिक्रान्ता महामोहादिभूभुजाम् ॥
निर्द्वन्द्वानन्दसम्पूर्णा सततं निरुपद्रवा ।
एभिश्चाकर्णिता सर्वैः सालोकैः पुरवासिभिः ॥
ततो लोकायतं मुक्त्वा ये शेषपुरवासिनः ।
नगरीं गन्तुमिच्छन्ति तामेते वत्स ! निर्वृतिम् ॥

तत्र नैयायिकैस्तावदेष कल्पितो निर्वृतिमार्गः। यदुत प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वपरिज्ञानन्निःश्रेयसाधिगमः। तत्रार्थोपलम्भहेतुः प्रमाणम्। तच्चतुर्धा। तद्यथा। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। तत्र प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्। तत्पूर्वकं त्रिविधमनुमानम्। तद्यथा पूर्ववच्छेषवत्सामान्यतोदृष्टञ्च। तत्र पूर्ववत्कारणात्कार्यानुमानम्। यथा मेघोन्नतेर्भविष्यति वृष्टिरिति। शेषवत्कार्यात्कारणानुमानम्। यथा विशिष्टान्नदीपूरदर्शनादुपरि वृष्टो

देव इति। सामान्यतो दृष्टं नाम यथा देवदत्तादौ गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्य दिनकरेऽपि सा गतिपूर्विकैव समधिगम्यते। प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्। यथा गौस्तथा गवय इति। आप्तोपदेशः शब्द आगम इत्यर्थः। तदेवमिदं चतुर्विधं प्रमाणमभिहितम्।

तथा आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्। किं स्यादित्यनवधारणात्मकः प्रत्ययः संशयः। किमयं स्थाणुः स्यादुत पुरुष इति। येन प्रयुक्तः प्रवर्तते तत्प्रयोजनम्। अविप्रतिपत्तिविषयापन्नो दृष्टान्तः। सिद्धान्तश्चतुर्विधः। तद्यथा सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगम सिद्धान्तश्चेति। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः।

संशयादूर्ध्वं भवितव्यताप्रत्ययस्तर्कः। यथा भवितव्यमत्र स्थाणुना पुरुषेण वेति। संशयतर्काभ्यामूर्ध्वं निश्चयतः प्रत्ययो निर्णयः। यथा पुरुष एवायं स्थाणुरेव वा।

तिस्रः कथा वादजल्पवितण्डाः। तत्र शिष्याचार्ययोः पक्षप्रतिपक्षपरिग्रहेणाभ्यासख्यापनाय वादकथा। विजिगीषुणा सार्धं छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः। स एव प्रतिपक्षस्थापनाहीनो वितण्डा। अनैकान्तिकादयो हेत्वाभासाः। नवकम्बलो देवदत्त इत्यादि च्छलम्। दूषणाभासास्तु जातयः।

निग्रहस्थानानि पराजयवस्तूनि। तद्यथा प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमप्रतिज्ञानमप्रतिभा कथाविक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासश्चेति निग्रहस्थानानि।

तदेते प्रमाणादयः षोडश पदार्था नैयायिकदर्शनसमासः॥

वैशेषिकैः पुनरयं वत्स! परिकल्पितो निर्वृतिनगरीगमनमार्गः। यदुत द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां तत्त्व

परिज्ञानान्निश्रेयसाधिगमः। सा हि निर्वृतिर्निःश्रेयसरूपा। तत्र पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति नव द्रव्याणि। रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धि-सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारगुरुत्वद्रवत्वस्नेहवेगशब्दाः पञ्च-विंशतिर्गुणाः। उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति पञ्च कर्म्माणि। सामान्यं द्विविधं परमपरञ्च। तत्र परं सत्तालक्षणम्। अपरं द्रव्यत्वादीति। नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः अयुतसिद्धानामा-धाराधेयभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः। लैङ्गिक-प्रत्यक्षे द्वे एव प्रमाणे। इति वैशेषिकदर्शनसमासार्थः॥

सांख्यैस्तु वत्स निजबुद्धया परिकल्पितोऽयं निर्वृतिनगर्याः पन्थाः। यदुत पञ्चविंशतितत्त्वपरिज्ञानान्निःश्रेयसाधिगमः। तत्र त्रयो गुणाः सत्त्वं रजस्तमश्च। तत्र प्रसादलाघवप्रसवानभिष्वङ्गाद्वेषप्रतीतयः कार्यं सत्त्वस्य। शोषतापभेदस्तम्भोद्वेगापद्वेषाः कार्यं रजसः। वरण-सादनबीभत्सदैन्यगौरवाणि तमसः कार्यम् ततः सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। सैव प्रधानमित्युच्यते। प्रकृतेश्च महानाविर्भवति। बुद्धिरित्यर्थः। बुद्धेश्चाहङ्कारः। ततोऽहङ्कारादेकादशेन्द्रियाणि। तद्यथा पञ्च बुद्धीन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणि, पञ्च कर्मेन्द्रि-याणि वाक्पाणिपादपायूपस्थलक्षणानि, मनश्चाविर्भवति। तथा तत एवाहङ्कारात्तमोबहुलात्पञ्चतन्मात्राणि स्पर्शरसरूपगन्धशब्दलक्षणा-न्याविर्भवन्ति। तेभ्यश्च पृथिव्यादीनि पञ्च महाभूतानि। तदेषा चतुर्विंशतितत्त्वात्मिका प्रकृतिः। तथा परः पुरुषश्चैतन्यस्वरूपः। स चानेको जन्ममरणकरणानां नियमदर्शनाद्धर्मादिषु प्रवृत्तिनानात्वाच्च प्रकृतिपुरुषयोश्चोपभोगार्थः संयोगः पङ्ग्वन्धयोरिव। उपभोगश्च शब्दाद्युपलम्भो गुणपुरुषान्तरोपभोगश्च। प्रत्यक्षानुमानागमाः प्रमा-णानीति सांख्यदर्शनसंक्षेपार्थः॥

बौद्धैः पुनर्भद्र! परिकल्पितेयं निर्वृतिनगरीवर्तनी। यदुत द्वादशा-यतनानि। तद्यथा। पञ्चेन्द्रियाणि पञ्च शब्दादयो मनो धर्मायतनञ्च।

धर्मास्तु सुखादयो विज्ञेयाः। प्रत्यक्षानुमाने द्वे एव प्रमाणे इति बौद्धदर्शनसमासार्थः॥

अथवा वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकभेदाच्चतुर्विधा बौद्धा भवन्ति। तत्र वैभाषिकमतमिदम्। यदुत क्षणिकं वस्तु। तद्यथा। जातिर्जनयति, स्थितिः स्थापयति, जरा जर्जयति, विनाशो नाशयति। तथात्मापि तथाविध एव पुद्गलश्चासावभिधीयते॥

सौत्रान्तिकमतं पुनरिदम्। रूपवेदनाविज्ञानसंज्ञासंस्काराः सर्वशरीरिणामेते पञ्च स्कन्धा विद्यन्ते। न पुनरात्मा। त एव हि परलोकगामिनः तथा क्षणिकाः सर्वे संस्काराः स्वलक्षणं परमार्थतः। अन्यापोहः शव्दार्थः। सन्तानोच्छेदो मोक्ष इति।

योगाचारमतन्त्विदम्। विज्ञानमात्रमिदम्भुवनम्। न विद्यते वाह्यार्थः। वासनापरिपाकतो नीलपीतादिप्रतिभासाः। आलयविज्ञानं सर्ववासनाधारभूतम्। आलयविज्ञानविशुद्धिरेव चापवर्ग इति॥

माध्यमिकदर्शने तु सर्वशून्यमिदम्। स्वप्नोपमः प्रमाणप्रमेयप्रविभागः। मुक्तिस्तु शून्यतादृष्टिस्तदर्थं शेषभावना॥

॥ इति बौद्धविशेषाणां मतसंक्षेपार्थः॥

लोकायतैः पुनर्वत्स! सा निर्वृतिनगरी नास्तीति प्रख्यापितं लोकायते। अमी ब्रुवते। नास्ति निर्वृतिर्नास्ति जीवो नास्ति परलोको नास्ति पुण्यं नास्ति पापमित्यादि। किं तर्हि पृथिव्यापस्तेजो वायुरिति तत्त्वानि। तत्समुदाये शरीरेन्द्रियविषयसंज्ञा। तेभ्यश्चैतन्यं मद्याङ्गेभ्यो मदशक्तिवत्। जलबुद्बुदवज्जीवाः। प्रवृत्तिनिवृत्तिसाध्या प्रीतिः पुरुषार्थः। स च काम एव नान्यो मोक्षादिः। तस्मान्नान्यत् पृथिव्यादिभ्यस्तत्त्वमस्ति दृष्टहान्यदृष्टकल्पनासम्भवादिति। प्रत्यक्षमेव चैकं प्रमाणमिति लोकायतमतसमासः॥

मीमांसकानां पुनरेष मार्गः। यदुत वेदपाठानन्तरं धर्मजिज्ञासा कर्तव्या। यतश्चैवं ततस्तस्य निमित्तपरीक्षा। निमित्तञ्च चोदना। यत

उक्तम् । चोदनालक्षणोऽर्थो धर्मः । चोदना च क्रियायां प्रवर्तकं वचनमाहुर्यथाग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादि । तेन धर्म्मो लक्ष्यते । नान्येन प्रमाणेन । प्रत्यक्षादीनां विद्यमानोपलम्भनत्वादिति । प्रत्यक्षानुमानशब्दोपमानार्थापत्त्यभावाः षट् प्रमाणानीति मीमांसकमतसमासः ॥

अमीभिः पुनर्वत्स ! विवेकमहापर्वतारूढैरप्रमत्तत्वशिखरस्थितैर्जैनपुरनिवासिभिर्जैनलोकैरयं दृष्टो निर्वृतिनगरीगमनमार्गः । यदुत जीवाजीवास्रवसंवरनिर्जरामोक्षास्तत्त्वम् । तत्र सुखदुःखज्ञानादिपरिणामलक्षणो जीवः । तद्विपरीतस्त्वजीवः । मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः । स आस्रवः । आस्रवकार्यं बन्धः । आस्रवविपरीतः संवरः । संवरफलं निर्जरा । निर्जराफलं मोक्ष इत्येते सप्त पदार्थाः । तथा विधिप्रतिषेधानुष्ठानपदार्थाविरोधश्च । अत्र जैनदर्शने स्वर्गकेवलार्थिना तपोध्यानादि कर्तव्यम् । सर्वे जीवा न हन्तव्या इति वचनात् । सततसमितिगुप्तिशुद्धा क्रिया । असम्पन्नो योग इति वचनात् । उत्पादविगमध्रौव्ययुक्तं सत् । एकं द्रव्यमनन्तपर्यायमर्थ इति । प्रत्यक्षपरोक्षे द्वे एव प्रमाणे । इति जैनमतस्य दिग्दर्शनमात्रम् ॥

[ उपमितिभवप्रपञ्चाख्यकथायाः ]

# १२—अगस्त्याश्रमवर्णन ।

तस्याञ्च ( विन्ध्याटव्याम् ) दण्डकारण्यान्तःपाति, सकलभुवन-विख्यातम्, उत्पत्तिक्षेत्रमिव भगवतो धर्म्मस्य;

सुरपति-प्रार्थना-पीत-सकल-सागर-सलिलस्य, मेरुमत्सरादम्बर-तल-प्रसारित-शिरः-सहस्रेण दिवसकर-रथ-गमन-पथमपनेतुमभ्युद्यतेन अवगणित-सकलसुर-वचसा विन्ध्यगिरणाऽप्यनुल्लङ्घिताज्ञस्य, जठरा-नल-जीर्ण-वातापिदानवस्य, सुरासुर-मुकुटमकरपत्र[1]कोटि-चुम्बित-चरण-रजसो-दक्षिणाशा-वधू-मुखविशेषकस्य, सुरलोकादेकहुङ्कारनि-पातित-नहुष-प्रकटप्रभावस्य भगवतो महामुनेरगस्त्यस्य भार्यया लोपा-मुद्रया स्वयमुपरचितालवालकैः करपुट-सलिल-सेक-संवर्द्धितैः सुतनिर्वि-शेषैरुपशोभितं पादपैः;

तत्पुत्रेण च गृहीतव्रतेनाषाढिना[2] पवित्र-भस्म-विरचितत्रिपुण्ड्का-भरणेन कुशचीवरवाससा मौञ्ज-मेखलाकलितमध्येन गृहीत-हरित-पर्ण-पुटेन[3] प्रत्युटजमटता भिक्षां दृढदस्युनाम्ना पवित्रीकृतम्, अतिप्रभूतेध्माहरणाच्च यस्येध्मवाह इति पिता द्वितीयं नाम चकार;

दिशि दिशि शुकहरितैश्च कदलीवनैः श्यामलीकृत-परिसरम्, सरिता च कलसयोनि-परिपीत-सागर-मार्गानुगतयेव बद्ध-वेणिकया गोदावर्य्या परिगतमाश्रमपदमासीत् ।

यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो दशवदनलक्ष्मी-विभ्रम-विरामो रामो महामुनिमगस्त्यमनुचरन् सह सीतया लक्ष्मणो-परचित-रुचिर-पर्णशालः पञ्चवट्यां कञ्चित् कालं सुखमुवास ।

---

१. मकरपत्राणि स्वर्णनिर्मिता मकराकृतिपक्षाः ।

२. गृहीतव्रतेन ब्रह्मचर्यव्रतधारिणा । आषाढः पलाशदण्डोऽस्यास्तीति तेन ।

३. भिक्षान्नस्थापनार्थं गृहीतं हरितपर्णनिर्मितं पुटकं येन तेन ।

चिरशून्येऽद्यापि यत्र शाखा-निलीन-निभृतपाण्डु-कपोतपङ्क्तयो लग्नतापसाग्निहोत्र-धूमराजय इव लक्ष्यन्ते तरवः। बलिकर्म कुसुमान्युद्धरन्त्याः सीतायाः करतलादिव संक्रान्तो यत्र रागः स्फुरति लताकिसलयेषु। यत्र च पीतोद्गीर्ण-जलनिधि-जलमिव मुनिना निखिलमाश्रमोपान्तवर्त्तिषु विभक्तं महाह्रदेषु। यत्र च दशरथ-सुत-निशित-शर-निकर-निपात-निहत-रजनीचर-बल-बहुल-रुधिर-सिक्त-मूलमद्यापि तद्रागाविद्धनिर्गत-पलाशमिवाभाति नवकिसलयमरण्यम्।

अधुनापि यत्र जलधरसमये गम्भीरमभिनव-जलधर-निवह-निनादमाकर्ण्य भगवतो रामस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरन्तो न गृह्णन्ति शष्प-कवलमजस्रमश्रुजल-लुलित-दीन दृष्टयो वीक्ष्य शून्या[1] दश दिशो जराजर्ज्जरितविषाणकोटयो जानकीसंवर्द्धिता जीर्णमृगाः। यस्मिन्ननवरतमृगया-निहत शेष-वनहरिण-प्रोत्साहित इव कृतसीताविप्रलम्भः कनकमृगो राघवमतिदूरं जहार। यत्र मैथिलीवियोगदुःखदुःखितौ दशवदन-विनाश-पिशुनौ चन्द्रसूर्याविव कबन्ध[2]ग्रस्तौ समं रामलक्ष्मणौ त्रिभुवनभयं महच्चक्रतुः। अत्यायतश्च यस्मिन् दशरथ-सुत-शर निपातितो योजनबाहो[3]र्बाहुरगस्त्यप्रसादनागतनहुषाजगर-कायशङ्कामकरोदृषिजनस्य। जनकतनया च भर्त्रा विरहविनोदनार्थमुटजाभ्यन्तरलिखिता यत्र रामनिवासदर्शनोत्सुका पुनरिव धरणीतलादुल्लसन्ती वनचरैरद्याप्यालोक्यते॥

[कादम्बर्याः]

---

१. शून्या रामलक्ष्मणसीतारहिताः।

२. कबन्धेन दनुकबन्धेन राहुणा च।

३. दनुकबन्धस्य।

# १३—पम्पासरोवरवर्णनम्

तस्य चैवंविधस्य सम्प्रत्यपि प्रकटोपलक्ष्यमाण-पूर्ववृत्तान्तस्यागस्त्याश्रमस्य नातिदूरे जलनिधि-पान-कुपित-वरुणोत्साहितेन अगस्त्यमत्सरात्[१] तदाश्रमसमीपवर्त्यपर इव वेधसा महाजलनिधिरुत्पादितः, प्रलयकाल-विघटिताष्टदिग्भाग-सन्धिबन्धं गगनतलमिव भुवि निपतितम्, आदिवराहसमुद्धृत-धरामण्डल स्थानमिव सलिलपूरितम्;

अनवरत-मज्जदुन्मद-शबरकामिनी-कुचकलसलुलितजलम्, उत्फुल्लकुमुदकुवलयकह्लारम्[२], उन्निद्रारविन्दमधुबिन्दुबद्धचन्द्रकम्, अलिकुल-पटलान्धकारित-सौगन्धिकम्, सारसित[३]समदसारसम्, अम्बुरुह-मधुपान-मत्त-कलहंस-कामिनीकृत कोलाहलम्, अनेकजलचर-पतङ्गशतसञ्चलन-चलित-वाचाल-वीचिमालम्, अनिलोल्लासित-कल्लोल-शिशिर-शीकरारब्धदुर्दिनम्;

अशङ्कितावतीर्णाभिरम्भः-क्रीडारागिणीभिः स्नानसमये वनदेवताभिः केशपाशकुसुमैः सुरभीकृतम्, एकदेशावतीर्णमुनिजनापूर्यमाण-कमण्डलु-कल-जलध्वनि-मनोहरम्, उन्मिषदुत्पल-वन-मध्यचारिभिः सवर्णतया रसितानुमेयैः कादम्बकदम्बकै[४]रासेवितम्, अभिषेकावतीर्ण-पुलिन्दराज-सुन्दरी-कुचचन्दनधूलिधवलित-तरङ्गम्, उपान्त-जात-केतकी-रजःपटलबद्धकूल-पुलिनम्, आसन्नाश्रमागत-तापस-क्षालितार्द्र-वल्कलकषाय[५]-पाटल-तट-जलम्, उपतट-विटपि-पल्लवपुटानिलवीजितम्;

---

१. अगस्त्यं प्रति मत्सरात्।

२. कुमुदानि श्वेतोत्पलानि, कुवलयानि नीलोत्पलानि, कह्लाराणि रक्तोत्पलानि।

३. सारसिताः सशब्दाः।

४. कादम्बकदम्बकैः कलहंसगणैः।

५. कषायैर्निर्यासैः।

अविरल-तमाल-वीथिकान्धकारिताभिः, वालिनिर्वासितेन सञ्चरता प्रतिदिनमृष्यमूकवासिना सुग्रीवेणावलुप्त-फल-लघुलताभिः, उदवासि-तापसानां देवतार्च्चनोपयुक्त-कुसुमाभिः, उत्पतज्जलचर-पतङ्ग-पक्षपुट-विगलित-जलविन्दु-सेक-सुकुमार-किसलयाभिः, लता-मण्डपतल-शिखण्डिमण्डलारब्ध-ताण्डवाभिः, अनेक-कुसुम-परिमल-वाहिनीभिर्वनदेवताभिः श्वासवासिताभिरिव वनराजिभिरुपरुद्धतीरम्;

अपरसागरशङ्किभिः सलिलमादातुमवतीर्णैर्जलधरैरिव वहलपङ्कमलिनैर्वनकरिभिरनवरतमापीयमानसलिलम्, अगाधमनन्तमप्रतिमम् अपां निधानं पम्पाभिधानं पद्मसरः ॥

[ कादम्बर्याः ]

---

# १४—जाबाल्याश्रमवर्णनम्

अनतिदूरमिव गत्वा दिशि दिशि सदासन्निहित-कुसुमफलैः, ताल-तिलक-तमाल-हिन्ताल-वकुल-बहुलैः, एला-लताऽऽकुलित-नारिकेल-कलापैः, आलोल-लोध्र-लवली-लवङ्ग-पल्लवैः, उल्लसच्चूत-रेणु-पटलैः, अलि-कुल-झङ्कार-मुखर-सहकारैः, उन्मद-कोकिल-कुल-कालालाप-कोलाहलिभिः, उत्फुल्लकेतकीकुसुममञ्जरीरजः-पुञ्जपिञ्जरैः, पूगीलता-दोलाधिरूढ़-वनदेवतैः, तारकावर्षमिवाधर्मविनाश-पिशुनं कुसुम-निकरमनिलचलि-तम-नवरतमतिधवलमुत्सृजद्भिः, संसक्तपादपैः, काननैरुपगूढम्;

अचकित-प्रचलित-कृष्णसार-शत-शबलाभिः, उत्फुल्लस्थलकमलिनी-लोहिनीभिः, मारीच-मायामृगावलून-प्ररूढ-वीरुद्लाभिः, दाशरथि-चाप-कोटि-क्षत-कन्द-गर्त्त-विषमित-तलाभिः, दण्डकारण्यस्थलीभिरुपशोभितप्रान्तम्;

आगृहीत-समित्कुश-कुसुम-मृद्भिः अध्ययन-मुखर-शिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरशून्योपकण्ठम् ;

उत्कण्ठित-शिखण्डि-मण्डल-श्रूयमाण-जलकलस-पूरणध्वानम् ;।

अनवरताज्याहुति-प्रीतैश्चित्रभानुभि[१] सशरीरमेव मुनिजनममर-लोकं निनीषुभिः उद्धूयमान-धूम-लेखाच्छलेनाबध्यमान-स्वर्ग-मार्ग-गमन-सोपान-सेतुमिवोपलक्ष्यमाणम् ;

आसन्नवर्त्तिनीभिः, तपोधनसम्पर्कादिवापगतकालुष्याभिः, तरङ्ग-परम्परासंक्रान्तरविबिम्बपङ्क्तिभिः तापसदर्शनागतसप्तर्षि-माला विगाह्यमानाभिरिव, अतिविकच-कुमुदवनमृषिजनमुपासितुमवतीर्ण-ग्रहगणमिव निशासूद्वहन्तीभिर्दीर्घिकाभिः परिवृतम् ;

अनिलावनमित-शिखराभिः प्रणम्यमानमिव वनताभिः, अनवरत-मुक्तकुसुमैरभ्यर्च्यमानमिव पादपैः, आबद्धपल्लवाञ्जलिभिः उपास्य-मानमिव विटपैः ;

उटजाजिर-प्रकीर्णशुष्यच्छ्यामाकम् , उपसंगृहीतामलकलवली-लवङ्ग-कर्कन्धू-कदली-लकुच-चूत-पनस-तालफलम् , अध्ययन-मुखर-वटुजनम् , अनवरत-श्रवण-गृहीत-वषट्कार-वाचालशुककुलम् , अनेक-सारिकोद्घुष्यमाण-सुब्रह्मण्यम् , अरण्यकुक्कुटोपभुज्यमान-वैश्वदेव-बलिपिण्डम् , आसन्नवापीकलहंस-पोत-भुज्यमान-नीवार-बलिम् , एणी-जिह्वा-पल्लवोपलिह्यमानमुनिबालकम् , अग्निकार्यो-द्धदग्धसिमसिमायमान-कुशसमित्कुसुमम् , उपलभग्ननारिकेल-रस-स्निग्ध-शिलातलम् , अचिरक्षुण्णवल्कलरसपाटल-भूतलम् , रक्तच-न्दनोपलिप्तादित्यमण्डलनिहितकरवीरकुसुमम् , इतस्ततो विक्षिप्त-भस्मलेखालङ्कृतमुनिजनभोजनभूमिभागम् , परिचित-शाखा-मृग-कराकृष्ट-यष्टिनिष्काश्यमानप्रवेश्यमानजरदन्धतापसम् ;

१ दक्षिणाग्निगार्हपत्याहवनीयरूपैरग्निभिः।

इभ-करभकार्द्धोपभुक्तपतितैः सरस्वती-भुजलता-विगलितैः शङ्खवलयैरिव मृणाल-शकलैः कल्माषितम्[1], ऋषिजनार्थमेणकैर्विषाण-शिखरोत्खन्यमानविविधकन्दमूलम्, अम्बुपूर्णपुष्करपुटैर्वनकरिभिरापूर्यमाण-विटपालवालकम्, ऋषिकुमारकाकृष्यमाण-वनवराह-दंष्ट्रान्तराल-लग्नशालूकम्, उपजातपरिचयैः कलापिभिः पक्षपुटपवन-सन्धुक्ष्यमाण-मुनिहोम-हुताशनम्;

आरब्धामृत-चरु[2]-चारु-गन्धम्, अर्धपक्व-पुरोडाशपुण्यपरिमलामोदितम्-अविच्छिन्नाज्यधाराहुति-हुतभुग्घुङ्कार-मुखरितम्, उपचर्य्यमाणातिथिवर्गम्, पूज्यमान-पितृ-दैवम्, अर्च्यमान-हरि-हर-पितामहम्, उपदिश्यमान-श्राद्धकल्पम्, व्याख्यायमान-यज्ञविद्यम्, आलोच्यमानधर्मशास्त्रम्-पठ्यमानविविधपुस्तकम्, विचार्यमाण-सकल-शास्त्रार्थम्;

आरभ्यमाणपर्णशालम्, उपलिप्यमानाजिरम्, उपमृज्यमानोटजाभ्यन्तरम्; आबध्यमानध्यानम्, साध्यमान-यन्त्रम्, अभ्यस्यमान-योगम्, उपह्रियमाणवनदेवताबलिम्, निर्वर्त्यमानमौञ्जमेखलम्, प्रक्षाल्यमान-वल्कलम्, उपसंगृह्यमाणसमिधम्, संस्क्रियमाण-कृष्णाजिनम् गृह्यमाण-गवेधुकम्, शोष्यमाणपुष्करबीजम्, ग्रथ्यमानाक्षमालम्, गृह्यमाणत्रिपुण्ड्रकम्, न्यस्यमान-वेत्रदण्डम्, आपूर्य्यमाणकमण्डलुम्;

अदृष्टपूर्वं कलिकालस्य, अपरिचितमनृतस्य, अश्रुतपूर्वमनङ्गस्य, अब्जयोनिमिव त्रिभुवनवन्दितम्, असुरारिमिव प्रकटितवराह-नरसिंहरूपम्, सांख्यमिव कपिलाधिष्ठितम्, मथुरोपवनमिव बलात्प्रलीढ-

---

१ कल्माषितम् = विचित्रीकृतम्।

२ अमृतचरुः = घृतसंयुक्तचरुः।

हर्षित-धेनुकम्[1], उदयनमिवानन्दितवत्सकुलम्, किम्पुरुषाधिराज्यमिव मुनिजन-गृहीत-कलसाभिषिच्यमानद्रुमम्[2], निदाघसमयावसानमिव आसन्न-जलप्रपातम्, जलधरसमयमिव वन-गहन-मध्य-सुख-सुप्त-हरिम्, हनूमन्तमिव शिलाशकल-प्रहार-सञ्चूर्णिताक्षास्थि-सञ्चयम्[3], खाण्डवविनाशोद्यतार्जुनमिव प्रारब्धाग्निकार्यम्;

सुरभि-विलेपन[4] धरमपि सतताविर्भूतधूमगन्धम्, मातङ्ग-कुला[5]-ध्यासितमपि पवित्रम्, उल्लसित-धूमकेतु-शतमपि प्रशान्तोपद्रवम्-परिपूर्ण-द्विजपति[6]मण्डलसनाथमपि सदासन्निहित-तरुगहना-न्धकारम्;

अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम्।

यत्र च मलिनता हविर्धूमेषु न चरितेषु, मुखरागः शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु, चञ्चलता कदलीदलेषु न मनःसु, चक्षूरागः कोकिलेषु न परकलत्रेषु, कण्ठग्रहः कमण्डलुषु न सुरतेषु, मेखलाबन्धो[7] व्रतेषु नेर्ष्याकलहेषु, स्तनस्पर्शो होमधेनुषु न वनितासु,

---

१ धेनवो नवप्रसूता गावः, धेनुको धेनुकनामासुरः। धेनुकासुरः कृष्णेन हत इति भागवतम्।

२ द्रुमा वृक्षाः, द्रुमो नाम राजा च। पुरा किल मुनिभिः किन्नरराज्ये द्रुमोऽभिषिक्त इति श्रूयते।

३ अक्षाणां विभीतकफलानाम्, अस्थिसञ्चयो मध्यवर्ती कठिनांशः। अक्षस्य अक्षनामकराक्षसपुत्रस्य अस्थिसञ्चयश्च।

४ सुरभि सुगन्धि विलेपनमङ्गरागयोग्यं चन्दनादिकम्। सुरभेर्गोः विलेपनं गोमयं च।

५ मातङ्गकुलेन चण्डालसमूहेन च।

६ द्विजपतिः = चन्द्रो ब्राह्मणश्च।

७ मेखलाबन्धः = मौञ्जीबन्धनं खड्गमुष्टिधारणं च।

पक्षपातः कृकवाकुषु न विद्याविवादेषु भ्रान्तिरनलप्रदक्षिणेषु न शास्त्रेषु, वसुसङ्कीर्त्तनं दिव्यकथासु न तृष्णासु, गणना रुद्राक्षवलयेषु न शरीरेषु, मुनिबालनाशः[1] क्रतुदीक्षया न मृत्युना, रामानुरागो रामायणेन न यौवनेन, मुखभङ्ग-विकारो जरया न धनाभिमानेन।

यत्र च महाभारते शकुनिवधः, पुराणे वायुप्रलपितम्, वयःपरिणामे द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां भूतमत्त्वम्, एणकानां गीत-श्रवणव्यसनम्, शिखण्डिनां नृत्यपक्षपातः, भुजङ्गमानां भोगः[2], कपीनां श्रीफलाभिलाषः, मूलानामधोगतिः।

[ कादम्बर्याः ]

---

# १५—सन्ध्या-वर्णनम्

अनेन च समयेन परिणतो दिवसः। स्नानोत्थितेन मुनिजनेनार्घविधिमुपपादयता यः क्षितितले दत्तः तमम्बरतलगतः साक्षादिव रक्तचन्दनाङ्गरागं रविरुदवहत्। ऊर्द्ध्वमुखैरर्कबिम्ब-विनिहितदृष्टिभिरूष्मपैस्तपोधनैरिव परिपीयमान-तेजःप्रसरोविरलातपस्तनिमानमभजत्। उद्यत्सप्तर्षि-सार्थ-परिजिहीर्षयेव[3] संहृतपादः[4] पारावत-पाद-पाटल-रागो रविरम्बरतलादलम्बत। आलोहितांशुजालं जलशयनमध्यगतस्य मधुरिपोर्विगलन्मधुधारमिव नाभिनलिनं प्रतिमागतम-

---

१ बालनाशः = केशादिच्छेदनं शिशुमृत्युश्च।

२ भोगः शरीरं स्रक्चन्दनादिसंभोगश्च।

३ जगत्पूज्यानां सप्तर्षीणां चरणेन ( किरणैः ) स्पर्शो न भवेदिति भावः।

४ पादः किरणश्चरणश्च।

परार्णवे सूर्यमण्डलमलक्ष्यत। विहाय धरातलमुन्मुच्य च कमलिनी-वनानि शकुनय इव दिवसावसाने तरुशिखरेषु पर्वताग्रेषु च रवि-किरणाः स्थितिमकुर्वत। आलग्नलोहितातपच्छेदा मुनिभिरालम्बित-लोहित-वल्कला इवाश्रमतरवः क्षणमदृश्यन्त।

अस्तमुपगते च भगवति सहस्रदीधितावपरार्णव-तटात् उल्लसन्ती विद्रुमलतेव पाटला सन्ध्या समदृश्यत। यस्यामावध्यमानध्यानम्, एकदेश-दुह्यमान-होमधेनु-दुग्धधाराध्वनि-मनोहरम्, अग्निहोत्रवेदि-विप्रकीर्यमाण-हरित्कुशम्[1], ऋषिकुमारिकाभिरितस्ततो विक्षिप्य-माण-दिग्देवतार्चन-वलिसिक्थक[2]माश्रमपदमभवत्। क्वापि विहृत्य दिवावसाने लोहिततारकातपोवनधेनुरिव कपिला परिवर्त्तमाना सन्ध्या मुदितैस्तपोधनैरदृश्यत। अचिरप्रोषिते च सवितरि शोकवि धुरा कमल-मुकुल-कमण्डलु-धारिणी हंस-सितदुकूल-परिधाना मृणाल-धवल-यज्ञोपवीतिनी कधुकर-मण्डलाक्षवलयमुद्वहन्ती कमलिनी दिनपति-समागमव्रतमिवाचरत्।

अपरसागराम्भसि पतिते दिवसकरे तत्पतन-वेगोत्थितमम्भः सीकरनिकरमिव तारागणमम्बरमधारयत्। अचिराच्च सिद्धकन्यका-विक्षिप्त-सन्ध्यार्चन-कुसुमशबलमिव तारकितं वियदराजत। क्षणेन चोन्मुखेन मुनिजनेनोद्ध्र्व-विप्रकीर्णैः प्रणामाञ्जलिसलिलैः प्रक्षाल्य-मान इवागलदखिलः सन्ध्यारागः।

क्षयमुपगतायाञ्च सन्ध्यायां तद्विनाश-दुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभिनवमवहत्। अपहाय मुनिहृदयानि सर्व-मन्यदन्धकारतां तिमिरमनयत्।

---

१ कुशानां निक्षेपो होमीयास्तरणार्थम्।

२ बलिसिक्थः उपहाररूपमन्नम्।

क्रमेण च रविरस्तंगत इत्युदन्तमुपलभ्य यातवैराग्यो[1] धौतदुकूल-वल्कल-धवलाम्बरः सतारान्तःपुरः[2], पर्य्यन्तस्थिततनु-तिमिरतमाल-वनलेखम्, सप्तर्षिमण्डलाध्युषितम्, अरुन्धतीसञ्चरण-पवित्रम्, उपहिताषाढम्[3], आलक्ष्यमाणमूलम्, एकान्तस्थित-चारु-तारकमृगम्, अमरलोकाश्रममिव गगनतलममृतदीधितिरध्यतिष्ठत्। चन्द्राभरणभूतस्वतारका-कपाल-शकलालङ्कृतादम्बरतलात् त्र्यम्बकोत्तमाङ्गादिव गङ्गा सागरमापूरयन्ती हंस-धवला धरण्यामपतज्ज्योत्स्ना। हिमकर-सरसि विकच-पुण्डरीक-सिते चन्द्रिकाजलपान-लोभादवतीर्णो निश्चल-मूर्त्तिरमृतपङ्क-लग्न इवादृश्यत हरिणः। तिमिर-जलधर-समयापगमानन्तरम् अभिनव-सित-सिन्दुवार-कुसुम-पाण्डुरैरर्णवागतै[4]रगाह्यन्त हंसैरिव कुमुद-सरांसि चन्द्रपादैः। विगलितसकलोदयरागं रजनिकर-बिम्बमम्बरापगावगाह-धौत- सिन्दूरमैरावतकुम्भस्थलमिवतत्क्षणमलक्ष्यत।

[ कादम्बर्याः ]

---

१ वैराग्यं वैतृष्ण्यं विशिष्टो रागश्च।

२ सतारं सज्योतिरन्तः पुरं हृदयमध्यं सः। पक्षे तारा नक्षत्राण्येवान्तः पुराणि तैः सह।

३ आषाढा दण्डाः। आषाढे पूर्वाषाढोत्तराषाढे नक्षत्रे च।

४ अर्णवेभ्यः सागरेभ्य आगतैः। पक्षे समुद्रानपि प्राप्तैः।

# १६—उज्जयिनी-वर्णनम्

अस्ति सकल-त्रिभुवन-ललामभूता, प्रसवभूमिरिव कृतयुगस्य, आत्मनिवासोचिता भगवता महाकालाभिधानेन भुवनत्रय-सर्ग-स्थिति-संहार-कारणेन प्रमथनाथे[1]नापरेव पृथिवी समुत्पादिता, द्वितीय-पृथिवी-शङ्कया च जलनिधिनेव रसातलगभीरेण परिखा-वलयेन परिवृता, पशुपति-निवास-प्रीत्या च गगन-परिसरोल्लेखि-शिखरमालेन कैलासगिरिणेव सुधासितेन प्राकारमण्डलेन परिगता, प्रकट-शङ्ख-शुक्ति-मुक्ता-प्रवाल-मरकतमणिराशिभिश्चामीकर - चूर्ण-सिकता-निकर-निचितैरायामिभिरगस्त्य-परिपीत-सलिलैः सागरैरिव महाविपणिपथै-रुपशोभिता, सुरासुर-सिद्ध गन्धर्व-विद्याधरोरगाध्यासिताभिश्चित्रमा-लाभिरनवरतोत्सवावलोकनकुतूहलादम्बरतलादवतीर्णाभिर्दिव्यविमा-नपङ्क्तिभिरिवालङ्कृता, मथनोद्धत[2]दुग्ध-धवलित-मन्दरद्युतिभिः कनकमयामलकलशशिखरैरनिल-दोलायित-सितध्वजैरुपरि-पतदभ्रग-ङ्गैरिव तुषारगिरिशिखरैरमरमन्दिरैर्विराजितश्रृंगाटका[3],

सुधावेदिकोपशोभितोदपानैर[4]नवरत-चलित-जल - घटी - यन्त्रसि-च्यमान-हरितोपवनान्धकारैः केतकी-धूलि-धूसरैरुपशल्यकै[5]-रुपशो-भिता, मद मुखर-मधुकर-पटलान्धकारितनिष्कुटा[6], स्फुरदुपवन-लता-कुसुमपरिमल-सुरभि-समीरणा;

रणित - सौभाग्यघण्टैरालोहितांशुकपताकैराबद्ध-रक्तचामरैर्विद्रुम-

---

१ गणाधीश्वरेण शंकरेण।

२ उद्धृतैरुत्थितैः।

३ 'शृङ्गाटकचतुष्पथे' इत्यमरः।

४ उदपान कूपः।

५ 'ग्रामान्त उपशल्यं स्यात्' इत्यमरः।

६ निष्कुटो गृहारामः।

मयैः प्रतिभवनमुच्छ्रितैर्मकराङ्कितैः मदन-यष्टिकेतुभिः प्रकाशितमकर-ध्वज-पूजा, सततप्रवृत्ताध्ययनध्वनि-धौत-कल्मषा, स्तिमितमुरज-रव-गम्भीर-गर्जितेषु सलिलसीकरा[1]सार-रचितदुर्दिनेषु पर्यस्तरविकिरण-रचित-सुर-चाप-चारुषु धारागृहेषु मत्त-मयूर-मण्डलैर्मण्डलीकृतशिख-ण्डैस्ताण्डवव्यसनिभिरावध्यमानकेकारवकोलाहला, विकच-कुव-लय[2]-कान्तैरुत्फुल्लकुमुद[3]-धवलोदरैरनिमिष-दर्शनरमणीयैराखण्डल-लोचनैरिव सहस्रसंख्यैरुद्भासिता सरोभिः, अविरल-कदली-वन-कलि-ताभि[4]रमृत-फेनपुञ्ज-पाण्डुराभिर्दिशि दिशि दन्तवलभिकाभि[5]र्धवली-कृता, यौवन-मदमत्त-मालवीकुच-कलश-क्षुभित-सलिलया भगवतो महाकालस्य शिरसि सुरसरितमालोक्य समुपजातेर्ष्ययेव सततमाबद्ध-तरङ्गभ्रुकुटीलेखया खमिव क्षालयन्त्या शिप्रया परिक्षिप्ता;

सकल-भुवन-ख्यात-यशसा हरजटा-चन्द्रेणेव कोटिसारेण, मैना-केने[6]वाविदित-पक्षपातेन, मन्दाकिनी-प्रवाहेणेव प्रकटतिकनक-पद्मरा-शिना, स्मृतिशास्त्रेणेव सभावसथ-कूप-प्रपारामसुरसदन-सेतु-यन्त्र-प्रव-र्तकेन, मन्दरेणेवोद्धृतसमस्तसागर-रत्नसारेण-संगृहीत-गारुडेनापि[7] भुजङ्ग[8]भीरुणा, खलो[9]पजीविनापि प्रणयिजनोपजीव्यमानविभवेन,

१ सलिलसीकराणां जलयन्त्रनिःसृतजलबिन्दूनाम् ।

२ कुवलयैर्नीलोत्पलैः ।

३ कुमुदैः श्वेतोत्पलैः ।

४ कदलीनां पताकानां वनेन समूहेन कलिताभिराकीर्णाभिः ।

५ गजदन्तनिर्मिताभिश्चन्द्रशालाभिरुपरिगतक्षुद्रगृहैरित्यर्थः ।

६ पुरा किल इन्द्रद्वारा सकलपर्वतानां पक्षच्छेदकाले हिमालयपुत्रो मैनाकः पलायमानः समुद्रेऽमज्जदिति पौराणिकी वार्ता ।

७ गारुडं विषचिकित्साशास्त्रं मरकतमणिश्च ।

८ 'भुजङ्गः पिङ्गसर्पयाः ।' इति कोशः ।

९ खलो दुर्जनो नवीनधान्यस्थापनास्थलं च ।

वीरेणापि विनयवता, प्रियंवदेनापि सत्यवादिना, अभिरूपेणापि स्वदारसन्तुष्टेन, अतिथिजनाभ्यागमार्थिनापि परप्रार्थनानभिज्ञेन, कामार्थपरेणापि धर्मप्रधानेन, महासत्त्वेनापि परलोक[1]भीरुणा, सकलविज्ञान-विशेषविदा, वदान्येन, दक्षेण, स्मितपूर्वाभिभाषिणा, परिहास-पेशलेन, उज्ज्वलवेशेन, शिक्षिताशेषदेशभाषेण-वक्रोक्तिनिपुणेन, आख्यायिकाख्यान-परिचयचतुरेण, सर्वलिपिज्ञेन, महाभारत-पुराणरामायणानुरागिणा, बृहत्कथा-कुशलेन, द्यूतादि-कला-कलाप-पारगेण, श्रुतरागिणा, सुभाषितव्यसनिना, प्रशान्तेन, सुरभिमास-मारुतेनेव सततदक्षिणेन[2] हिमगिरिकाननेनेवान्तःसरलेन, लक्ष्मणेनेव रामाराधन-निपुणेन, शत्रुघ्नेनेवाविष्कृतभरत[3]-परिचयेन, दिवसेनेव मित्रानुवर्त्तिना, बौद्धेनेव सर्वास्तिवाद[4]-शूरेण सांख्यागमेनेव प्रधान-पुरुषो[5]पेतेन, जिनधर्मेणेव जीवानुकम्पिना, विलासिजनेनाधिष्ठिता;

सशैलेव प्रासादैः, सशाखानगरेव महाभवनैः, सकल्पवृक्षेव सत्पुरुषः, दर्शित-विश्वरूपेव चित्रभित्तिभिः, सन्ध्येव पद्मरागानुरागिणी[6], अमराधिप-मूर्त्तिरिव मखशतानलधूम-पूता, पशुपति-लास्यक्रीडेव सुधाधवलाट्टहासा[7], वृद्धेव जातरूपक्षया[8], गरुडमूर्त्तिरिवाच्युतस्थिति-

---

१ परलोकः शत्रुजनो जन्मान्तरं च।

२ सततोदारचित्तेन, सर्वदा दक्षिणदिश आगतेन च।

३ भारतः केकयीपुत्रः, भरतमुनिप्रणीतं नाट्यशास्त्रं च।

४ सर्वे पदार्था बाह्या आभ्यन्तराश्च वस्तुतो विद्यन्तेइत्येष हि बौद्धेषु केषाञ्चिद्-वादिनां सिद्धान्तः। उज्जयिन्यामपि क्रेतुः प्रश्नावसरे सर्वेषां विक्रेयवस्तूनामस्ति, वाद आसीत्।

५ प्रधानपुरुषैः श्रेष्ठमानवैः, प्रधानेन प्रकृत्या पुरुषेण च।

६ अनुरागो रक्तिमा।

७ अट्टानामट्टालिकानां हासः प्रकाशः। अट्टहासो महाहास्यं च।

८ क्षया गृहाणि, क्षयो विनाशश्च।

रमणीया, प्रभातवेलेव प्रबुद्धसर्वलोका, शबर-वसतिरिवावलम्बित-चारुचामरनागदन्त-धवलगृहा, शेषतनुरिव सदासन्नवसुधाधरा, जलधिमथनवेलेव महाघोषपूरितदिगन्तरा, प्रस्तुताभिषेकभूमिरिव सन्निहितकनकघटसहस्रा, गौरीव महासिंहासनोचितमूर्त्तिः अदितिरिव देवकुल-सहस्रसेव्या, महावराहलीलेव दर्शितहिरण्याक्षपाता, अस्तीकतनुरिव आनन्दितभुजङ्गलोका[1], हरिवंशकथेव अनेक-वाल-क्रीडारमणीया, प्रकटाङ्गनोपभोगाप्यखण्डितचरित्रा, रक्तवर्णापि[2] सुधाधवला, अवलम्बित-मुक्ता-कलापापि विहार[3]भूषणा, वहुप्रकृतिरपि स्थिरा, विजितामरलोकद्युतिरवन्तीपूज्जयिनी नाम नगरी।

यस्यामुत्तुङ्ग-सौधोत्सङ्ग-सङ्गीतसङ्गिनीनाम् अङ्गनानामतिमधुरेण गीतरवेणाकृष्यमाणाधोमुख-रथतुरङ्गः पुरःपर्य्यस्त-रथपताका-पट-कृतमहाकाल-प्रणाम इव प्रतिदिनं लक्ष्यते गच्छन् दिवसकरः।

यस्याञ्च सन्ध्यारागारुणा इव सिन्दूरमणिकुट्टिमेषु, प्रारब्धनील कमलिनीपरिमण्डला इव मरकत-वेदिकासु, गगनतलप्रसृता इव वैदूर्य्यमणिभूमिषु, तिमिर-पटल-विघटनोद्यता इव कृष्णागुरु-धूम-मण्डलेषु, अभिभूत-तारकापङ्क्तय इव मुक्ताप्रलम्बेषु[4] विकच-कमल-चुम्बिन इव नितम्बिनी-मुखेषु, प्रभातचन्द्रिका-मध्यपतिता इव स्फटिकभित्ति-प्रभासु, गगनसिन्धु-तरङ्गावलम्बिन इव सितपताकांशुकेषु, पल्लविता इव सूर्यकान्तोपलेषु, राहुमुखकुहरप्रविष्टा इवेन्द्रनीलवातायनविवरेषु विराजन्ते रविगभस्तयः।

---

१ भुजङ्गलोको विटजनः सर्पगणश्च। पुरा किल भगवानास्तीकः सर्पकुलविनाशोद्यतं जनमेजयस्य सर्पसत्रं प्रार्थनया निवारितवानिति महाभारतकथात्रानुसंधेया।

२ रक्तवर्णा, अनुरक्तब्राह्मणादिवर्णा च।

३ विगतहाराणि भूषणानि बौद्धालयाश्च।

४ लम्बमानमुक्ताकलापेषु।

यस्याञ्चानुपजात-तिमिरत्वादविघटितचक्रवाकमिथुना व्यर्थीकृत-सुरतप्रदीपाः सञ्जातमदनानलदिग्दाहा इव यान्ति कामिनीनां भूषण-प्रभाभिर्बालातपपिञ्जरा इव रजन्यः।

याञ्च सन्निहित-विषमलोचनामनवरतमतिमधुरो रतिप्रलाप इव प्रसर्पन् मुखरीकरोति मकरकेतु-दाह-हेतुभूतो भवन-कलहंसकोलाहलः।

यस्याञ्च निशि निशि पवनविलोलैः दुकूलपल्लवै[1]रुल्लसद्भिर्मा-लवी-मुख-कमल-कान्ति-लज्जितस्येन्दोः कलङ्कमिवापन-यन्तो दूरप्रसा-रितध्वजभुजाः प्रासादाः लक्ष्यन्ते।

यस्याञ्च सौध शिखर-शायिनीनां पश्यन् मुखानि पुरसुन्दरीणां मदनपरवश इव पतितः प्रतिमाच्छलेन लुठति बहल चन्दन-जल-सेक-शिशिरेषु मणिकुट्टिमेषु मृगलाञ्छनः।

यस्याञ्च निशावसाने प्रबुद्धस्य तारतरमपि पठतः पञ्जरभाजः शुकसारिकासमूहस्याभिभूतगृहसारस-स्वरामृतेन विस्तारिणा विला-सिनी-भूषणरवेणाविर्भाव्यमानाः व्यर्थीभवन्ति प्रभात-मङ्गलगीतयः।

यस्याञ्चानिवृत्तिः[2] मणिदीपानाम्, तरलता हारलतानाम्, अस्थि-तिः सङ्गीतमुरजध्वनीनाम्, द्वन्द्ववियोग[3]श्चक्रनाम्नाम्, वर्णपरीक्षा कनकानाम्, अस्थिरत्वं ध्वजानाम्, मित्रद्वेषः कुमुदानाम्, कोषगुप्ति-रसीनाम्।

किं बहुना, यस्यां सुरासुर-चूडामणि-मरीचिचयचुम्बितचरणन-खमयूखो निशित-त्रिशूल-दारितान्धकमहासुरः, गौरी नूपुर-कोटि-घृष्टशेखर-चन्द्रशकलः, त्रिपुरभस्म-रजःकृताङ्गरागः, मकरध्वज-ध्वंस विधुरया रत्या प्रसादयन्त्या प्रसारित-कर युगल-विगलित-वलय-निक-

१ विस्तृतपताकापटैः।

२ अनिर्वाणता, विषयेभ्योऽनुपरमश्च।

३ दम्पतीविरहः।

रार्चितचरणः, प्रलयानल-शिखा कलाप-कपिल-जटाभार-भ्रान्त-सुरसिन्धुः, अन्धकारिर्भगवान् उत्सृष्ट-कैलास-वास-प्रीतिर्महाकालाभिधानः स्वयं प्रतिवसति ।

[ कदम्बर्याः ]

---

## १७—प्रभातवर्णनम्

एकदा[१] तु प्रभातसन्ध्यारागलोहिते गगने च कमलिनी मधुरक्तपत्तसम्पुटे वृद्धहंस इव मन्दाकिनीपुलिनादपर-जलनिधि-तटमवतरति चन्द्रमसि, परिणत-रङ्कु-रोमपाण्डुनि व्रजति विशालतामाशाचक्रवाले, गजरुधिररक्तहरिसटालोहिनीभिः प्रतप्त-लाक्षिक-तन्तु-पाटलाभिरायामिनीभिः अशिशिरकिरणदीधितिभिः पद्मरागशलाकासम्मार्जनीभिरिव समुत्सार्यमाणे गगनकुट्टिमकुसुमप्रकरे तारागणे, सन्ध्यामुपासितुमुत्तराशावलम्बिनि मानससरतीरमिवावतरति सप्तर्षिमण्डले,

तटगत-विघटित शुक्ति-सम्पुट-विप्रकीर्णमरुणकरप्रेरणाधो गलितमुडुगणमिव मुक्ताफलनिकरमुद्वहति धवलितपुलिनमुदन्वति पूर्वेतरे,

तुषारविन्दुवर्षिणि विबुद्धशिखिकुले विजृम्भमाणकेसरिणि करिणीकदम्बक-प्रबोध्यमान-समदकरिणि क्षपाजल-जड-केसरं कुसुमनिकरमुदयगिरिशिखरस्थितं सवितारमिवोद्दिश्य पल्लवाञ्जलिभिः समुत्सृजति कानने,

रासभरोमधूसरासु वनदेवताप्रासादानां तरूणां शिखरेषु पारावतनालायमानासु धर्मपताकास्विव समुन्मिषन्तीषु तपोवनाग्निहोत्रधूम्रलेखासु,

---

१ प्रसङ्गनिर्देशः—वैशम्पायननामा शुकः शूद्रकस्य राज्ञः पुरस्तात् स्ववृत्तान्तवर्णनप्रसङ्गे शबरमृगयामुपवर्णयन् प्रभातकालं वर्णयति ।

अवश्यायशीकरिणि लुलितकमलवने रति-खिन्नशबरसीमन्तिनी-स्वेदजलकणापहारिणि वनमहिष-रोमन्थ-फेनविन्दुवाहिनि चलित-पल्लव-लता-लास्योपदेशव्यसनिनि विघटमान-कमलखण्ड-मधुशीक-रासार-वर्षिणि कुसुमामोदतर्पितालिजाले निशावसानजातजडिम्नि मन्दमन्दसञ्चारिणि प्रवाति प्राभातिके मितरिश्वनि,

कमलवन-प्रबोध-मङ्गलपाठकानाम् इभगण्डडिण्डिमानां मधु-लिहां कुमुदोदरेषु घटमान-दलपुट-निरुद्धपक्षसंहतीनामुच्चरत्सु हुङ्कारेषु,

प्रभातशिशिरमारुताहतमुत्तप्तजतुरसाश्लिष्टपक्ष्ममालमिव सशेष-निद्राजिह्मिततारं चक्षुरुन्मीलयत्सु शनैः शनैरूषरशय्याधूसर-क्रोड-रोमराजिषु वनमृगेषु,

इतस्ततः सञ्चरत्सु वनचरेषु विजृम्भमाणे श्रोत्रहारिणि पम्पासरः-कलहंसकोलाहले, समुल्लसति नर्त्तितशिखण्डिमण्डले मनोहरे वनगजकर्णतालशब्दे,

क्रमेण च गगनतलमवतरतो दिवसकरवारणस्यावचूल[1]चामरक-लाप इवोपलक्ष्यमाणे मञ्जिष्ठारागलोहिते किरणजाले,

शनैः शनैरुदिते भगवति सवितरि, पम्पासरःपर्य्यन्ततरुशिखर-सञ्चारिणि अध्यासितगिरिशिखरे दिवसकरजन्मनि हततारे पुनरिव कपीश्वरे[2] वनमभिपतति बालातपे,

स्पष्टे जाते प्रत्यूषसि, न चिरादिव दिवसाष्टमभागभाजि स्पष्ट-भासि भास्वति भूते'

प्रयातेषु यथाभिमतानि दिगन्तराणि शुककुलेषु, कुलायनिर्लीन-निभृत-शुकशावकसनाथेऽपि निःशब्दतया शून्य इव तस्मिन् वनस्पतौ, स्वनीडावस्थित एव ताते, मयि[3] च शैशवादसञ्जातबले समुद्विग्यमान-

१ अवचूलोऽवनताग्रभागः ।

२ सुग्रीवे । तस्य सूर्याजन्मन उपाख्यानं रामायणे द्रष्टव्यम् ।

३ मयि च वैशम्पायननामके शुके ।

पत्त्रपुटे तातसमीपवर्त्तिनि कोटरगते, सहसैव तस्मिन् महावने संत्रासितसकलवनचरः सरभससमुत्पतत्पत्त्रिपक्षपुटसन्ततः भीतकरिपोतचीत्कारपीवरःप्रचलित मत्तालिकुल क्वणितमांसलःपरिभ्रमदुद्घोण-वन-रव-घर्घरः गिरिगुहा सुप्त-प्रबुद्धसिंहनादोपबृंहितः कम्पयन्निव तरून् भगीरथावतार्य्यमाण-गङ्गाप्रवाह-कलकल वहलो भीतवनदेवता-कर्णितो मृगयाकोलाहलध्वनिरुदचरत्।

[कादम्बर्याः]

---

## १८—आर्यावर्त्तवर्णनम्

अस्ति समस्तविश्वम्भराभोगभास्वल्ललामलीलायमानः, समानः सेव्यतया नाकलोकस्य, ग्राम्यकविकथावन्ध इव नीरसस्यमनोहरः, भीम इव भारतालङ्कारभूतः, कान्ताकुचमण्डलस्पर्श इवाग्रणीः सर्व-विषयाणाम्, अनधीतव्याकरण इवादृष्टप्रकृतिनिपातोसर्ग[1]लोपवर्ण-विकारः,

पशुपतिजटाबन्ध इव विकसितकनककमलकुवलयोच्छलितरजःपुञ्जपिञ्जरितहंसावतंसया प्रचुरचलच्चकोरचक्रवाककारण्डवमण्डली-मण्डिततीरया भगीरथभूपालकीर्तिपताकया स्वर्गगमनसोपानवीथीय-मानरिङ्गत्तरङ्गया गङ्गया पुण्यसलिलैः प्लावितश्चन्द्रभागा[2]लंकृतैक-देशश्च,

सारः सकलसंसारचक्रस्य, शरण्यः पुण्यकारिणाम्, आरामो रामणीयककदलीवनस्य, धाम धर्मस्य, आस्पदं सम्पदाम्, आश्रयः

---

१ उपसर्गोधनापहारादिरुपद्रवः। उपसर्गाः प्रादयः।

२ चन्द्रभागया नद्या चन्द्रखण्डेन च।

श्रेयसाम्, आकरः साधुव्यवहाररत्नानाम्, आचार्यभवनमार्यमर्यादोपदेशानामार्यावर्तो नाम देशः।

यस्मिन्ननवरतधर्मकर्मोपदेशशान्तसमस्तव्याधिव्यतिकराः पुरुषायुपजीविन्यः सकलसंसारसुखभाजः प्रजाः, तथा हि कुष्ठयोगो गान्धिकापणेषु, स्फोटप्रवादो वैयाकरणेषु, सन्निपातस्तालेषु ग्रहसंक्रान्तिः[1] ज्योतिःशास्त्रेषु, भूतविकारवादः सांख्येषु, क्षयस्तिथिषु, गुल्मवृद्धिर्वनभूमिषु गलग्रहो मत्स्येषु, गण्डकोत्थानं पर्वतवनभूमिषु, शूलसम्बन्धश्चण्डिकायतनेषु दृश्यते न प्रजासु।

यत्र च[2] तुरगोपशोभिताः सङ्ग्रामा इव ग्रामाः, तुङ्गसकलभवनाः[3] सर्वत्र नगा इव नगरप्रदेशाः, सदाचरणमण्डनानि नूपुराणीव पुराणि, सदानभोगाः[4] प्रभञ्जना इव जनाः, प्रियालपनसाराणि[5] यौवनानीव वनानि, विटपिहिता[6]श्चेटिका इव वाटिकाः, निर्वृति[7] स्थानानि सुकलत्राणीवेक्षुक्षेत्रसत्राणि[8], जलाविलक्षणाः[9] पशुपुरुषा इवाप्रमाणास्तडागभागाः, कुपितकपिकुलाकुलिता लङ्केश्वरकिङ्करा इव

१ ग्रहाणां सूर्यादीनां मेषादिराशौ संक्रान्तिः। ग्रहो बन्धनं तस्य संक्रान्तिश्च।

२ संग्रामपक्षे 'च' इति छेदनीयम्।

३ नगपक्षे—तुङ्गैः पुंनागैरुपलक्षितं, कलभैरिभडिम्भैश्च सहितं वनं यत्र।

४ वायुपक्षे—सर्वदा नभो-गाः इत्यर्थः।

५ वनपक्षे—प्रियालं राजादनं पनसं च इयर्ति प्राप्नुवन्तीत्यर्थः।

६ विटपिभ्यो हिताः, विटैः पिहिता वेष्टिताश्च।

७ निर्वृतिः सुखं, वृतेरभावश्च।

८ सत्राणि दानशालाः।

९ तडागभागाः—जलाविला जलार्थिभिः सदा सेव्यतया जलपिच्छिलाः क्षणाः अवतारादितीरप्रदेशा यत्र। पशुपुरुषास्तु जडा विलक्षणा व्यपेतशास्त्राः। यद्वा अवि-लक्षणाः।

भग्नकुम्भकर्णघनस्वापाः[१] कूपाः, पीवरोधसः सरित इव गावः, सती-व्रतापदोषाः सूर्यद्युतय इव कुलस्त्रियः।

यत्र च मनोहारिसारद्वन्द्वा[२]स्तत्पुरुषेण द्विगुना चाधिष्ठिताः कादम्बरीगद्यबन्धा दृश्यमानबहुव्रीहयः केदाराः।

किं बहुना।

नास्ति सा नगरी यत्र न वापी न पयोधरा[३]।
दृश्यन्ते न च यत्र स्त्री नवापीनपयोधरा॥

अपि च

भवन्ति फाल्गुने मासि वृक्षशाखा विपल्लवाः।
जायन्ते न तु लोकस्य कदापि च विपल्लवाः॥

यत्र सौराज्यरञ्जितमनसः सकलसमृद्धिवर्द्धितमहोत्सवपरम्परारम्भनिर्भराः, सततमकुलीनं कुलीनाः[४], प्राप्तविमानमप्राप्तविमानभङ्गाः[५], कतिपयवसु[६]विराजितमनेकवसवः[७], समुपहसन्ति स्वर्गवासिनं जनं जनाः।

कथं चासौ स्वर्गान्न विशिष्यते।

यत्र गृहे गृहे गौर्यः स्त्रियः महेश्वरो लोकः, सश्रीका हरयः, पदे पदे धनदाः सन्ति लोकपालाः। केवलं न सुराधिपो[८] राजा। न च विनायकः कश्चित्।

---

१ कूपपक्षे—स्फुटितघटकण्ठाः, घनाः प्रचुराः स्वाः आपः येषु।

२ सारसद्वन्द्वाः,-सार-सद्वन्द्वाः इति च च्छेदः।

३ पय-प्रधाना भूमिः।

४ कुलीना अभिजाताः। पक्षे कुः पृथ्वी तस्यां लीनाः।

५ विमानः तिरस्कारः।

६ वसवोऽष्टौ।

७ वसु धनम्।

८ सुराधिप इन्द्रः। पक्षे—धिपिन्नतोति अधिपः। सुराया अधिपः सुराधिपः।

यत्र च लतासम्बन्धः कलिकोपक्रमश्च पादपेषु दृश्यते न पुरुषेषु।

यत्र चमरक[1]वार्ता परमहिमो[2]पघातश्च तुहिनाचलस्थलीषु श्रूयते न प्रजासु।

यश्च नीतिमत्पुरुषाधिष्ठितोऽप्यनीतिः[3], सवटोऽप्यवट[4]सङ्कुलः, कारूपयुतो[5]ऽप्यगतरूपशोभः।

यत्र च गुरुव्यतिक्रमं नक्षत्रराशयः, मात्राकलहं लेखशालिकाः, मित्रोदयद्वेषमुलूकाः, अपत्यत्यागं कोकिलाः, बन्धुजीव[6]विघातं ग्रीष्मदिवसाः कुर्वन्ति न जनाः।

किं बहुना।

देशः पुण्यतमोद्देशः कस्यासौ न प्रियो भवेत्।
युक्तोऽनुक्रोशसम्पन्नै[7]र्योजनैरिव यो जनैः॥

[ नलचम्वाः ]

---

१ चमरका गोविशेषाः। पक्षे चमरक ( मरको मरणबाहुल्यम् ) इति च्छेदः।

२ पर·महिम, परम·कि इत्ययं च च्छेदः।

३ ईतिरुपद्रवः।

४ अवटाः कूपादिगर्ताः।

५ कारवः शिल्पिनः, तैरुपयुतः। पक्षे कारूपं कुत्सितमीषद्वा रूपम्।

६ बन्धुजीवं बन्धूकम्। पक्षे बन्धुजीवा बान्धवाः।

७ अनुक्रोशेन कृपया संपन्नैर्धनैः। पक्षेऽनुक्रोशे संपन्नैः अन्नजलतृणादिभिः समृद्धैर्योजनैः।

# १६—निषधानगरीवर्णनम्

तस्य[1] विषयस्य मध्ये निषधो नामास्ति जनपदः प्रथितः ।
तत्र पुरी पुरुषोत्तमनिवासयोग्यास्ति निषधेति ॥
जननीतिमुदितमनसा सततं सुस्वामिना कृतानन्दा ।
सा नगरी नगतनया गौरीव मनोहरा भाति[2] ॥

यस्यामभ्रंलिहेन्द्रनीलशाल[3]शिखरसहस्रनिःसृतांशुजालबालशाद्वलाङ्कुराग्रग्रासलालसाः स्खलन्तः खे खेदयन्ति मध्येदिनं सादिनं रविरथतुरङ्गमाः ।

यस्यां च स्फटिकमणिशिलानिबद्धभवनप्राङ्गणगतासु सञ्चरद्गृहिणीचरणालक्तकपदपङ्क्तिषु पतन्ति निर्मलसलिलाभ्यन्तरतरत्तरुणारुणकमलकाङ्क्षया मुग्धमधुपपटलानि ।

यस्यां च विविधमणिनिर्मितवासभवनव्यभित्तिषु स्वच्छासु स्वां छायामवलोकयन्त्यः कृतापरस्त्रीशङ्काः कथमपि प्रत्यानीयन्ते प्रियैः प्रियतमाः ।

यस्याञ्च दिव्यदेवकुलालङ्कृताः स्वर्गा इव मार्गाः, सततमपांसुवसनाः सागरा इव नागराः समत्तवारणानि[4] वनानीव भवनानि, सुरसेनान्विताः स्वर्गभूपा इव कूपाः, अधिकन्धरोदेशमुद्भासयन्तो हारा इव विहाराः ।

---

१ तस्य आर्यावर्तस्य ।

२ जन-नीति, पक्षे जननी इति । न गतनया, पक्षे नग-तनया । सुस्वामिना सुप्रभुणा, शोभनेन स्कन्देन च । मनोहरा रम्या, पक्षे मनसि हरो यस्याः ।

३ शालः प्राकारः ।

४ मत्तवारणोऽपाश्रयो मत्तेभश्च ।

यस्यां च वहुलक्षणाः[१] सुधावन्तो[२] दृश्यन्तेऽन्तः प्रचुराः प्रासादाः वहिश्च वारणेन्द्राः। सुशोभितरङ्गाः[३] समालोक्यन्तेऽन्तः संगीतशाला वहिश्च क्रीडाकमलदीर्घिकाः। वहुधान्य[४]निरुद्धाः कथमप्यभिगम्यन्तेऽन्तः पण्यस्त्रियो वहिश्च क्षेत्रभूमयः। नानाशुकविभूषणाः[५] शोभन्तेऽन्तः सभा वहिश्च सहकारवनराजयः। ससौगन्धिक[६]प्रसारा विराजन्तेऽन्तर्विपण्यो वहिश्च सलिलाशयाः।

किं बहुना

भूमयो बहिरन्तश्च नानारामोप[७]शोभिताः।
कुर्वन्ति सर्वदा यत्र विचित्रवयसां[८] मुदम्॥

यस्यां च भक्त[९]भाजो देवतायतनेषु देवताः सन्निधाना[१०] दृश्यन्ते हट्टेषु वणिग्जनाः। अक्षरसावधानाः कविगोष्ठीषुकवयो विलोक्यन्ते द्यूतस्थानेषु द्यूतकाराः। कान्तारागप्रियाःकरिणो राजद्वारेषु सञ्चरन्ति वेश्याङ्गणेषु भुजङ्गाः।

यस्यां च चतुरुदधिवेलाविराजितसकलधराचक्रचूडामणौ मणिकर्मनिर्मितरम्यहर्म्यतया सुरपतिपुरीपराभवकारिण्याम्—अव्ययभावो

---

१ बहुल-क्षणाः ( क्षणो भूमिका ), बहु-लक्षणा इति च च्छेदः।

२ सुधायुक्ताः, पक्षे सुष्ठु धावन्तः।

३ सुशोभित-रङ्गाः सुशोभि-तरङ्गाश्च।

४ बहुधा अन्य-( अन्यैर्विटैः ), पक्षे बहु-धान्य-।

५-आशुकवि-भूषणाः पक्षे-शुक-विभूषणाः।

६ सुगन्धीनि द्रव्याणि पण्यमेषां ते सौगन्धिका वणिजः, कह्लाराणि च।

७ आरामै रामाभिश्च।

८ रम्यवयसां यूनां, विविधपक्षिणां च।

९ भक्तो भक्तिमान्। भक्तं चान्नम्।

१० संनिधानं नैकट्यम्। सम्यङ्निधिश्च।

व्याकरणोपसर्गेषु न धनिनां धनेषु दानविच्छित्ति[1]रुन्माद्यत्करिकपोलमण्डलेषु न त्यागिगृहेषु। भोगभङ्गो भुजङ्गेषु न विलासिलोकेषु स्नेहक्षयो रजनिविरामविरमत्प्रदीपपात्रेषु न प्रतिपन्न[2]जनहृदयेषु। कूट[3]प्रयोगो गीततानविशेषेषु न व्यवहारेषु। वृत्तिकलहो वैयाकरणच्छात्रेषु न स्वामिभृत्येषु।

किं बहुना

त्रिदिवपुरसमृद्धिस्पर्द्धया भान्ति यस्यां
सुरसदनशिखाग्रेष्वाग्रहग्रन्थिनद्धाः।
नभसि पवनवेल्लत्पल्लवैरुल्लसद्भिः
परममिह वहन्त्यो वैभवं वैजयन्त्यः[4]॥

अपि च

चार्वी सदा सदाचारसज्ज्ञसज्जनसेविता।
नगरी न गरीयस्या सम्पदा सा विवर्जिता॥

[ नचलम्बा ]

---

१ मदशोभा, त्यागविच्छेदश्च।

२ प्रतिपन्नानि परस्परप्रतीतानि।

३ गीतस्य ताना द्विविधाः। एके कूटाख्याः पञ्चत्रिंशत्। अन्ये च शुद्धाख्याश्चतुर्दश॥ कूटं कपटं च।

४ सुराणां सदनानि प्रासादा विमानानि च आगृह्यन्त एभिरित्याग्रहा अङ्कटकास्तेषु ये ग्रन्थयस्तैर्नद्धाः। वेल्लत्पल्लवैश्चलदञ्चलैः। सर्वोऽपि विजिगीषुर्बद्धपरिकरः पताकां दर्शयतीति भावः।

# २०—दक्षिणदेशस्य वर्णनम्

अस्ति विस्तीर्णमेदिनीमण्डलमण्डनायमानो नगनगरपुरविहारारामरमणीयः सीतासहायसञ्चरितरघुपतिपादपद्मपवित्रारण्यः पुण्यतरतरङ्गगङ्गागोदावरीवारिवारितदुरितदावानलप्रसरः, मन्दर इव बलिराज[1]जनितपरिवर्तनः[2], कैलास इव महेश्वरलोककृतवसतिः, मेरुरिव सुवर्णप्रकृतिकमनीयः, यदुवंश इव दृष्टशूर[3]पुरुषावतारः, सोमान्वय इव बुधप्रधानः, वेदपाठ इवानेकैः सवनै[4]रुपेतः, पर्वते पर्वते स्थाणुभिः, पुरे पुरे पुराणपुरुषैः[5], जले जले कमलोद्भवैः[6], पदे पदे देवकुलैः, वने वने वरुणैः[7] स्थाने स्थाने नन्दनोद्यानैः, अर्गलः[8] स्वर्गस्य, तापी[9]प्रायोऽप्यनुपतापो जनस्य, विन्ध्याद्रिमुद्रितायां दिशि देशानामुत्तरोऽपि दक्षिणो देशः।

यत्र शास्त्रे शस्त्रे च वेदे वैद्ये च भरते भारते च कल्पे शिल्पे च प्रधानो, धनी, धन्यो, धान्यवान्, विदग्धो वाचि, मुग्धो मुखे, स्निग्धो मनसि, वसति निरन्तरमशोको लोकः।

यत्र क्रुद्धधूर्जटिललाटलोचनानलज्वालाकवलनाकुलः, त्रासादपाङ्गावलोकनमात्रनिर्जितपरमेश्वरमनसां विलासिनीनामुच्चकुचकुम्भयोः

---

१ बली राजा भीमः, बलिराजो दैत्यश्च।

२ परिपालनं भ्रमणं च।

३ शूरो विक्रमी वसुदेव पिता च।

४ स इति भिन्नम्। वनैः काननैः। पक्षे सवनैर्यज्ञैः।

५ पुराणपुरुषो वृद्धो विष्णुश्च।

६ कमलोद्भवैः कमलोत्पत्तिभिर्ब्रह्मभिश्च।

७ वरुणो वृक्षो जलं वा। पक्षे प्रचेताः सूर्यो वा।

८ अधिकः।

९ तापी नदी, तापयत्यवश्यमिति च।

शृङ्गारसर्वस्वम्, अधरपल्लवेषु मधु, भ्रूभङ्गेषु धनुः, कटाक्षेषु पुष्पबाणान्निधाय निलीनोऽङ्गेषु जघनस्थलस्थापितरतिर्मकरकेतनः।

यासां तारुण्यमेव सर्वाङ्गेषु शोभार्थमाभरणम्, उत्तुङ्गस्तनमण्डललावण्यमेव मुखकमलावलोकनाय दर्पणः, तारतरनयनकान्तिरेव मुखमण्डलमण्डनाय चन्दनललाटिका, भ्रूभङ्गा एव विभ्रमाय मृगमदपत्रभङ्गाः, कटाक्षा एव युवजनजयाय परमास्त्राणि, बन्धूककुसुमकान्तिदन्तच्छद एव लोकलोचनमनोमोहनाय माहेन्द्रमणिः, मुखकमलपरिमलागतमधुकरमधुरझंकार एव विनोदाय वीणाध्वनिः।

किं बहुना।

ता एव निर्वृति[१]स्थानमहं मन्ये मृगेक्षणाः।
मुक्ता[२]नामास्पदं येन तासामेव स्तनान्तरम्॥

मन्ये च। ताभिरेव विविधनिधुवननिधानकुम्भीभिः कुम्भोद्भवोऽपि भगवान्प्रलोभितो भविष्यति, येनाद्यापि न मुञ्चति दक्षिणां दिशमेव।

अथवा।

देशो भवेत्कस्य न वल्लभोऽसौ,
स्त्रीसंकुलः सुस्थितकामकोटिः[३]।
दग्धैककामं त्रिदिवं विहाय
यस्मिन्कुमारो[४]ऽपि रतिञ्चकार॥

[ नलचम्वाः ]

---

१ निर्वृतिर्मुक्तिः शर्म च।

२ मुक्ता मुक्तात्मानो मौक्तिकानि च।

३ कामकोटिर्देवी, कन्दर्पकोट्यश्च।

४ कार्त्तिकेयो डिम्भश्च।

# २१—कुण्डिननगरस्य वर्णनम्

तस्या[1]न्तर्भूतवैदर्भमण्डलस्यालंकारभूतम्, अनाकुलम्[2], अमरपतिपुरप्रतिस्पर्धि, परितःपरिखाप्रान्तरूढप्रौढहृद्योद्यानमालावलयितम्, अदभ्रशुभ्राभ्रंलिहप्रासादशिखरशिखाभोगभग्नरविरथतुरङ्गवेगम्

एकत्राग्निहोत्रमन्त्रपवित्राहुतिहृतसमस्तदिव्यान्तरिक्षभौमोत्पातसंघातैः, कृतमन्युभि[3]रपि मन्युशून्यैः[4], उक्तसूक्तैरपि निरुक्त[5]परैः, सन्मार्गस्थैरपि गृहस्थैः, सकलत्रैरपि ब्रह्मचारिभिः, अभ्यस्तातिथिभिरपि अतिथिकुशलैः, सामप्रयोगप्रधानैरपि दण्डावलम्बिभिः, शतपथानुसारिभिरप्येकमार्गैः[6] ब्राह्मणैरध्यासितम्।

एकत्र कुरुभिरिव द्रोण[7]पुरःसरैः, प्रासादैरिव तुला[8]धारिभिः, नैयायिकैरिवानुमेयानुमाननिपुणैः, वैशेषिकैरिव द्रव्यानुगुणकर्मविशेषपण्डितैः, वैयाकरणैरिव रूपसिद्धिप्रधानैः, रुद्रैरिवानेकग्रन्थिबद्धकपर्दकैः[9], विपणिवणिग्जनैरधिष्ठितम्।

एकत्र विटकौलदम्भदीक्षाभिरिव कुचरूपलोभितलोकाभिः[10],

---

१ दक्षिणदेशस्य।

२ निरुपद्रवम्।

३ कृतक्रतुभिः।

४ कोपशून्यैः।

५ निरुक्तः ग्रन्थविशेषो वचनाभावश्च।

६ एकमार्गैर्ऋजुभिः।

७ द्रोणो मानं कौरवगुरुश्च।

८ सूत्रादिमानं गृहादीनां तिर्यग्धारणस्तम्भश्च तुला।

९ कपर्दो वराटो जटाबन्धश्च।

१० शाक्तदम्भदीक्षासु कुत्सितेन चरुणा मांसादिनोपलोभितलोकाः। कुचयो रूपेण लोभितलोकाश्च।

कुकविकाव्यपद्धतिभिरिव भग्नयतिगणवृत्ताभिः, निशाचरीभिरिव रजनी[1]रागिणीभिः कर्णाटचेटीभिर्भरितम् ।

एकत्र वालकमिव कुलाला[2]कीर्णम् । एकत्र वृद्धमिव कुजराजितम्[3] । एकत्र चित्रविद्ययेव प्रवर्धमानसकलशिशुशोभितया विन्यस्तस्वस्तिकया सर्वतोभद्रभूषणया[4] भवनमालयालङ्कृतम् । एकत्र नाटकैरिव पताकाङ्कसंधिसंगतैः, दुष्टकिरातैरिव दृष्टकूट[5]कर्मभिः, शस्त्रैरिव सुधारैः[6], विचित्रैरपि सचित्रैः, सतुलैरप्यतुलै[7]र्देवकुलैः सङ्कुलम् । विशालमपि शालासम्पन्नम्, चतुश्चरणसंयुक्तमपि चरण[8]रहितम्, विट्[9]संभृतमपि शुचिमार्गम्, सर्वत्र चत्वरा[10]धिकमपि स्थिरप्रकृति, मज्जन्महाराष्ट्रकुटुम्बिनीमुखमण्डलविधीयमानोत्फुल्लकमलशोभायास्तुङ्गतरङ्गरङ्गत्तरुणार्जुनराजीवराजमानराजहंसविराजितवारेर्वरदायास्तीरे रामणीयकरसकुण्डं कुण्डिनं नाम नगरम् ।

यस्य नातिदूरे दर्शनदूरीकृतदुरितोपप्लवाप्लवनजनितपातकभङ्गां गङ्गामुपहसन्ती स्वर्गमार्गाश्रयणनिश्रेणी पुण्यपयाः पयोष्णी वहति ।

---

१ रजनी हरिद्रा निशा च । कर्णाटे हि हरिद्रैवाङ्गरागः ।

२ कुलालैः कुत्सितलालया च ।

३ कुजैस्तरुभी राजितम् । कुत्सितजरया च जितम् ।

४ चित्रविद्यापक्षे शिशुः सकलः स्वस्तिको वर्धमानः सर्वतोभद्र इत्याख्यानि पञ्चपत्राणि ( ? यन्त्राणि ) ।

५ कूटं शिखरं कपटं च ।

६ देवकुलपक्षे—सुधां लेपविशेषमियर्ति प्राप्नुवन्ति ।

७ तुला साम्यं धारणस्तम्भश्च ।

८ चरणा ऋग्वेदादयः । च रण-इति च च्छेदः ।

९ विशः वैश्याः । विट् विष्ठा च ।

१० चत्वरं चतुष्पथम् । च त्वरा-इति च विच्छेदः ।

यस्य च पश्चिमदेशे प्रणतसुरासुरमौलिनीलमणिमरीचिचञ्चरीक-चक्रचुम्बितचरणाम्भोजस्य *भोजकटकूप*[1]जन्मनो जरापातितययातेः[2] प्रचण्डदण्डदाण्डिक्यदण्डनाडम्बरितगण्डपाषाणविदलितवैदर्भमण्ड-लस्य[3] भगवतो भार्गव[4]स्याश्रमः ।

यत्र च विपत्त्राः[5] सन्ति साधवो न तु तरवः, विजृम्भमाणकमलानि[6]सरांसि न जनमनांसि, कुवलया[7]लङ्काराः क्रीडादीर्घिका न सीमन्तिन्यः, विपदाक्रान्तानि[8] सरित्कूलानि न कुलानि ।

किं बहुना

देशानां दक्षिणो देशस्तत्र वैदर्भमण्डलम् ।
तत्रापि वरदातीरमण्डलं कुण्डिनं पुरम् ॥

---

१ भोजकटकूपेति अधिष्ठाननाम ।

२ वृषपर्वदैत्यसुतां शर्मिष्ठां शुक्रसुतां देवयानीं च ययातिनृपतिरुपयेमे । ततोऽसौ शर्मिष्ठाप्रीत्या देवयानीमवजानन् 'तवाङ्गे जरा पततु' इति शुक्रेण शप्तः ।

३ दाण्डक्यो नाम भोजकटदेशाधिपः शुक्रसुतामरजःसंज्ञां हठात्परिणीतवान् । ततः शुक्रेण मन्युना पातालशैलगण्डवृष्टिना वैदर्भदेशो हतः ।

४ भार्गवः शुक्राचार्यः ।

५ विपदस्त्रायन्ते इति विपत्त्राः, पक्षे विगतपत्राः ।

६ पक्षे-क-मलः कुत्सितो मलः पापम् ।

७ कुवलयं सरोजं कुत्सितवलयं च ।

८ कूलपक्षे वीनां पदैराक्रान्तानि ।

# २२—उषःकालवर्णनम्

अथ क्रमेण रजतकुम्भमम्भोभरणार्थमिवेन्दुमण्डलमादाय पश्चिमाम्भोनिधिपुलिनमनुसरन्त्यां तरुणकपोतकन्धरारोमराजिराजिन्यां रजन्याम्, अखिलकमलखण्डकमलिनीनां विनिद्रायमाणकमलकुड्मलविलोचनेषु कज्जलरेखास्विवोल्लसन्तीषु भ्रमरराजिषु, राजीवराजिपुञ्जनिकुञ्जे शिञ्जानमञ्जीरमञ्जुलमुन्नदत्सु शरद्बलाहकवलक्षपक्षविक्षेपपवनतरलिततरुणतामरसेषु दीर्घिकावतंसेषु हंसेषु, क्रेङ्कारयति च चक्रवाकमिथुनमेलकमङ्गलमृदङ्ग इव रौप्यवर्वररवसरसं सारसकुले, अवश्यायजलशिशिरशीकरिणि मन्दान्दोलितविनिद्रद्रुममञ्जरीरजःकणकषायिते तमःसर्पसंदष्टोज्जीवितजगन्निश्वासायमाने प्रस्खलति मरुति, मनोहारिहारीतहरितहये हरति तिमिरपटलपटीं गगनलक्ष्म्याः करपरामृष्टपयोधरे रागवति सवितरि, मृगमदमिलितबहलकुङ्कुममण्डनमञ्जरीभिरिव पिञ्जरिते पुरन्दरदिङ्मुखे सुखप्रसुप्ता सा[१] स्वप्नमद्राक्षीत्।

[ नलचम्प्वाः ]

---

# २३—प्रभातसमयवर्णनम्

क्रमेण च प्राच्यां सिच्यमानायामिव बहलकुसुम्भाम्भःकुम्भैः ककुभि, प्रधावति तारकोच्छेदनाय सुकुमारे रश्मिजाले, पूर्वाचलस्थलीमधिरोहति जगत्प्रबोधप्रारम्भमङ्गलकलशेंऽशुमालिमण्डले, ताण्डवाडम्बरिणि पुण्डरीकखण्डे, हिण्डमानासु दीर्घिकामण्डनमुण्डमालासु कारण्डवमण्डलीषु, विश्राम्यति श्रवणपुटेषु हृदयानन्दिनि वन्दिवृन्दा-

---

१ भीमराजस्य पत्नी ।

रकवृन्दवन्दनारम्भरवे, रणत्सु वीणावेणुकोणान्वैणिकवैणविकेषु[1] कण्ठकुहरप्रेङ्खोलनालङ्कारकुशले तारतरं गायति ग्रामरागं गायनजने, जाते जरज्जपाप्रसूनभिन्नस्फुटस्फाटिककान्तिसमप्रभे प्रभातसमये, सा ( = भीम राजस्य पत्नी ) समुत्थाय भूत्वा शुचिर्विकचनवनलिनगर्भमर्घाञ्जलिमवकीर्य भगवतः सवितुः स्तुतिमकरोत्।

[ नलचम्प्वाः ]

---

# २४—विन्ध्यवनस्थलीवर्णनम्

एवम् असौ ( = नलः ) क्रीडितानेकपामरा[2]न्गिरीन्ग्रामांश्च, बहुतरङ्गोप[3]शोभिताः सरितः सीम्नश्च, व्यूढपत्ररथान्[4] पथः पादपांश्च लङ्घयन्, सालसहिताः[5] पुरीर्नारीश्च सेवमानः, पच्यमानगोधूम[6]श्यामलाः क्षेत्रभुवो भिल्लपल्लीश्च परिहरन्, विधवाः[7] शत्रुसीमन्तिनीरटवीश्चातिक्रामन्, परिवारीणि[8] बन्धुकुलानि सरांसि च बहुमानयन्,

१ वैणिकवैणविकौ वीणावेणुवादकौ।

२ अनेकपा गजा अमराश्चेति गिरिपक्षे, पक्षे पामरा ग्राम्याः।

३ बहुतर गोपैरिति सीम्नां पक्षे।

४ पत्राणि = वाहनानि रथाश्च। पक्षे पत्ररथः पक्षी।

५ सालेन प्राकारेण सहिताः। नार्यः सालसा हिताश्च। अलसशब्दोऽत्र भाववचनः।

६ पच्यमानः परिपाकं गच्छन् बहुलीभवन्यो गोधूमः ( गोर्भूमेर्धूमः ) तेन श्यामला इति पल्लीपक्षे। कृष्यावनी हि दग्धा समधिकं फलतीति प्रसिद्धिः।

७ विर्विगमे विशेषे च। धवो भर्ता तरुविशेषश्च।

८ परिवृण्वन्ति परिवारीभवन्ति परिवारीणि। अन्यत्र परि समन्ताद्वारि जलं येषु।

नातिचिरेणरविरथतुरङ्गपरिहृतविषमशिरःशिखरसहस्रमजस्रममरगण-गन्धर्वसिद्धरुद्धस्कन्धमध्यं विन्ध्याचलमनुससार ।

ततश्च ।

दिशि दिशि किमिमानि प्रच्यवन्तेऽन्तरिक्षा-
द्विरतमुत देवी भूतधात्री प्रसूते ।
इति शबरवधूभिस्तर्क्यमाणान्तवापुः
सपदि विपुलविन्ध्यस्कन्धमध्यं बलानि ॥

श्रुतशीलस्तु तुङ्गशृङ्गरङ्गत्सारङ्गाङ्गनासु नक्षत्रासन्नाकाशावकाश-विशदवंशजालजटिलासु चलच्चित्रचित्रककरिकलभकदम्बकसंचारशबलासु हारिहरिताङ्कुररमणीयासु वनस्थलीषु निक्षिप्तचक्षुषमवलोक्य राजानमिदमवादीत् ।

देव !

माद्यद्दन्तिकपोलपालिविगलद्दानाम्बुसिक्तद्रुमाः
क्रीडत्क्रोडकुलार्धचर्वितपतन्मुस्तारसामोदिताः ।
अन्तःसुस्थितपान्थ-मन्थरमरुल्लोलल्लतामण्डपाः
कस्यैता न हरन्ति हन्त हृदयं विन्ध्यस्थलीभूमयः ॥

इतश्च पश्यतु देवः ।

एषा सा विन्ध्यमध्यस्थलविपुलशिलोत्सङ्गरङ्गत्तरङ्गा
संभोगश्रान्ततीराश्रयशबरवधूशर्मदा नर्मदा च ।
यस्याः सान्द्रद्रुमालीललिततलमिलत्सुन्दरीसंनिरुद्धैः
सिद्धैः सेव्यन्त एते मृगमृदितदलत्कन्दलाः कूलकच्छाः ॥

अपि च ।

अन्तरेऽप्यस्याः

मज्जत्कुञ्जरकुम्भमण्डलगलद्दानाम्बुनः सौरभाद्
भ्राम्यद्भृङ्गकुलावलीः कुवलयश्रेणीः[1] समाबिभ्रतः ।

---

१ भृङ्गकुलानां कुवलयानि उपमानम् ।

कल्लोलाः कलिकालकल्मषमुषः प्रोल्लोललीलाकृतः
स्वःसोपानपरम्परा इव वियद्वीथीमलङ्कुर्वते ॥

इतश्चास्यास्तीरे

अंसस्रंसिजलार्द्रजर्जरजटाजूटैर्मनाङ्मन्थरास्
तिम्यत्तारवतन्तु[1]निर्मितकुथत्कौपीनमात्रच्छदाः ।
शीतोत्कण्टकितास्थिशेषतनवः स्नात्वोत्तरन्तः शनै-
रेते पश्य पतन्ति पिच्छिलशिलाजाले जरत्तापसाः ॥

इतोऽपि

पश्यैताः करिकुम्भसंनिभकुचद्वन्द्वोल्लसद्वीचयः
क्रीडन्त्यल्पविकासभासि पयसि स्वैरं पुलिन्दस्त्रियः ।
उन्मीलन्नवनीलनीरजधिया पद्मान्तरे नेत्रयो-
र्यासां हस्तलताहता अपि परिभ्राम्यन्ति भृङ्गाङ्गनाः

इतोऽप्यवलोकयतु देवः

बालोन्मीलत्कुवलयवनं विस्तरद्गन्धरुद्ध-
भ्राम्यद्भृङ्गैरनुकृतपयःपूर्णमेघान्धकारम् ।
हर्षात्पश्यत्ययमतितरां तीरचारी मयूरो
मुग्धः पार्श्वे भ्रमति च भयाच्चक्रवच्चक्रवाकः ॥

इदं च

कुररभरसहं सहंसमालं
मुदितमयूरचकोरचक्रवाकम् ।
क इह सुरुचिरं चिरं विलोक्य
प्रवरमते ! रमते नरो न रोधः ॥

---

१ तरुषु जातास्तारवाः ।

इतश्च ।

वककृतनिनदं नदं न दम्भा-
त्कृतसवनं[१] सवनं[२] भजन्त एते ।
निरुपमविभवं भवं स्मरन्तः
प्रशमधना मुनयो नयोपपन्नाः ॥

विधूतपाप्मानः खल्वमी महानुभावाः ।

तथाहि ।

मुहुरधिवसतां सतां मुनीना-
मपविपदां[३] विपदाङ्कपङ्कभाञ्जि[४] ।
तटनिकटवनानि नर्मदायाः
कथमिभवन्ति भवन्ति कल्मषाणि[५] ॥

इतश्च

क्वचित्प्रवरगैरिकासम[६]समुल्लसत्पल्लवं
लवङ्गलवलीलतातलचलच्चकोरं क्वचित् ।
क्वचिद् गिरिसरित्तटीतरुणविस्फुरत्कन्दलं
दलन्निचुलमञ्जरीमधुनिरुद्धभृङ्गं क्वचित् ॥
क्वचिच्चटुलकोकिलाकुलितनूतचूताङ्कुरं
कुरङ्गकुलसेवितप्रबलसालमूलं क्वचित् ।

---

१ सवनम् = स्नानम् ।

२ सह वनैः सवनं वनयुक्तम् ।

३ अपगता विपद्येभ्यस्तादृशां मुनीनाम् ।

४ वीनां पक्षिणां पदमङ्को यत्र तथोक्तं पङ्कं भजन्ते तानि ।

१ कर्मभूतानि वनानि अधिवसतां मुनीनां कल्मषाणि पापानि कथं भवन्ति । न भवन्त्येवेत्यर्थः ।

२ असमम् = अप्रतिमम् ।

क्वचित्प्रवरसञ्चरत्सुरवधूपदैः पावनं
वनं नयति विक्रियामिह मनो मुनीनामपि ॥ (युग्मम् )

तदिदमद्यतनं दिवसमस्य सैन्यस्याध्वश्रमापन्नखेदापनुत्तिनिमित्तमधिवसतु देवः।

यत्र

वायुस्कन्धमवष्टभ्य स्फारितैः पुष्पलोचनैः।
वियद्विस्तारमेते हि वीक्षन्त इव पादपाः ॥

अपि च येषाम्

स्कन्धशाखान्तरालेषु पश्य जीमूतपङ्क्तयः[1]।
लम्बमाना विलोक्यन्ते चलद्वल्गुलिका इव ॥

येषां च

उच्चैःशाखाग्रसंलग्ना मन्ये नूनं वनौकसाम्।
कुर्वन्ति पुष्पसंदेहं निशि नक्षत्रपङ्क्तयः ॥

इतश्च

एतेषु प्रचण्डपवनाहततरुतलगलितसुगन्धिविविधविकचकुसुमप्रकरमकरन्दमापीय पुनः शिखरशाखाभिमुखमुत्पतन्त्यो विभान्ति दुरारोहतया कृताः केनापि निश्रेण्य इव श्रेण्यो मधुलिहाम्।

इतश्च

निश्चलानां सैन्यभयेन तुङ्गतरुशिखरपञ्जरपुञ्जितगोलाङ्गूलमण्डलानां निर्यन्नवप्ररोहाङ्कुराकारा[2] कुर्वन्ति वनदेवतानां क्रीडान्दोलनदोलारज्जुशङ्कामधोविलम्बिलाङ्गूललतिकाः।

इतश्च

चकासत्युड्डीयमानास्तरुशिरःशिखरशाखाग्रस्खलनविलग्नग्रहगणविमानपङ्क्तिपताका इव विहगावलयो निश्चलम्।

---

१ मेघावलयः।

२ अतिलोमशत्वान्निर्यन्नवप्ररोहाङ्कुर आकारो यासाम्।

इतश्च

विकसितसितपुष्पपिण्डपाण्डुरशिखराः, सुधाधवलितोर्ध्वभूमयो विलासप्रासादा इव कुसुमसायकस्य, जराधवलमौलयः कञ्चुकिन इव वनदेवतानाम्, उन्मादयन्ति मनोऽमन्दमुचुकुन्दपादपाः।

तदेवं विधेपून्मिषन्मुकुलविगलितबहलमकरन्दसीकरासारसुरभितभूतलेषु मुग्धमृगपरिहृतदावानलज्वालायमानोन्मदशवरसीमन्तिनीचरणप्रहारविकसिताशोककाननेषु नवजलधरनिकुरम्बकान्तितमालतरुशिरःस्थितशब्दानुमेयमाद्यन्मयूरमण्डलेषु मदनालसपुलिन्दराजसुन्दरीशिक्ष्यमाणवनकपोतकुक्कुटकुक्कुहकुलकुहरितेषु कूजत्कुररपरिवारितसरःपरिसरेषु चलच्चकोरसारसरवरमणीयेषु विहरतु देवः सह सैन्येन नर्मदोर्म्मिमन्दानिलान्दोलितलतापल्लवेषु वनेषु।

राजापि श्रुतशीलेन दर्शितांस्तांस्तानुद्देशानवलोक्य चिन्तितवान्।

कृतक्रीडाः क्रोडैर्मदकलकुरङ्गीहृतमृगाः
परिभ्राम्यद्भृङ्गाः परभृतकुलाक्रान्ततरवः।
वनोद्देशाः पौष्पैः सुरभितदिगन्ताः परिमलै-
र्न चेतः कस्यैते विलसितविकारं विदधति॥

इतश्च

वीचीनां निचयाः स्पृशन्ति जलदानुद्गन्धिसौगन्धिका
नृत्यत्केकिकदम्बकानि विकसद्वीरुन्धि रोधांसि च।
धत्ते सैकतमुन्नदन्मदकलक्रौञ्चावलीसारसा-
नस्याः पद्मपरागपिङ्गमहसः सेव्यं च सिन्धोर्न किम्॥

[ नलचम्वाः ]

# २५—चन्द्रोदयवर्णनम्

अथ क्रमेण पूर्वपयोधिपुलिनाद्राजहंस इव गगनमन्दाकिनीमुच्चलितः, केसरिकिशोर इवोदयगिरिगुहागह्वरात्तिमिरकरियूथपपृष्ठलग्नः, स्फटिकमयः पूर्णकुम्भ इव जगद्विजयप्रस्थानस्थितस्य मङ्गलाय मकरकेतोः केनापि सज्जीकृतः, श्रीखण्डपिण्ड इव मण्डनाय महेन्द्रदिशा हस्तश्लेषोपलालितः, शङ्खिकापुष्पस्तबक इव गगनश्रिया श्रवणे संयोजितः, कुम्भ इवैकः प्राचीवनविहारिसुरकरीन्द्रस्य प्रकटतां गतः, वासरविरामवल्लीमुल्लूय कन्द इवोद्धृतो निशाशबरिकया, पाण्डुपुष्पाहृतगुञ्जापुञ्ज इव सिद्धवधूभिरुदयाचलचतुष्पथे विरचितः, गण्डशैल इव कैलासशिखराल्लुठित्वागतः, सीमन्तमौक्तिकमिव पूर्वदिङ्मुखस्य, सितातपत्रमिव पूर्वाशाधिपतेः पुरन्दरस्य, क्रीडामौक्तिककन्दुक इव कालकुमारस्य, क्षीरडिण्डीरपिण्डसदृशो दृष्टिपथमवततार तारापतिः। तदनु च

मदनमिति युवानं यौवराज्येऽभिषिञ्च-<br>
न्कृतकुमुदविकासो भासयन्दिङ्मुखानि।<br>
इममृततरङ्गैः प्लावयञ्जीवलोकं<br>
गगनमवजगाहे मन्दमन्दं मृगाङ्कः॥

तदनन्तरम् आप्लावितमिव मुक्तमर्यादेन दुग्धवारिधिना, सिक्तभूभागाङ्गणमिवामन्दचन्दनाम्बुच्छटाभिः, विलिप्तदिग्भित्तिकमिव सान्द्रसुधापङ्कपिण्डितैः, पूरितमिवोत्सर्पिकर्पूरपांसुवृष्ट्या, प्रविष्टमिव स्फाटिकमणिमहामन्दिरोदरदरीम्, उत्प्लवमानमिव द्रवीभूततुहिनाचलमहाप्लवेन भुवनमासीत्।

ततश्च

कैलासायितमद्रिभिर्विटपिभिः श्वेतातपत्रायितं<br>
मृत्पङ्केन दधीयितं जलनिधौ दुग्धायितं वारिभिः।

मुक्ताहारलतायितं व्रततिभिः शङ्खायितं श्रीफलैः
श्वेतद्वीपजनायितं जनपदैर्जाते शशाङ्कोदये ॥

अपि च

सर्वेऽपि पक्षिणो हंसाः सर्वेऽप्यैरावता गजाः ।
जाताश्चन्द्रांशुभिः सर्वे रौप्यपुञ्जाः शिलोच्चयाः ॥

अपि च

सुधापङ्कोपलिप्तेव बद्धेव स्फटिकोपलैः ।
विलीनहिमदिग्धेव मेदिनी ज्योत्स्नया कृता ॥

[ नलचम्प्वाः ]

---

## १६—वर्षासमयवर्णनम्

एकदा तु कतिपयमासापगमे काकलीगायन इव समृद्धनिम्नगानदः, सायंतनसमय इव नर्तितनीलकण्ठः, कुमारमयूरइव समारूढशरजन्मा, तपस्वीव प्रशमितरजःप्रसरः, तापस इव धृतजलदकरकः, प्रलयकाल इव दर्शितानेकतरणिविभ्रमः, निरुपद्रवकाननप्रदेश इव घनोत्सेकितसारङ्गः, रेवतीकरपल्लव इव हलधृतिकरः, लङ्केश्वर इव समेघनादः, विन्ध्य इव घनश्यामः, युवतिजन इव पीनपयोधरः समाजगाम वर्षासमयः। विभिन्नमेघनीलोत्पलकाननीले क्रीडासरसीव नभसि स्मरस्य कनकरत्ननौकेव, जलदकाललक्ष्मीमातङ्गकन्यानर्तनरज्जुरिव, नभःसौधतोरणरत्नमालिकेव, प्रवसता निदाघेन दिवः पयोधरे स्मारणाय दत्ता नखपदावलिरिव, गगनलक्ष्मीबन्धुररशनामालेव, नभोमन्दारसुन्दरकलिकेव, रतिनखमार्जनरत्नशलाकेव, रत्नमयी विलासयष्टिरिव कुसुमकेतोरिन्द्रधनुर्लता रराज।

अतितृष्णावेगपीतजलनिधिजलशङ्खमालां वलाकाच्छलादुद्वमन्निवादृश्यत जलधरनिकरः। पीतहरितैः कृष्णकेदारिका कोष्ठिकासु समुत्पतद्भिर्दर्दुरशिशुकैर्जातुषैर्नयद्यूतैरिव चिक्रीड विद्युता समं घनकालः। रविदीपकज्जलितमेघनिकषोपले मेघसमयस्वर्णकारकषितस्वर्णरेखेव तडिदशोभत। विरहिणां हृदयं विदारयितुं कृतं करपत्रमिव कुसुमायुधस्य केतकीपुष्पमभासत। जलददारुणि लोलतडिल्लताकरपत्रदारिते पवनवेगनिर्धूताश्चूर्णनिकरा इव जलकणा बभुः। विच्छिन्नदिग्वधूहारमुक्तानिकरा इव, खरपवनवेगभ्रमितघनघरट्टघट्टनसंचूर्णिततारानिकरा इव, त्रिभुवनविजिगीषोर्मकरध्वजस्य प्रस्थानलाजाञ्जलय इव करका व्यराजन्त। नवशाद्वलं सेन्द्रगोपं महीमहिलायाः शुकाङ्गश्यामलं लाक्षारसाङ्कितं स्तनोत्तरीयमिवालक्ष्यत।

[ वासवदत्तायाः ]

---

## २७—प्रस्थानभेदः

अथ सर्वेषां शास्त्राणां भगवत्येव तात्पर्यं साक्षात्परम्परया वेति समासेन तेषां प्रस्थानभेदोऽत्रोद्दिश्यते। तथाहि—

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति वेदाश्चत्वारः। शिक्षा व्याकरणं निरुक्तं छन्दो ज्यौतिषं कल्प इति वेदाङ्गानि षट्। पुराणन्यायमीमांसाधर्मशास्त्राणि चेति चत्वार्युपाङ्गानि। अत्रोपपुराणानामपि पुराणेऽन्तर्भावः, वैशेषिकशास्त्रस्य न्याये, वेदान्तशास्त्रस्थमीमांसायाम्, महाभारतरामायणयोः सांख्यपातञ्जलपाशुपतवैष्णवादीनां च धर्मशास्त्रे। एवं मिलित्वा चतुर्दशविद्याः। तथा चोक्तं याज्ञवल्क्येन—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ इति।

एता एव चतुर्भिरुपवेदैः सहिता अष्टादश विद्या भवन्ति। आयुर्वेदो धनुर्वेदो गन्धर्ववेदोऽर्थशास्त्रं चेति चत्वार उपवेदाः। सर्वेषां चास्तिकानामेतावन्त्येव शास्त्रप्रस्थानानि, अन्येषामप्येकदेशिनामेतेष्वेवान्तर्भावात्।

ननु—नास्तिकानामपि प्रस्थानान्तराणि सन्ति, तान्येतेष्वनन्तर्भावात्पृथग्गणयितुमुचितानि। तथाहि—शून्यवादेनैकं प्रस्थानं माध्यमिकानाम्। क्षणिकविज्ञानमात्रवादेनान्यद्योगाचाराणाम्। ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादेनापरं सौत्रान्तिकानाम्। प्रत्यक्षसलक्षणक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणाम्। एवं सौगतानां प्रस्थानचतुष्टयम्। तथा देहात्मवादेनैकं प्रस्थानं चार्वाकाणाम्। एवं देहातिरिक्तदेहपरिमाणात्मवादेन द्वितीयं प्रस्थानं दिगम्बराणाम्। एवं मिलित्वा नास्तिकानां षट् प्रस्थानानि। तानि कस्मान्नोच्यन्ते। सत्यम्; वेदबाह्यत्वात्तेषां म्लेच्छादिप्रस्थानवत्परम्परयापि पुरुषार्थानुपयोगित्वादुपेक्षणीयत्वमेव। इह च साक्षाद्वा परम्परया वा पुमर्थोपयोगिनां वेदोपकरणानामेव प्रस्थानानां भेदो दर्शितः। ततो न न्यूनत्वशङ्कावकाशः।

अथ संक्षेपेणैषां प्रस्थानानां स्वरूपभेदे हेतुः प्रयोजनभेद उच्यते बालानां व्युत्पत्तये—

तत्र धर्मब्रह्मप्रतिपादकमपौरुषेयं प्रमाणवाक्यं वेदः। स च मन्त्रब्राह्मणात्मकः। तत्र मन्त्रा अनुष्ठानकारणभूतद्रव्यदेवताप्रकाशकाः। तेऽपि त्रिविधा ऋग्यजुःसामभेदात्। तत्र पादबद्धगायत्र्यादिच्छन्दोविशिष्टा ऋचः "अग्निमीले पुरोहितम्" इत्याद्याः। ता एव गीतिविशिष्टाः सामानि। तदुभयविलक्षणानि यजूंषि। "अग्नीदग्नीन्विहर" इत्यादिसंबोधनरूपा निगदमन्त्रा अपि यजुरन्तर्भूता एव। तदेवं निरूपिता मन्त्राः।

ब्राह्मणमपि त्रिविधं :विधिरूपमर्थवादरूपं तदुभयविलक्षणरूपं चेति। तत्र शब्दभावना विधिरिति भाट्टाः। नियोगो विधिरिति प्राभा-

कराः। इष्टसाधनता विधिरिति तार्किकादयः सर्वे। विधिरपि चतुर्विध उत्पत्त्यधिकारविनयोगप्रयोगभेदात्। तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः, "आग्नेयोऽष्टाकपालो भवति" इत्यादिः। सेतिकर्तव्यताकस्य करणस्य यागादेः फलसम्बन्धबोधको विधिरधिकारविधिः, "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिः। अङ्गसंबन्धबोधको विधिर्विनियोगविधिः, 'व्रीहिभिर्यजेत", "समिधो यजति" इत्यादिः। साङ्गप्रधानकर्मप्रयोगैक्यबोधकः पूर्वोक्तविधित्रयमेलनरूपः प्रयोगविधिः।

प्राशस्त्यनिन्दान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः। स च त्रिविधः—गुणवादोऽनुवादो भूतार्थवादश्चेति।

तत्र प्रमाणान्तरविरुद्धार्थबोधको गुणवादः "आदित्यो यूपः" इत्यादिः। प्रमाणान्तरप्राप्तार्थबोधकोऽनुवादः "अग्निर्हिमस्य भेषजम्" इत्यादिः। प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः "इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादिः।

विध्यर्थवादोभयविलक्षणं तु वेदान्तवाक्यम्। तच्चाज्ञातज्ञापकत्वेऽप्यनुष्ठानाप्रतिपादकत्वान्न विधिः, स्वतःपुरुषार्थपरमानन्दज्ञानात्मकब्रह्मणि स्वार्थे उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गवत्तया स्वतः प्रमाणभूतम्, सर्वानपि विधीनन्तःकरणशुद्धिद्वारा स्वशेषतापादयत् अन्यशेषत्वाभावाच्च नार्थवादः। तस्मादुभयविलक्षणमेव वेदान्तवाक्यम्। तच्च क्वचिदज्ञातज्ञापकत्वमात्रेण विधिरिति व्यपदिश्यते,-विधिपदरहितप्रमाणवाक्यत्वेन क्वचिद् भूतार्थवाद इति व्यवह्रियते इति न दोषः।

तदेवं निरूपितं त्रिविधं ब्राह्मणम्। एवं च कर्मकाण्डब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः।

स च प्रयोगत्रयेण यज्ञनिर्वाहार्थमृग्यजुःसामभेदेन भिन्नः। तत्रहौत्रप्रयोगः ऋग्वेदेन, आध्वर्यवप्रयोगो यजुर्वेदेन, औद्गात्रप्रयोगः

सामवेदेन । ब्राह्मयाजमानप्रयोगौ त्वत्रैवान्तर्भूतौ । अथर्ववेदस्तु यज्ञानुपयुक्तः शान्तिपौष्टिकाभिचारादिकर्मप्रतिपादकत्वेनात्यन्तविलक्षण एव । एवं प्रवचनभेदात्प्रतिवेदं भिन्ना भूयस्यः शाखाः । एवं च कर्मकाण्डे व्यापारभेदेऽपि सर्वासां वेदशाखानामेकरूपत्वमेव ब्राह्मकाण्डे । इति चतुर्णां वेदानां प्रयोजनभेदेन भेद उक्तः ।

अथाङ्गानामुच्यते । तत्र शिक्षाया उदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यञ्जनात्मकवर्णोच्चारणविशेषज्ञानं प्रयोजनम्, तदभावे मन्त्राणामनर्थकत्वात् । तथा चोक्तम्—

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ इति ॥

तत्र सर्ववेदसाधारणी शिक्षा 'अथ शिक्षां प्रवक्ष्यामि" इत्यादिपञ्चखण्डात्मिका पाणिनिना प्रकाशिता, प्रतिवेदशाखं च भिन्नरूपा प्रातिशाख्यसंज्ञिता अन्यैरेव मुनिभिः प्रदर्शिता ।

एवं वैदिकपदसाधुत्वज्ञानेनोहादिकं व्याकरणस्य प्रयोजनम् । तच्च "वृद्धिरादैच" इत्याद्यध्यायाष्टकात्मकं महेश्वरप्रसादेन भगवता पाणिनिनैव प्रकाशितम् । तत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्त्तिकं विरचितम् । तद्वार्त्तिकस्योपरि च भगवता मुनिना पतञ्जलिना महाभाष्यमारचितम् । तदेतत्त्रिमुनिव्याकरणं वेदाङ्गं माहेश्वरमित्याख्यायते । कौमारादिव्याकरणानि तु न वेदाङ्गानि, किं तु लौकिकप्रयोगमात्रज्ञानार्थानीत्यवगन्तव्यम् ।

एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणपदसाधुत्वज्ञाने, वैदिकमन्त्रपदानामर्थज्ञानाकाङ्क्षायां तदर्थं भगवता यास्केन "समाम्नायः समाम्नातः स व्याख्यातव्यः" इत्यादित्रयोदशाध्यायात्मकं निरुक्त-

मारचितम्। तत्र च नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निरूप्य वैदिकमन्त्रपदानामर्थः प्रकाशितः। मन्त्राणां चानुष्ठेयार्थप्रकाशनद्वारेणैव करणत्वात्पदार्थज्ञानाधीनत्वाच्च वाक्यार्थज्ञानस्य मन्त्रस्थपदार्थज्ञानाय निरुक्तमवश्यमपेक्षितम्, अन्यथानुष्ठानासंभवत्। "सृण्येवजर्भरी तुर्फरीतू" (ऋ० वे० १०।१०।६।६) इत्यादिदुरूहाणां प्रकारान्तरेणार्थज्ञानस्यासंभावनीयत्वाच्च। एवं निघण्टवोऽपि वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव। तत्रापि निघण्टुसंज्ञकः पञ्चाध्याय्यात्मको ग्रन्थो भगवता यास्केनैव कृतः।

एवमृङ्मन्त्राणां पादबद्धच्छन्दोविशेषविशिष्टत्वात्तदज्ञाने च निन्दाश्रवणाच्छन्दोविशेषनिमित्तानुष्ठानविशेषविधानाच्च च्छन्दोज्ञानाकाङ्क्षायां तत्प्रकाशनाय "धीः श्रीः स्त्रीम्" इत्याद्यष्टाध्याय्यात्मिका च्छन्दोविवृतिर्भगवता पिङ्गलेन विरचिता। "तत्राप्यलौकिकम्" इत्यादिनाध्यायत्रयेण गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीति सप्तच्छन्दांसि सावान्तरभेदानि निरूपितानि। "अथ लौकिकम्" इत्यारभ्याध्यायपञ्चकेन पुराणेतिहासादावुपयोगीनि लौकिकानि च्छन्दांसि प्रसङ्गान्निरूपितानि- व्याकरणे लौकिकपदनिरूपणवत्।

एवं वैदिककर्माङ्गदर्शादिकालज्ञानाय ज्यौतिषं भगवतादित्येन गर्गादिभिश्च प्रणीतं बहुविधमेव।

शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञानाय कल्पसूत्राणि। तानि च प्रयोगत्रयभेदात्त्रिविधानि। तत्र हौत्रप्रयोगप्रतिपादकान्याश्वलायनशाङ्खायनादिप्रणीतानि, आध्वर्यवप्रयोगप्रतिपादकानि बोधायनापस्तम्बकात्यायनादिप्रणीतानि औद्गात्रप्रयोगप्रतिपादकानि लाट्यायनद्राह्यायणादिप्रणीतानि।

एवं निरूपितः षण्णामङ्गानां प्रयोजनभेदः। चतुर्णामुपाङ्गानामधुनोच्यते—

तत्र सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितप्रतिपादकानि भगवता

वादरायणेन कृतानि पुराणानि। तानि च ब्राह्मं पाद्मं वैष्णवं शैवं भागवतं नारदीयं मार्कण्डेयमाग्नेयं भविष्यं ब्रह्मवैवर्तं लैङ्गं वाराहं स्कान्दं वामनं कौर्मं मात्स्यं गारुडं ब्राह्माण्डं चेत्यष्टादश।

आद्यं सनत्कुमारेण प्रोक्तं वेदविदां वराः।
द्वितीयं नारसिंहाख्यं तृतीयं नान्दमेव च॥
चतुर्थं शिवधर्माख्यं दौर्वासं पञ्चमं विदुः।
षष्ठं तु नारदीयाख्यं कापिलं सप्तमं विदुः॥
अष्टमं मानवं प्रोक्तं ततश्चोशनसेरितम्।
ततो ब्रह्माण्डसंज्ञं तु वारुणाख्यं ततः परम्॥
ततः कालीपुराणाख्यं वासिष्ठं मुनिपुंगवाः।
ततो वासिष्ठलैङ्गाख्यं प्रोक्तं माहेश्वरं परम्॥
ततः साम्वपुराणाख्यं ततः सौरं महाद्भुतम्।
पाराशरं ततः प्रोक्तं मारीचाख्यं ततः परम्॥
भार्गवाख्यं ततः प्रोक्तं सर्वधर्मार्थसाधकम्।

एवमुपपुराणान्यनेकप्रकाराणि द्रष्टव्यानि।

न्यायः आन्वीक्षिकी पञ्चाध्यायी गौतमेन प्रणीता। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानाख्यानां षोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञानं तस्याः प्रयोजनम्। एवं दशाध्याय्यात्मकं शास्त्रं कणादेन प्रणीतम्। द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानामभावसप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य प्रयोजनम्। एतदपि न्यायपदेनोक्तम्।

एवं मीमांसा द्विविधा कर्ममीमांसा शारिरकमीमांसा चेति। तत्र द्वादशाध्यायी कर्ममीमांसा "अथातो धर्मजिज्ञासा" इत्यादिः "अन्वाहार्ये च दर्शनात्" इत्यन्ता भगवता जैमिनिना प्रणीता। तत्र धर्मप्रमाणम्, धर्मभेदाभेदौ, शेषशेषिभावः, क्रत्वर्थभेदेन प्रयुक्तिविशेषः,

श्रुत्यर्थपठनादिभिः क्रमभेदः, अधिकारविशेषः, सामान्यातिदेशः, विशेषातिदेशः, ऊहः, बाधः, तन्त्रम् , प्रसङ्गश्चेति क्रमेण द्वादशानामध्यायानामर्थः, । तथा संकर्षणकाण्डमप्यध्यायचतुष्टयात्मकं जैमिनिप्रणीतम् । तच्च देवताकाण्डसंज्ञया प्रसिद्धमप्युपासनाख्यकर्मप्रतिपादकत्वात्कर्ममीमांसान्तर्गतमेव ।

तथा चतुरध्यायी शारीरकमीमांसा "अथातो ब्रह्मजिज्ञासा" इत्यादिः "अनावृत्तिः शब्दात्" इत्यन्ता जीवब्रह्मैकत्वसाक्षात्कारहेतुः श्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता । तत्र सर्वेषामपि वेदान्तवाक्यानां साक्षात्परंपरया वा प्रत्यगभिन्नाद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयः प्रथमाध्यायेन प्रदर्शितः । एवं वेदान्तानामद्वितीये ब्रह्मणि सिद्धे समन्वये, तत्र संभावितं स्मृतितर्कादिविरोधमाशङ्क्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः । तृतीयेऽध्याये साधननिरूपणम् । चतुर्थेऽध्याये सगुणनिर्गुणविद्ययोः फलविशेषनिर्णयः कृतः । इदमेव सर्वशास्त्राणां मूर्धन्यम् । शास्त्रान्तरं सर्वमस्यैव शेषभूतमितीदमेव मुमुक्षुभिरादरणीयं श्रीशंकरभगवत्पादोक्तप्रकारेणेति रहस्यम् ।

एवं धर्मशास्त्राणि मनुयाज्ञवल्क्यविष्णुयमाङ्गिरोवसिष्ठदक्षसंवर्तशातातपपराशरगौतमशङ्खलिखितहारीतापस्तम्बोशनोव्यासकात्यायन-बृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि । एवं व्यासकृतं महाभारतं रामायणं च धर्मशास्त्र एवान्तर्भूतं स्वयमितिहासत्वेन प्रसिद्धम् । सांख्यादीनां धर्मशास्त्रान्तर्भावेऽपीह स्वशब्देनैव निर्देशात्पृथगेव संगतिर्वाच्या ।

अथ वेदचतुष्टयस्य क्रमेण चत्वार उपवेदाः । तत्रायुर्वेदस्याष्टौ स्थानानि भवन्ति । सूत्रं शारीरमैन्द्रियं चिकित्सा निदानं विकल्पः सिद्धिश्चेति । ब्रह्मप्रजापत्यश्विधन्वन्तरीन्द्रभरद्वाजात्रेयाग्निवेश्यादिभिरुपदिष्टश्चरकेण संक्षिप्तः । तत्रैव सुश्रुतेन पञ्चस्थानान्तरं कृतम् ।

एवं वाग्भटादिनापि बहुधेति न शास्त्रभेदः। कामशास्त्रमप्यायुर्वेदान्तर्गतमेव, तत्रैव सुश्रुतेन वाजीकरणाख्यकामशास्त्राभिधानात्। तत्रवात्स्यायनेन पञ्चाध्याय्यात्मकं कामशास्त्रं प्रणीतम्। तस्य च विषयवैराग्यमेव प्रयोजनम्, शास्त्रोद्दीपितमार्गेणापि विषयभोगे दुःखमात्रपर्यवसानात्। चिकित्साशास्त्रस्य रोगतत्साधनरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम्।

एवं धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः। तत्र प्रथमो दीक्षापादः, द्वितीयः संग्रहपादः, तृतीयः सिद्धिपादः, चतुर्थः प्रयोगपादः। तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणं च कृतम्। अत्र धनुःशब्दश्चापे रूढोऽपि धनुर्विधायुधे प्रवर्तते। तच्चतुर्विधं मुक्तममुक्तं मुक्तामुक्तं यन्त्रमुक्तं चेति। मुक्तं चक्रादि। अमुक्तं खङ्गादि। मुक्तामुक्तं शल्यावान्तरभेदादि। यन्त्रमुक्तं शरादि। तत्रमुक्तमस्त्रमुच्यते। अमुक्तं शस्त्रमित्युच्यते। तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादिभेदादनेकविधम्। सर्वेषां शस्त्रविशेषाणामाचार्यस्य च लक्षणपूर्वकं संग्रहणप्रकारो दर्शितो द्वितीयपादे। गुरुसंप्रदायसिद्धानां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणमपि निरूपितं तृतीयपादे। एवं देवतार्चनाभ्यासादिभिः सिद्धानामस्त्रविशेषाणां प्रयोगश्चतुर्थपादे निरूपितः। क्षत्रियाणां स्वधर्मयुद्धाचरणदुष्टस्य दण्डश्चोरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम्। एवं च ब्रह्मप्रजापत्यादिक्रमेण विश्वामित्रप्रणीतं धनुर्वेदशास्त्रम्।

एवं गान्धर्ववेदशास्त्रं भगवता भरतेन प्रणीतम्। गीतवाद्यनृत्तभेदेन बहुविधोऽर्थः। देवताराधननिर्विकल्पकसमाध्यादिसिद्धिश्च गान्धर्ववेदस्य प्रयोजनम्।

एवमर्थशास्त्रं च बहुविधं नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं सूपकारशास्त्रं चतुःषष्टिकलाशास्त्रं चेति। नानामुनिभिः प्रणीतं तत्सर्वम्। अस्य च सर्वस्य लौकिकवत्प्रयोजनभेदो द्रष्टव्यः।

एवमष्टादशविद्यास्त्रयीशब्देनोक्ताः, अन्यथा न्यूनताप्रसङ्गात् ।

तथा सांख्यशास्त्रं भगवता कपिलेन प्रणीतम् "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इत्यादि षडध्याय्यात्मकम् । तत्र प्रथमेऽध्याये विषया निरूपिताः । द्वितीयेऽध्याये प्रधानकार्याणि । तृतीयेऽध्याये विषयेभ्यो वैराग्यम् । चतुर्थेऽध्याये विरक्तानां पिङ्गलाकुररादीनामाख्यायिकाः । पञ्चमेऽध्याये परपक्षनिर्णयः । सर्वार्थसंक्षेपः । प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्रस्य प्रयोजनम् ।

तथा योगशात्रं भगवता पतञ्जलिना प्रणीतम् "अथ योगानुशासनम्" इत्यादि पादचतुष्टयात्मकम् । तत्र प्रथमपादे चित्तवृत्तिनिरोधात्मकः समाधिरभ्यासवैराग्यरूपं च तत्साधनं निरूपितम् । द्वितीये पादे विक्षिप्तचित्तस्यापि समाधिसिद्ध्यर्थं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि निरूपितानि । तृतीये पादे योगिविभूतयः । चतुर्थपादे कैवल्यमिति । तस्य च विजातीयप्रत्ययनिरोधद्वारेण निदिध्यासनसिद्धिः प्रयोजनम् ।

तथा पशुपतिमतं पाशुपतं शास्त्रं पशुपतिना पशुपाशविमोक्षणाय "अथातः पाशुपतं योगविधिं व्याख्यास्यामः" इत्यादि पञ्चाध्यायं विरचितम् । तत्राध्यायपञ्चकेनापि कार्यरूपो जीवः पशुः, कारणं पशुपतिरीश्वरः, योगः पशुपतौ चित्तसमाधानम्, विधिर्भस्मना त्रिषवणस्नानादिर्निरूपितः, दुःखान्तान्तसंज्ञो मोक्षश्च प्रयोजनम् । एत एव कार्यकारणयोगविधिदुःखान्ता इत्याख्यायन्ते ।

एवं वैष्णवं नारदादिभिः कृतं पञ्चरात्रम् । तत्र वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः पदार्था निरूपिताः । भगवान्वासुदेवः सर्वकारणं परमेश्वरः । तस्मादुत्पद्यते संकर्षणाख्यो जीवः । तस्मान्मनः प्रद्युम्नः । तस्मादनिरुद्धोऽहंकारः । सर्वे चैते भगवतो वासुदेवस्यैवांशभूतास्तदभिन्ना एवेति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिराराधनं कृत्वा कृतकृत्यो भवतीत्यादि च निरूपितम् ।

तदेवं दर्शितः प्रस्थानभेदः। सर्वेषां च संक्षेपेण त्रिविध एव प्रस्थानभेदः, तत्रारम्भवाद एकः, परिणामवादो द्वितीयः, विवर्तवादस्तृतीयः। पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो द्व्यणुकादिक्रमेण ब्रह्माण्डपर्यन्तं जगदारभन्ते, असदेव कार्यं कारकव्यापारादुत्पद्यत इति प्रथमस्तार्किकाणां मीमांसकानां च। सत्त्वरजस्तमोगुणात्मकं प्रधानमेव महदहंकारादिक्रमेण जगदाकारेण परिणमते, पूर्वमपि सूक्ष्मरूपेण सदेव कार्यकारणव्यापारेणाभिव्यज्यते इति द्वितीयः पक्षः सांख्ययोगपातञ्जलपाशुपतानाम्। ब्रह्मणः परिणामो जगदिति वैष्णवानाम्। स्वप्रकाशपरमानन्दाद्वितीयं ब्रह्म स्वमायावशान्मिथ्यैव जगदाकारेण कल्पत इति तृतीयः पक्षो ब्रह्मवादिनाम्। सर्वेषां प्रस्थानकर्तृणां मुनीनां विवर्तवादपर्यवसानेनाद्वितीये परमेश्वरे प्रतिपाद्ये तात्पर्यम्। नहि ते मुनयो भ्रान्ताः, सर्वज्ञत्वात्तेषाम्। किं तु बहिर्विषयप्रवणानामापाततः पुरुषार्थे प्रवेशो न संभवतीति नास्तिक्यवारणाय तैः प्रकारभेदाः प्रदर्शिताः। तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तात्पर्यमुत्प्रेक्षमाणास्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना नानापथजुषो भवन्तीति सर्वमनवद्यम्।

---

# २८---वेदस्वरूपं वेदशाखाश्च

अथ वेदो नाम वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षा अनेनेति व्युत्पत्त्या चतुर्वर्गज्ञानसाधनभूतो ग्रन्थविशेषः। करणे घञ् बाहुलकात्। स च किंलक्षण इति चेत् 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' ( प्रतिज्ञासूत्रपरिशिष्टे १।२ ) इति आगमोक्तं तल्लक्षणं वेदितव्यम्। यो ह्यव्यभिचरितस्वरवर्णादिपठनपाठनक्रमागतः सन्सर्वकालं सर्वदेशेषु प्रतिशाखविभागेन वर्त्तमानः स एको मन्त्रराशिः। अपरस्तु विधिनिन्दाप्रशंसा-

सम्प्रश्नाख्यानादिभिस्तस्यैव प्रायो विनियोगप्रख्यापक उपव्याख्यानभूतो वाक्यनिचयो ब्राह्मणराशिः। अनयोरेकसङ्ग्रहो वेद इत्यभिधीयते।

वेदनिबन्धेषु मन्त्रब्राह्मणभागौ परस्परमसम्मिश्रावेव प्रायः पठ्येते। क्वचित्तु ब्राह्मणसम्मिश्रितोऽपि मन्त्रभागः पठितोऽस्ति। एवमुभयात्मकोऽपि विध्यर्थवादमन्त्ररूपेण त्रिधा व्यवस्थितोऽयं वेदराशिरेकमूल एककर्मलक्षणफलो महाकल्पवृक्षो वरीवर्त्ति। अस्य च फलभूतं कर्म्म विधिना विहितमर्थवादेन प्ररोचितं मन्त्रेण च स्मृतं सदभ्युदयकारि भवति।

ननु प्रतिशाखं यज्ञकर्म्माणि भिद्यन्ते, तत्कथमेककर्म्मफलोऽयं वेदकल्पवृक्ष इत्युच्यते। नैष दोषः। अवान्तराकृतिभेदेऽपि कर्म्मजातिव्यञ्जकप्रधानाकृतिभेदाभावात्। नह्येकस्यां शाखायां विहितस्यादिकर्मणः स्थाने विजातीयस्य ग्रहयज्ञादेरपरस्यां शाखायां विधानमस्ति। तस्मान्न प्रतिशाखं कर्मभेद इति मन्तव्यम्। यदि प्रतिशाखं बदरामलकादिवज्जात्यैव कर्म्मभेदः स्यात् तदा एकमूलाभावादादित एवारभ्य भिद्यमानत्वाद् वृक्षान्तरवद्वेदान्तराण्येवोच्येरन् न शाखान्तराणि। तस्मादेकमूलः समानफलोऽयं वेदकल्पशाखीत्याहुः।

सर्वार्थवेदको वेदश्चतुर्धा भिद्यते क्रमात्।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥ इति।

यद्यपि बहुषु श्रुतिस्मृत्यादिवाक्येषु वेदत्रयी संकीर्त्यते, न तु चतुर्थोऽथर्वणवेदः। तथापि ब्रह्मवेदशब्देन चतुर्थस्याथर्वणवेदस्यापि मुण्डकोपनिषदि[१] श्रवणात् स्मृतिपुराणादिष्वपि बहुशः संकीर्त्तनाच्च चतु-

१ 'तस्मै स होवाच। द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।' (मु० उ० १।४–५)।

द्धत्युक्तम्। तथा चरणव्यूहेऽपि 'अथातश्चरणव्यूहं व्याख्यास्यामः। तत्र निरुक्तं चातुर्विध्यं चत्वारो वेदा विज्ञाता भवन्ति (च० १) इति स्थितम्। तथा व्याकरणमहाभाष्ये पतञ्जलिनाप्युक्तम् महान् शब्दस्य प्रयोगविषयः—सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधाभिन्ना एकशतमध्वर्यु[1]शाखाः सहस्रवर्त्मा सामवेद-एक विंशतिधा बह्वृचा[2] नवधाऽथर्वणो वेदः' (महा० पस्पशाह्नि०) इति। एवं वेदस्य चातुर्विध्यं[3] अष्टके—अध्याये १० वर्गे श्रूयमाणया ऋचाप्यभिधीयते।

चत्वारि शृङ्गा त्रयो अस्य पदा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्याँ आ विवेश॥

(ऋ०४।५८।३) इति। अत्र निरुक्ते 'चत्वारि शृङ्गेति वेदा वा एते उक्ताः' (नि०परिशि०१३।७) इति यास्केनोक्तम्। वेदभाष्ये सायणाचार्येणापि तथैव भाषितमित्यलम्।

## ऋग्वेदमानं तच्छाखाश्च

तत्र तावदृग्वेदस्य मानमुक्तं चरणव्यूहे—
ऋचा दश सहस्राणि ऋचां पञ्च शतानि च।
ऋचामशीतिः पादश्च (१०५८०) तत्पारायणमुच्यते॥ (च० १) इति।

अस्य च वेदस्य पञ्च शाखाः सन्ति। शाकला वाष्कला आश्वलायनाः शाङ्खायना माण्डूकाश्चेति। तथा चोक्तं शौनकीये प्रातिशाख्ये[3]।

१ अध्वर्युर्यजुर्वेदः।

२ 'बाहवृच्यम्' इति पाठभेदः।

३ शौनकीयऋग्वेदप्रातिशाख्यस्य मुद्रितपुस्तकेषु अयं पाठो नोपलभ्यते।

ऋचां समूहो ऋग्वेदस्तमभ्यस्य प्रयत्नतः।
पठितः शाकलेनादौ चतुर्भिस्तदनन्तरम्॥
शाङ्खाश्वलायनौ चैव माण्डूको बाष्कलस्तथा।
बह्वृचा ऋषयः सर्वे पञ्चैते एकवेदिनः॥

अत्र शाकलादिषु ऋषिशब्दो गौणो, न तु मुख्यः। आश्वलायनगृह्ये देवर्ष्याचार्यतर्पणविधिविधायके सूत्रे[१] शाकलादीनामृषिष्वपरिगणनादाचार्येषु गणनाच्च। एवमैतरेयि, कौषीतकि, शैशिरि पैङ्गीत्यादयोऽन्येऽपि ऋग्वेदस्य शाखाभेदाः क्वचिदुपलभ्यन्ते। तथा विष्णुपुराणेऽप्युक्तम्—

मुद्गलो गोकुलो वात्स्यः शैशिरः शिशिरस्तथा।
पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्त्तकाः॥ इति।

तथा व्याकरणमहाभाष्ये 'एकविंशतिधा बह्वृचाः' इति स्थितम् एवं चाध्ययनसंप्रदायप्रवर्त्तकानामेषां शाकलादीनामाचार्याणां प्रवचनभेदः शाखाभेदव्यवहारे कारणम्। ततश्च मन्त्रब्राह्मणात्मकः स्वाध्यायैकः शाखेति पर्यवसितोऽर्थः। सा च शाखा अध्ययनभेदाद्वा सूत्रभेदाद्वा भिद्यते। एकस्मिन्नेव वेदे मन्त्रब्राह्मणयोरन्यतरभेदेन योऽवान्तरशाखाभेदः, सोऽध्ययनभेदकृतः। यथा शाकलबाष्कलयोर्द्वयोः शाखयोः स्वाध्यायो यत्किंचिद्भिद्यते सूत्रं तु भिन्नाध्ययनयोर्द्वयोरप्याश्वलायनीयमेकमेव। तथा च शाकलबाष्कलयोर्भेदोऽध्ययनभेदकृतः। अथैकस्यां समानपाठायामपि तैत्तिरीयशाखायामवान्तरशाखाभेदो बौधायनापस्तम्बहिरण्यकेशिप्रभृतिसूत्रभेदकृतो वेदितव्यः। एवं प्रवचनभेदात् प्रतिवेदं भिन्ना भूयस्यः शाखाः सन्ति।

प्रवचनशब्दः सूत्रप्रातिशाख्यशिक्षाद्यङ्गवाचकः। तथा च।

---

१ आश्व० गृ० ३।४।४।

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः ॥

( मनु० ३।१८४ ) इति तृतीयाध्यायगतमनुवचनव्याख्यायां कुल्लूकभट्ट आह 'प्रकर्षेणैवोच्यते वेदार्थ एभिरिति प्रवचनान्यङ्गानि' इति । एवं प्रवचनशब्देन ब्राह्मणमप्युच्यते यतस्तेनापि प्रकर्षेण वेदार्थस्य परिभाषणादित्याहुः ।

## ऋग्वेदस्य सूक्तादिरूपेण विभागः सूक्तादिस्वरूपविचारश्च

ऋग्वेदस्य सप्तदशाधिकमेकसहस्रं सूक्तानि । षडधिके द्वे सहस्रे वर्गाः । चतुःषष्टिरध्यायाः । दश मण्डलानि । अष्टौ अष्टकानि इत्येवं विभागः परिकल्पितः ।

तत्र सूक्तलक्षणं यथा बृहद्देवतायाम्[१]—

सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते ।

( बृ० दे० १।१३ ) इति । सम्पूर्णं निराकाङ्क्षं यदृषेर्वेदस्य वाक्यं तत्सूक्तमिति तदर्थः । वैदिकं महावाक्यं सूक्तमिति यावत् । तच्च त्रिविधम् । ऋषिसूक्तम् , दैवतसूक्तम् , छन्दःसूक्तमिति भेदात् । त्रयाणामेषां लक्षणानि बृहद्देवतायां यथा—

ऋषिसूक्तानि यावन्ति सूक्तान्येकस्य वै कृतिः ।
स्तूयेतैका तु यावस्तु तत्सूक्तं दैवतं विदुः ।
समानच्छन्दसो मन्त्राश्छन्दःसूक्तं तदुच्यते ॥

( cp. बृ० दे० १।१२-१६ ) इति ।

तत्र ऋषिसूक्तं यथा—'अग्निमीळे' (ऋ० १।१।१) इत्यारभ्य 'इन्द्रं विश्वा अवीवृधन्' दैवतसूक्तम् ( ऋ० १।११।१ ) इत्यतः प्राग् विंशतिवर्गसमाप्यन्तमेकमृषिसूक्तम् । तावतीनामृचामेकेनर्षिणा इत्यष्टर्चं द्वितीयमृषिसूक्तम् । तासामृचां मधुच्छन्दसः पुत्रेण जेत्रा दृष्टत्वात् ।

१ बृहद्देवतानामको ग्रन्थः शौनकेन महर्षिणा कृतः ।

देवतासूक्तं यथा—'अग्निमीळे पुरोहितम्' इत्यादिनवर्चमग्निदेवताकमाद्यं देवतासूक्तम्। यथा वा—'वायवा याहि दर्शत' (ऋ० १।२।१) इति नवर्चं वायव्यं द्वितीयं देवतासूक्तम्।

छन्दःसूक्तं यथा—'अग्निमीळे पुरोहितम्' इत्यारभ्याष्टादशवर्गपर्यन्तं 'गायन्ति त्वा गायत्रिणः' (ऋ० १।१०।१) इत्यतः प्राग् गायत्रीछन्दोबद्धमाद्यं छन्दःसूक्तम्। एवं यथायथमुदाहर्त्तव्यम्।

त्रिविधानामप्येषां सूक्तानां कर्म्मसु विनियोगः श्रुत्या प्रतिपाद्यते। तथा हि 'उदु ब्रह्माण्यैरत श्रवस्येति ब्राह्मणाच्छंसी[1] ब्रह्मण्वत्समृद्धं सूक्तमहरहः शंसन्ति' इति प्रकृत्य 'तदु वासिष्ठम्। एतेन वै वसिष्ठ इन्द्रस्य प्रियं धामोपागच्छत्' इति ऐतरेयब्राह्मणस्य पञ्चम[2]पञ्चिकायामुक्तम्। यथा देवतासूक्तस्य विनियोगोऽप्यैतरेयब्राह्मणस्य षष्ठपञ्चिकायामुपदिश्यते—'तस्मान्मैत्रावरुणं मैत्रावरुणः प्रातःसवने शंसति' (ऐ० ब्रा० ६।४) इति। मैत्रावरुणनामक ऋत्विक् मैत्रावरुणं मित्रावरुणदेवताकं सूक्तं प्रातःसवनकर्म्मणि शंसतीती तदर्थः। एवमैतरेयब्राह्मणस्य पञ्चमपञ्चिकायाम्—'तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन' (ऐ० ब्रा० ५।४) इति वाक्येन त्रिष्टुप्छन्दोघटितं छन्दस्सूक्तमुपदिश्यते।

वर्गविभागोऽध्यायविभागश्चाध्यापकसम्प्रदायक्रमागत एवेति भाति, यतोऽनुगतं तयोः किंचिल्लक्षणं न पश्यामः।

मण्डललक्षणं तु शक्यते उन्नेतुम्—तत्तदृषिदृष्टानां बहूनां सूक्तानामेकर्षिकर्तृकः सङ्ग्रहो मण्डलमिति। अत एव सर्वानुक्रमणिकायामुक्तं शौनकेन[3]–'य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत्स गृत्समदो द्वितीयं मण्डलमपश्यत्' (ऋ० सर्वानु० २।१) इति। न हि द्वितीयमण्डलगतानि सर्वाणि सूक्तानि गृत्समद एव दृष्टवान्

१ ब्राह्मणाच्छंसी ऋत्विग्विशेषः।

२ मुद्रितपुस्तकेषु षष्ठपञ्चिकाया विंशतितमे खण्ड एवायं पाठः दृश्यते।

३ शौनकशिष्यः कात्यायन एवास्य ग्रन्थस्य कर्तेति तु प्रसिद्धिः।

किंतु सङ्गृहीतवान्। अन्यथा क्रतुकूर्मादीनां तत्तत्सूक्तर्षित्वेन तत्रैवा-नुक्रमणिकाग्रन्थेऽभिधानस्यासंगतेः।

मण्डलर्षय आश्वालायनगृह्यसूत्रे उक्ताः—'शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्याः क्षुद्रसूक्ता महासूक्ताः' ( आश्व० गृ० ३।४।१ ) इति।

मधुच्छन्दःप्रभृतयोऽगस्त्यन्ता आद्यमण्डले।
ये सन्ति ऋषयस्ते वै सर्वे प्रोक्ताः शतर्चिनः॥

शतर्चिपदस्य निर्वचनं कृतं पूर्वाचार्यैः—

ददर्शादौ मधुच्छन्दा द्व्यधिकं यदृचां शतम्।
तत्साहचर्यादन्येऽपि विज्ञेयास्तु शतर्चिनः॥
अच्छत्राश्छत्रिणैकेन यथा ते छत्रिणोऽभवन्। इति।

द्व्यधिकेऽपि शतोक्तिर्बाहुल्यात्। अन्त्ये मण्डले क्षुद्रसूक्तानां महासूक्तानां च द्रष्टार ऋषयोऽपि लक्षणया क्षुद्रसूक्ता महासूक्ता इति व्यपदिश्यन्ते। महासूक्तलक्षणं बृहद्देवतायामुक्तम्—

दशर्चताया अधिकं महासूक्तं विदुर्बुधाः। इति।

एतेन—एकर्चप्रभृतिदशर्चपर्यन्तं क्षुद्रसूक्तम्—इति क्षुद्रसूक्तलक्षणमपि सूचितं भवति। मध्यमेषु द्वितीयादिनवमान्तेषु मण्डलेषु य ऋषयस्ते माध्यमा व्यपदिश्यन्ते। तथा च प्रथमस्य मण्डलस्य शतर्चिनः, द्वितीयस्य गृत्समदः, तृतीयस्य विश्वामित्रः, चतुर्थस्य वामदेवः, पञ्चमस्यात्रिः षष्ठस्य भरद्वाजः, सप्तमस्य वसिष्ठः, अष्टमस्य प्रगाथाः, नवमस्य पावमान्याः, दशमस्य क्षुद्रसूक्ताश्चेति गृह्यसूत्रार्थः।

## ऋषीणां लक्षणादिविचारः

अथैषामृषीणां चातुर्विध्यमुक्तं पूर्वाचार्यैः—

ऋषीणामृषिपुत्राणामृषिकाणां स्वयंभुवाम्।
तथा[1] नामाभिजानीयाद्यथैषां मन्त्रदृष्टयः॥

---

१ यथा यतो हेतोरेषामृष्यादीनां मन्त्रदृष्टयो वर्त्तन्ते तथा ततो हेतोरेषामृषिरित्येव सामान्यतो नाम जानीयात्।

प्रवरै[1]र्ये समाख्याता ऋषयस्त इति श्रुतिः ।
तत्पुत्रपौत्रनप्तार ऋषिपुत्रा इति स्मृताः ॥
राजन्यवैश्या[2] ऋषिकाः स्त्रियस्तास्तिर्यग्योनयः ।
देवाऽदेवाप्सरोनद्यो गन्धर्वास्ते स्वयम्भुवः ॥ इति ।

एषामुदाहरणानि प्रदर्श्यन्ते । अत्र तृतीयमण्डलद्राष्टा विश्वामित्रः तस्य पुत्रो मधुच्छन्दाः पौत्रो जेता च मन्त्रद्रष्टाऽभवत् तस्माद्विश्वामित्र-ऋषिः, मधुच्छन्दःप्रभृतयश्च ऋषिपुत्राः । यथा वा अङ्गिरसः पुत्रो रहूगणः, पौत्रो गोतमो, नप्ता वामदेवः, प्रणप्ता बृहदुक्थ्यः त इमे सर्वे मन्त्रद्रष्टारो बभूवुः; तस्मादङ्गिरा ऋषिः, रहूगणादयो हि ऋषि-पुत्राः । ऋषिक इत्यत्राल्पार्थे कन् । अल्पऋषिरित्यर्थः ।

तत्र राजन्य ऋषिको यथा – तृतीयाष्टके 'मम द्विता' (ऋ० ४।४२१) इति दशर्चस्य सूक्तस्य पुरुकुत्सपुत्रस्त्रसदस्यु नामा राजर्षिः । यथा वा तदग्रिमस्य 'क उ श्रवत्' ( ऋ० ४।४४।१ ) इति सप्तर्चस्य सूक्तस्य पुरमीढाजमीढौ सुहोत्राभिधस्य राज्ञः पुत्रावृषी ।

वैश्य ऋषिको यथा—अष्टमाष्टकस्य द्वितीयाध्याये 'अग्निरिन्द्र' (ऋ० १०।६२।१ इति पञ्चर्चस्य सूक्तस्य 'देवान् हुवे' (ऋ० १०।६६।१) इति पञ्चदशर्चस्य सूक्तस्य च वसुक्रपुत्रो वसुकर्ण ऋषिः । स च वैश्य इति सम्प्रदायविद आहुः । युक्तं चैतत्—वसु धनं सुवर्णर-जतादि क्रीणातीति वसुक्र इति नामधेयपदस्य तथैव स्वारस्यावगमात् ।

---

१ प्रवरैर्मन्त्रदर्शिभिः पुत्रपौत्रादिभिर्ये समाख्याताः प्रसिद्धास्ते ऋषयः कथ्यन्त इति शेषः । नप्ता प्रपौत्रः ।

२ राजन्यवैश्याः, अपि च ताः स्त्रियः गोधाघोषाप्रभृतयो ब्रह्मवादिन्य इति प्रसिद्धाः ऋषिका इत्युच्यन्ते । ऋषिका इति पुंसि स्त्रिया च तन्त्रेण बहुवचनान्तं प्रयुक्तम् । तिर्यग्योनयः पशुजातयः । देवा अदेवा इत्यादयस्ते स्वयम्भुव इति व्यपदिश्यन्ते ।

स्त्रिय ऋषिका यथा—चतुर्थाष्टकस्य प्रथमाध्याये 'समिद्धो अग्नि' ( ऋ० ५।२८।१ ) इति षडर्चस्य सूक्तस्यात्रिपुत्री विश्ववारानाम्नी ऋषिका। यथा वा अष्टमाष्टके षष्ठाध्याये 'तेऽवदन्' ऋ० १०।१०९।१ ) इति सप्तर्चस्य सूक्तस्य ब्रह्मजाया जुहूनाम्नी ऋषिका।

स्वायम्भुवो यथा—'इन्द्रस्य दूतीरिषिता चरामि' ( ऋ० १०।१०८।२ ) इति, 'नाहं तं वेद' ( ऋ० १०।१०८।४ ) इति चैवमादीनामष्टमाष्टकस्य षष्ठेऽध्याये पठितानां कासांचिदृचां सरमानाम्नी देवशुनी ऋषिका। सा हि तिर्यग्योनिः। उपनयनाध्ययनाद्यभावेऽपि स्वयं तल्लक्षणं वेदितव्यम्। देवाद्या अप्युपनयनाद्यभाववन्तः स्वयंप्रतिभातवेदा एवेति नैतल्लक्षणमतिवर्त्तन्ते। यथा वा अष्टमाष्टकस्य तृतीयाध्याये 'अग्निः सप्तिं वाजम्' ( ऋ० १०।८०।१ ) इति सप्तर्चस्य सूक्तस्य सौचीकोऽग्निर्देव ऋषिः। एवं यथा यथमुदाहार्यम्।

स्पष्टश्चायमृषिसूक्तादिलक्षणविचारः शौनकीय ( ? कात्यायनीय ) सर्वानुक्रमणिकाभाष्ये। चतुर्विधानामप्येषां सामान्यलक्षणं तु 'मन्त्रद्रशः' इत्येव पूर्वाचार्यैरुदाहृतम्। दर्शनं ज्ञानम्, तच्च परमेश्वरप्रसादलब्धं सर्वेषामविशेषात्। किञ्च दर्शनं नाम सिद्धस्य वस्तुनो विषयीकरणं नतूत्पादनम्। एवं चर्षयो न वेदस्य कर्त्तारः, किन्तु द्रष्टार इति बोध्यम्।

## वेदानामृषिकर्तृकत्वखण्डनम्

स्यादेतत्—'यस्य वाक्यं स ऋषिः। या तेनोच्यते सा देवता। यदक्षरपरिमाणं तच्छन्दः। अर्थेप्सव ऋषयो देवताश्छन्दोभिरुपाधावन्[1]', ( ऋ० सर्वानु० परिभाषा २।४–७ ) इति सर्वानुक्रमण्यां शौनको ( ? कात्यायनो ) क्तेः, 'अर्थकाम ऋषिर्यस्यां देवतायामा-

१ स्तुतवन्त इत्यर्थः।

र्थपत्य[1]मिच्छन् स्तुतिम् प्रयुङ्क्ते स तद्दैवत्यो मन्त्रः' ( नि० ७।१। ) कर्त्तार एव ऋषयः किं न स्युः। किञ्च मन्त्रलिङ्गादपि ऋषीणां मन्त्रकर्तृत्वं प्रतीयते। तथाहि। 'सोम गोर्भिष्ट्वा वयं वर्द्धयामो वचोविदः' ( ऋ १।९१।११ ) इति मन्त्रो 'हे सोम वचोविदो वयं त्वा त्वां गीर्भिर्वर्द्धयामः स्तुमः' इत्यर्थकः, तथाबृहद्देवतोक्तम्

ऋषिसूक्तानि यावन्ति सूक्तान्येकस्य वै कृतिः

( बृ० दे० १।१४ ) इति ऋषिसूक्तलक्षणं च वेदवाक्यानि ऋषिकर्तृकाणि इत्यावेदयति इति चेत्। मैवम्। वेदानामपौरुषेयत्वस्य मीमांसाशास्त्रे सिद्धान्तितत्वात्। तथाहि—प्रमाणान्तरेणार्थमुपलभ्य पुरुषनिर्मितत्वं हि पौरुषेयत्वम्। तच्च वेदस्य नास्ति।

न च

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत[2]॥

( ऋ० १०।९०।९ ) इति ऋङ्मन्त्रेण वेदस्य पौरुषेयत्वमवगम्यत इति वाच्यम्। उक्तमन्त्रेण वेदस्य यज्ञपुरुषादुत्पन्नत्वमात्रबोधनेऽपि प्रमाणान्तरेणार्थमुपलभ्य रचितत्वाबोधनात्। ईश्वरः सर्वज्ञत्वाद् गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वोपदिशतीत्येतावतैव निर्वाहे पौरुषेयत्वकल्पनानुपपत्तेश्च। 'धाता यथापूर्वमकल्पयत्' ( ऋ० १०।१९०।३ ) इति श्रुतिमूलकेन 'यः कल्पः स कल्पपूर्वकः' इति न्यायेन संसारस्यानादित्वाच्च। काठकादिसमाख्यानमपि अध्ययनसम्प्रवर्त्तकत्वेनोपपत्तेश्चेत्याहुः।

---

१ अर्थस्य अभिलाषविषयस्य पतिः स्वामी, प्रदाने प्रभुरिति यावत्। अर्थपतेर्भाव आर्थपत्यम्।

२ सर्वैर्देवमनुष्यादिभिर्हूयते इज्यते यस्तस्मात्सर्वहुतो यज्ञात् परमेश्वरादृगादयो जज्ञिर इत्यर्थः।

युक्तं चैतत्। अत एव

युगान्तेऽन्तर्हितान्वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥

इति स्मर्यते। तथा तैत्तिरीययजुरारण्यके सहवैउपनिशदि 'अजान् ह वै पृश्नी ँ स्तपस्यमानान् ब्रह्म स्वयम्भवम्यानर्ष त ऋषयोऽभवंस्तदृषीणामृषित्वम्' (cp तै० आ० २।९) श्रूयते। स्वयम्भु प्रमाणान्तरमनुपजीव्य स्वयम्भूतं स्वतःप्रमाणभूतमिति यावत्। ब्रह्म वेदःतपश्चरतोऽजान् अयोनिसम्भवान् पृश्नीन् पुरुषान् प्रति अभ्यानर्ष अभिजगाम। ऋषी गतौ तुदादिः। परोक्षे लिट्। अतस्ते ऋषयोऽभवन्नित्यादिस्तदर्थः। नैरुक्तग्रन्थे द्वितीयाध्याये 'ऋषिर्दर्शनात्स्तोमान् ददर्शेत्यौपमन्यवः' (नि० २।११) इति वदन् यास्कमुनिरपि ऋषिशब्दप्रवृत्तिनिमित्तं वेदसम्बन्धि दर्शनमेव निर्णीतवान्। एवं च ऋषति वेदं पश्यतीत्यृषिः। धातूनामनेकार्थकत्वादत्र ऋषेर्धातोर्दर्शने वृत्तिः, गत्यर्थकानां ज्ञानार्थकत्वाद्वा। प्रकृते हि दर्शनं प्रत्यक्षीकरणमेव, न तु चाक्षुषं ज्ञानमिति भावः। किञ्च

अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रैविदा विदुः।
ऋचः सामानि यजू ँ षि। सा हि श्रीरमृता सताम्॥'

(तै० ब्रा० १।२।१।२६) इति कृष्णयजुर्मन्त्रेण ऋषयो विदुरित्युक्त्वा तेषां वेदकर्तृत्वाभावो बोधितः। अन्यथा चक्रुरित्येव तत्र श्रुतं स्यात्।

यत्तु 'सोम गीर्भिष्ट्वा वयमि'ति मन्त्रलिङ्गं कर्तृत्वसाधकतयोपन्यस्तम्। तत्तु न तथा साधयति, 'वचोविद' इति विशेषणेन पूर्वसिद्धानामेव वेदवचसां वेत्तारो वयमित्यर्थस्य क्रोडीकारात् (?=करणात्),

---

१ त्रैविदा ऋषय ऋचः सामानि यजूंषीत्येवंरूपं यं विदुर्ज्ञातवन्तस्तं मे मन्त्रं वेदत्रयलक्षणं हे अहे बुध्निय त्वं गोपाय रक्षस्व। सा वेदत्रयी हि यतो हेतोः सतामसृता अक्षया श्रीः सम्पत्तिरित्यर्थः।

'गीर्भि'रित्यस्य वेदवाणीरित्यर्थाच्च। नन्वेवमपि वयमित्यस्मच्छब्द-प्रयोगाद् 'वर्द्धयामः' इत्युत्तमपुरुषप्रयोगाच्चैवंविधमन्त्राणामृषिकर्तृकत्वं दुर्निवारम्। स्वप्रणीतेष्वेव वाक्येषु वयं स्तुमो वयमवोचाम इत्यादिप्रयोगदर्शनादिति चेत्। सत्यम्। परन्तु नैष दोषो वेदे सम्प्रसरति, निजतपोमहिम्ना प्राप्तपरमेश्वरतादात्म्यानामृर्षीणां मुखतः प्रादुर्भूततथाविधवाक्यानामपि परमेश्वरप्रणीतत्वावधारणात्। तथा चोक्तं शतपथब्राह्मणे चतुर्दशप्रपाठकस्य चतुर्थाध्याये "[1]ब्रह्म वा इदमग्र आसीत्। तदात्मानमेवावेदहं ब्रह्मास्मीति। तस्मात्तत्सर्वमभवत् तद्यो देवानां प्रत्यबुध्यत स एव तदभवत्। तथर्षीणां तथा मनुष्याणाम्, तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवां ऋषिरस्मि विप्रेती'त्यादि। 'अहं मनुरभवम्' (ऋ० ४।२६।१) इति सूक्तमृग्वेदे तृतीयाष्टकस्य षष्ठेऽध्याये पठ्यते। अनेन सूक्तेन वामदेव ऋषिर्विश्वरूपब्रह्मभावं साक्षात्कृतवतः स्वस्यानुभवमनुवदति। एवमैतरेयकेऽपि श्रूयते (?)—'य एते खल्वमी मन्त्रदृशः सर्व एते परस्यैव विभूति'रिति। 'यस्य वाक्यं स ऋषिः' इति सर्वानुक्रमणीसूत्रस्य तु यस्य दृष्टं वाक्यमित्यर्थ इति न कोऽपि विरोधः एवं च 'गृत्समदो द्वितीयमण्डलमपश्यन्' (ऋ० सर्वानु० २।१) इति सर्वानुक्रमगतं सूत्रमपि सङ्गच्छते। अन्यथा स्वग्रन्थेनैव विरुध्येत। किंच बृहद्देवतोक्ते ऋषिसूक्तलक्षणे—'ऋषिसूक्तानि यावन्ति सूक्तान्येकस्य वै कृति'रित्यत्र कृतिरित्यस्य दर्शनक्रियेत्यर्थः सकलश्रुतिस्मृत्यनुरोधादवगन्तव्यः।

---

१ अग्रे सृष्टेः पूर्वम् इदम् संप्रति दृश्यमानं विश्वम् ब्रह्मैवासीत्। वाशब्द एवार्थे। तद् ब्रह्म आत्मानमेवाहं ब्रह्मास्मीत्यवेत् साक्षादकरोत्। तस्मात् ततश्च तद् ब्रह्म सर्वं विश्वरूपमभवत्। तत् तस्मात् कारणात् देवानामृषीणां मनुष्याणां वामदेवः पुमान प्रत्यबुध्यत प्रत्यगात्मनो ब्रह्मभावं साक्षादकरोत् स एव पुमान् तत् विश्वरूपं ब्रह्माभवत्॥ अत्रार्थे वामदेवस्य महर्षेरनुभवं ऋग्वेदप्रसिद्धं संवादयन्त—अहं मनुरित्यादिना॥

अथ वेदस्य श्रुतिरिति संज्ञापि श्रूयत एवायं सर्वैर्न त्वस्य कश्चिच्छरीरी कर्त्तोपलभ्यत इति तात्पर्यमवधारयति। एवं च पारम्पर्यक्रमागतमेव वेदज्ञानं सर्वेषाम्, न तु ऋषयोऽपि तस्य स्वतन्त्राः कर्त्तार इति लभ्यते। अत एव ऋग्वेदे तृतीयाष्टकस्य चतुर्थाध्याये पठ्यते—"[1]महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय' ( अ० ४।४।११ ) इति। तथा ऐतरेयब्राह्मणे पठ्यते 'प्रजापतिरकामयत प्रजायेय भूयान्स्यामिति स तपोऽतप्यत स तपस्तप्त्वेमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवम्। तान् लोकानभ्यतपत्[2] तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ताग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींष्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्। तान् वेदानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्येव ऋग्वेदादजायत भुव इति यजुर्वेदात् स्वरिति सामवेदात्। तानि शुक्राण्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति। तानेकधा समभरत्तदेतदोमिति' ( ऐ० ब्रा० ५।३२ ) इति। एतद्ब्राह्मणपर्यालोचनया प्रजापतिरेवाग्रे स्वतपःप्रभावेण सप्रणवव्याहृतिकां त्रयीमपश्यत् ततः परं यथायथं निजतपोबलेन तैस्तैर्ऋषिभिस्ते ते मन्त्रादिभागाः परमेश्वरप्रसादतो लब्ध्वा यथास्थितस्वरवर्णानुरूपं पठित्वा लोकेऽत्र प्रकटीकृता इति प्रतीयते इत्याहुः।

ननु यदि सिद्धानामेव मन्त्राणां दर्शनं मधुच्छन्दःप्रभृतीनामृषित्व-

---

१ हे अग्ने यदहं महः कमनीयं यथा स्यात्तथा बन्धुता त्वदीयत्वेन बन्धनशीलत्वम्। द्वितीयार्थे व्यत्ययेन प्रथमा। वचोभिः कृत्वा रुजामि संपादयामि। तदेतत् मा मां प्रति गोतमात् पितुर्मज्जनकात् सकाशात् अन्वियाय अनुगतम् प्राप्तमित्यर्थः।

२ अभ्यतपत् स्वतपःप्रभावसंस्कृतान् अकरोदित्यर्थः। एवमग्रेऽपि बोध्यम्। प्रजापतितपःप्रभावेण तेभ्यस्तेभ्यस्तानि तानि वस्तून्यजायन्तेति भावः।

सम्पादकम्, तर्हीदानींतनेषु श्रोत्रियेष्वपि ऋषित्वमतिप्रसज्येतेति चेत्। मैवम्। इह लोके स्वेतरैरदृष्टपूर्वाणामेव श्रुतिवाक्यानां गुरुदेवताप्रसादेन संजातदर्शनस्यैव स्वस्मिन्नृषित्वसम्पादकत्वादित्यलमनया प्रसक्तानुप्रसक्तया।

प्रकृतमनुसरामः—

## यजुर्वेदमानं तच्छाखाश्च

'एकशतमध्वर्युशाखाः' (महाभा० पस्पशा०) इति महाभाष्ये पतञ्जलिराह। 'यजुर्वेदस्य षडशीतिर्भेदा भवन्ति' (च० २) इति चरणव्यूहः। परन्त्वेषु शाखाभेदेषु कतिचिदुच्छिन्नाः सन्तो नामतोऽपि न ज्ञायन्ते। येषां हि नामानि ग्रन्थेषूपलभ्यन्ते तान् भेदान् वदामः—चरकाः, आह्वरकाः, कठाः, प्राच्यकठाः, कापिष्ठलकठाः, चारायणीयाः, वारतन्तवीयाः, श्वेताः, श्वेततराः, औपमन्यवाः, पाताण्डिनेयाः, मैत्राणीयाश्चेति। मैत्रायणीयानामपि षड् भेदा भवन्ति—मानवा वाराहा दुन्दुभाश्छागलेया हारिद्रवीयाः श्यामायनीयाश्चेति। तथा चरकविशेषाणां तैत्तिरीयकाणां द्वौ भेदौ भवतः—औखीयाः खाण्डिकीयाश्चेति। खाण्डिकीया अपि पञ्चधा भिन्नाः—आपस्तम्वी बौधायनी सत्याषाढी हिरण्यकेशी शाटथायनी चेति। वारतन्तवीया औखीयाः खाण्डिकीयास्तैत्तिरीया इत्यत्र 'तित्तिरिवरतन्तुखण्डिकोखाच्छण्' (अष्टा० ४।३।१०२) इति पाणिनीयसूत्रेण छणप्रत्ययः, आपस्तम्वीत्यादिपञ्चसु 'कलापिवैशम्पायनान्तेवासिभ्यश्च' (अष्टा० ४।३।१०४) इति सूत्रेण णिनिः। एषां सर्वेषां स्वाध्यायमानं चरणव्यूहे प्रोक्तम्—

अष्टादश सहस्राणि मन्त्रब्राह्मणयोः सह।<br>
यजूंषि यत्र पठ्यन्ते स यजुर्वेद उच्यते॥

(cp. च० २) इति।

सर्व एवैते भेदाः कृष्णयजुःशब्देन व्यवह्रियन्ते। वक्ष्यमाणाः काण्वमाध्यन्दिनादयस्तु शुक्लयजुःशब्देन। तत्कारणं सम्प्रदायविद एवमाहुः—वैशम्पायनो नाम यजुर्वेदाचार्यो येनाध्यापिता बहवः शिष्या वेदवेदाङ्गपारगाः संवृत्ताः। स कदाचित्केनचिन्निमित्तेन ब्रह्महत्यापातकवान् संवृत्तः। ततो द्वादशवार्षिकं ब्रह्महत्यापापापहं व्रतं चरितुकाममाचार्यं प्रति शिष्याः प्रोचुः—भगवन् द्वादशवार्षिकस्यैतद्व्रतस्य षष्ट्युत्तराणि त्रीणि शतानि प्राजापत्यानि भवन्ति तानि सत्रे वयं भवत्पापक्षयार्थं चराम इति। अनुमतं च तत्तथास्त्वित्याचार्येण। यदाह व्यासः—

वैशम्पायनशिष्यास्ते चरकाध्वर्यवोऽभवन्।
यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम्॥ इति॥

एवं व्रतं चरत्सु तेषु याज्ञवल्क्यनामा शिष्यो गुरुमभ्येत्य प्रोवाच-'भो भगवन् किमेतेषां क्षुद्राणां व्रतचर्यया भविष्यति, नूनमहमेवैकः सुदुश्चरमपि भवद्व्रतं चरिष्ये' इति। तच्छ्रुत्वा कुपितो गुरुरुवाच—'अलं त्वया ब्राह्मणावमानिनाभिमानिना, यदधीतं मत्तस्तदाशु त्यजे' ति। सोपि 'किमहं निगीर्णमन्नमिवाधीतं वमामी'त्युपहासवादं वदन् गुरुणा 'तथैवास्त्वि'ति प्रत्युक्तो यावच्छर्दितवांस्तावद्वाङ्मयं वेदज्योतिर्मुक्तं खदिराङ्गारकल्पं पुरस्ताद् भुवि विप्रकीर्णमपश्यत्, स्वयं च न किञ्चिदधीतं सस्मार। ततो याज्ञवल्क्येन प्रच्छर्दितं वेदराशिं गुर्वनुज्ञया शिष्या जगृहुः। परं छर्दितस्यादनं विप्ररूपेणानुचितमपि मनसि निधाय तित्तिरयो भूत्वा गृहीतवन्तस्ते तदाप्रभृति तैत्तिरीया अभूवन्। अथ याज्ञवल्क्यो भगवन्तं भास्करं तपसा प्रसाद्य वाजिरूपधरात्तस्मादलोकविदितं यजुर्वेदमधिगतवान्। सोऽयं यजुर्वेदः शुक्ल इत्यभिधीयते। यतोऽत्र दर्शपौर्णमासप्रभृतिसर्वयज्ञेषूपयुक्तानां यजुर्मन्त्राणां ब्राह्मणासङ्कीर्णानां यथायोग्यक्रमेण विन्यासेन याज्ञिकानां व्यामोहाजननात्। प्राचीनयजुर्वेदस्य तु ब्राह्मणसङ्कीर्णत्वात् तत्तद्याज्ञियमन्त्राणाम

प्यनुक्रमेण पाठाभावाच्च ततोयज्ञकर्मानुष्ठानमार्गस्य दुर्ज्ञेयत्वात् कृष्णत्वमिति ।

*शुक्लयजुर्वेदस्य पञ्चदश भेदाः सन्ति* । काण्वा माध्यन्दिना जाबाला बुधेयाः शाफेयास्तापनीयाः कपोलाः पौण्ड्रवत्सा आवटिकाः परमावटिकाः पाराशरीया वैनेया वैधेया औधेया गालवाश्चेति । सर्व एते वाजसनेयिन इति व्यपदिश्यन्ते ।

एतद्वेदस्य मानमुक्तं चरणव्यूहे—

द्वे सहस्रे शतन्यूने मन्त्रा वाजसनेयके ।
तावन्मानेन संख्यातं वालखिल्यं सशुक्रियम् ॥
ब्राह्मणं तु समाख्यातं प्रोक्तमानाच्चतुर्गुणम् ।
( cp. च० २ ) इति ।

वाजसनेयिनां ब्राह्मणं शतपथसंज्ञकम् । तच्चार्वाचीनमिति भट्टोजीदीक्षितमतम् । सिद्धान्तकौमुद्यां 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (अष्टा० ४।३।१०५) इति सूत्रे 'भाल्लविनः शाट्यायनिन' इत्युदाहृत्य, 'पुराणेति किम् । याज्ञवल्क्यानि ब्राह्मणानी'ति प्रत्युदाहृतम् । तत्स्वारस्याद्यद्यपि याज्ञवल्क्यो न पुराणो मुनिरिति प्रतीयते । तथापि 'याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्' ( वार्त्तिक० ४।३।१०५ ) इति 'तद्विषयता च न' (महाभा० ४।२।६६) इति वचनमेतत्सूत्रभाष्ये पतञ्जलिनोपन्यस्तम् । तत्स्वारस्येन याज्ञवल्क्यः पुराण एवेति लभ्यते । अन्यथा वचनारम्भो व्यर्थः स्यात् । पुराणपदेनैव तद्व्यावृत्तेः सिद्धत्वात् । याज्ञवल्क्यस्य वैशम्पायनान्तेवासित्वेन शाट्यायनादितुल्यकालभवत्वाच्च । स्पष्टं चेदमत्रैव सूत्रे शब्देन्दुशेखरे इति दिक् ।

## सामवेदमानं तच्छाखाश्च

अथ सामवेदस्य सहस्रं शाखा आसन् । तत्रानध्यायेष्वधीयाना बहवः शाखाध्यायिन इन्द्रेण शतपर्वणा निहतास्ततः प्रभृति बह्वयः

शाखा उच्छिन्नाः। कतिचिदेवावशिष्टाः प्रचरन्ति। यथा—राणायनीयाः शाट्यमुग्राः कापोला महाकापोला लाङ्गलिकाः शार्दूलाः कौथुमानां षड्भेदाः सन्ति। आसुरायणा वातायना प्राञ्जलयो वैनधृताः प्राचीनयोग्या नैगेयाश्चेति।

एतन्मानमुक्तं चरणव्यूहे—

अष्टौ सामसहस्राणि सामानि च चतुर्दश।
ऊह्यानि सरहस्यानीत्येतत्सामगणः स्मृत॥

( cf. च० ३ ) इति।

## अथर्ववेदस्य मानं शाखाश्च

आथर्वणवेदस्य नव भेदा भवन्ति—पैप्पलादाः शौनकीया दामोदास्तोत्तायना जायला ब्रह्मपलाशाः कुनखी देवदर्शी चारणविद्याश्चेति।

एतन्मानमुक्तं चरणव्यूहे—

द्वादशानि सहस्राणि मन्त्राणां त्रिशतानि च।
गोपथं ब्राह्मणं वेदेऽथर्वणे शतपाठकम्[१]॥

( cf. च० ४ ) इति।

इदमत्र सम्प्रधार्यम्—मन्त्रब्राह्मणयोर्वेदत्वाविशेषेऽपि अत्र लोके प्रागवतरणं मन्त्रभागस्य ततः कालान्तरेण ब्राह्मणभागस्येति। सर्वत्र ब्राह्मणग्रन्थेषु तत्तद्वेदमन्त्राणां यज्ञकर्मसु यथायथमुपयोगस्य बहुधा प्रदर्शितत्वात्। मन्त्रभागेष्वपि ऋक्संहितायाः प्रथममवतरणं ततो यजुःसंहितादेः। यजुर्वेदे बहूनामृङ्मन्त्राणामनुवाददर्शनात्। ऋङ्मन्त्रानवलम्ब्यैव च सर्वेषां साम्नां गीयमानत्वात्। एवं वक्ष्यमाणलक्षणानि कल्पसूत्राणि ब्राह्मणग्रन्थोत्तरकालानि। तेषां ब्राह्मणग्रन्थबोधितयज्ञादिकर्मकाण्डप्रपञ्चभूतत्वादिति बोध्यम्॥

[ आर्यविद्यासुधाकरात् ]

---

१ शतपाठकमित्यर्थः।

# २६—वेदाङ्गानि तदुपयोगश्च

[ "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयोज्ञेयश्च" इत्याह खलु पस्पशाह्निके महाभाष्यकारो भगवान् पतञ्जलिः। अन्यानि चैवंविधानि प्रमाणान्यत्र विषये दृश्यन्ते। तत्र तेषामङ्गानां स्वरूपोपयोग वर्णनपरः कश्चिदंशः सायणीयऋग्वेदभाष्यभूमिकातोऽत्र समुद्ध्रियते। ]

अतिगम्भीरस्य वेदस्यार्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि। अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषद्याथर्वणिका आमनन्ति—'द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति। परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते' ( मु० उ० १।१।४ ) इति।

साधनभूतधर्मज्ञानहेतुत्वात्षडङ्गसहितानां कर्मकाण्डानामपरविद्यात्वम्। परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वादुपनिषां परविद्यात्वम्।

*वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा।* तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति—'शिक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम संतान इत्युक्तः शीक्षाध्यायः' इति। वर्णोऽकारादिः स चाङ्गभूतशिक्षाग्रन्थे स्पष्टमुदीरितः—

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा॥

इत्यादिना। स्वर उदात्तादिः। सोऽपि तत्रोक्तः—

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः।

मात्रा ह्रस्वादिः। सापि तत्रोक्ता—

ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अपि।

वलं स्थानप्रयत्नौ। तत्र 'अष्टौ स्थानानि वर्णानाम्' इत्यादिना स्थानमुक्तम्। 'अचोऽस्पृष्टा यणस्त्वीषद्' इत्यादिना प्रयत्न उक्तः। सामशब्देन साम्यमुक्तम्। अतिद्रुतातिविलम्बितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्यम्। 'गीती शीघ्री शिरःकम्पी' इत्यादिना 'उपांशुदष्टं त्वरितम्' इत्यादिना दोषा उक्ताः। 'माधुर्यमक्षरव्यक्तिः' इत्यादिना गुणा उक्ताः। संतानः संहिता। वायवायाहीत्यत्रावादेशः। इन्द्राग्नी आगतमित्यत्र प्रकृतिभावः। एतच्च व्याकरणेऽभिहितत्वाच्छिक्षायामुपेक्षितम्।

शिक्ष्यमाणवर्णादिवैकल्ये बाधस्तत्रोदाहृतः—

> मन्त्रो हीनः स्वरतो वर्णतो वा
> मिथ्याप्रयुक्तो न तमर्थमाह।
> स वाग्वज्रो यजमानं हिनस्ति
> यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

'इन्द्रशत्रुर्वर्धस्व' (तै० सं० २।४।१२।१) इत्यस्मिन् मन्त्र इन्द्रस्य शत्रुर्घातक इत्यस्मिन् विवक्षितेऽर्थे तत्पुरुषसमासे 'समासस्य (अष्टा० ६।१।२२३)' इति सूत्रेण तत्पुरुषत्वादन्तोदात्तेन भवितव्यम्। आद्युदात्तस्तु प्रयुक्तः। तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहित्वादिन्द्रो घातको यस्येत्यर्थः संपन्नः। तस्मात् स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः।

*कल्पस्त्वाश्वलायनापस्तम्बबौधायनादिसूत्रम्*। कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः।

ननु आश्वलायनः किं मन्त्रकाण्डमनुसृत्य प्रवृत्तः, किंवा ब्राह्मणमनुसृत्य। नाद्यः। 'दर्शपौर्णमासौ तु पूर्वं व्याख्यास्यामः' (आ० श्रौ० १।१।३) इत्येवन्तेनोपक्रान्तत्वात्। नह्यग्निमीळ इत्यादयो मन्त्रा दर्शपौर्णमासयोः क्वचिद् विनियुक्ताः। न द्वितीयः। आग्नावैष्णवमेका-

दशकपालं पुरोडाशं निर्वपन्ति दीक्षणीयायाम्' इत्येवं दीक्षणीयेष्टेर्ब्राह्मणोपक्रान्तत्वात् ।

अत्रोच्यते । मन्त्रकाण्डो ब्रह्मयज्ञादिजपक्रमेण प्रवृत्तो, न तु यागानुष्ठानक्रमेण । ब्रह्मयज्ञश्चैवं विहितः । 'यत् स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद् ब्रह्मयज्ञः' ( तै० आ० २।१०।६ ) इति । सोऽयं ब्रह्मयज्ञजपोऽग्निमीळ इत्याम्नायक्रमेणैवानुष्ठेयः । तथा 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचः स्तोमे परिप्लवं शंसती' 'विधीयते । तथाश्विने संपत्स्यमाने 'सूर्यो नोदियादपि सर्वा दाशतयीरनुब्रूयाति'दि विधीयते । तथा 'रिच्यत इव वा एष प्रेव रिच्यते यो याजयति यो वा प्रतिगृह्णाति याजयित्वा प्रतिगृह्य वानश्नन् त्रिः स्वाध्यायं वेदमधीयीते'ति प्रायश्चित्तरूपं वेदपारायणं विहितम् । इत्यादिषु कृत्स्नमन्त्रकाण्डविनियोगेषु संप्रदायपारम्पर्यागत एव क्रम आदरणीयः । विशेषविनियोगं तु मन्त्रविशेषाणां श्रुतिलिङ्गवाक्यादिप्रमाणान्युपजीव्याश्वलायनो दर्शयति । अतो मन्त्रकाण्डक्रमाभावेऽपि न कश्चिद् विरोधः ।

इषे त्वेत्यादिमन्त्रास्तु क्रत्वनुष्ठानक्रमेणैवाम्नाता इत्यापस्तम्बादयस्तेनैव क्रमेण सूत्रनिर्माणे प्रवृत्ताः । आम्नातत्वादेव जपादिष्वपि स एव क्रमः । यद्यपि ब्राह्मणे दीक्षणीयेष्टिरुपक्रान्ता तथापि तस्या इष्टेर्दर्शपौर्णमासविकृतित्वेन तदपेक्षत्वादाश्वलायनस्यादौ तद्व्याख्यानं युक्तम् ।

अतः कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठानमुपदिश्योपकरोति ।

तर्हि 'प्र वो वाजाः' इत्यादीनां सामिधेनीनामृचामेव विनियोगमाश्वलायनो ब्रवीतु । 'नमः प्रवक्त्रे' इत्यादयस्त्वनाम्नाताः कुतो विनियुज्यन्त इति चेत् । नायं दोषः । शाखान्तरसमाम्नातानां ब्राह्मणान्तरसिद्धस्य विनियोगस्य गुणोपसंहारन्यायेनात्र वक्तव्यत्वात् । सर्वशाखाप्रत्ययमेकं कर्मेति न्यायविदः । तस्माच्छिष्टैव कल्पोऽप्यपेक्षितः ।

*व्याकरणमपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयायोपयुज्यते।*

तथा चैन्द्रवायवग्रहब्राह्मणे समाम्नायते—'वाग्वै पराच्यव्याकृता-वदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति। सोऽब्रवीद् वरं वृणे मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यते' ( तै० सं० ६।४।७।३ ) इति। अग्निमीळे पुरोहितमित्यादि-वाक्पूर्वस्मिन् काले पराची समुद्रादिध्वनिवदेकात्मिका सत्यव्याकृता प्रकृतिः प्रत्ययः पदं वाक्यमित्यादिविभागकारिग्रन्थरहितासीत्। तदानीं देवैः प्रार्थित इन्द्र एकस्मिन्नेव पात्रे वायोः स्वस्य च सोमरस-ग्रहणरूपेण वरेण तुष्टता मखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्यया-दिविभागं सर्वत्राकरोत्। तस्मादियं वागिदानीमपि पाणिन्यादिमहर्षि-भिर्व्याकृता सर्वैः पठ्यत इत्यर्थः।

तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्त्तिके दर्शितः। 'रक्षोहागमलध्वसंदेहाः प्रयोजनम्' इति। एतानि रक्षादिप्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टीकृतानि।

रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति वेदार्थं चाध्यवस्यति।

ऊहः खल्वपि। न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञाङ्गत्वेन यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।

आगमः खल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽ-ध्येयो ज्ञेयश्चेति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।

लध्वर्थं चाध्येयं व्याकरणम्। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। बृह-स्पतिश्च वक्ता इन्द्रश्चाध्येता। दिव्यं वर्षसहस्रमध्ययनकालः। अन्तं

च न जगाम। अद्यत्वे पुनर्यदि परमायुर्भवति स वर्षशतं जीवति। तत्र कुतः प्रतिपदपाठेन सकलपदावगमः। कुतस्तरां प्रयोगेण।

असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति। स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति। तत्र न ज्ञायते किं स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती, किं वा स्थूला चासौ पृषती च स्थूलपृषतीति। तान्नावैयाकरणः स्वरतोऽध्यवस्यति। यदि समासान्तोदात्तत्वं तदा कर्मधारयः। अथ पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिरिति।

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि। तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण।

तेऽसुराः।

तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। म्लेच्छो ह वा एष यदपशब्द। म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्।

दुष्टः शब्दः।

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

दुष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्।

यदधीतम्।

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥

अविज्ञातार्थकं माधिगीष्महीत्यध्येयं व्याकरणम्।

यस्तु प्रयुङ्क्ते।

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥

कः । वाग्योगविदेव । यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति । यथैव शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः प्राप्नोति । अथवा भूयानधर्मः प्राप्नोति । भूयांसोऽह्यपशब्दा अल्पीयांसः शब्दाः । एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः । यथा गौरित्येतस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयः । अथ योऽवावाग्योगविदज्ञानं तस्य शरणम् । विषम उपन्यासः । नात्यन्तायाज्ञानं शरणं भवितुमर्हति । यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात् । एवं तर्हि कः । अवाग्योगविदेव । अथ यो वाग्योगविज्ञानं तस्य शरणम् ।

अविद्वांसः ।

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥

स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ।

विभक्तिं कुर्वन्ति ।

याज्ञिकाः पठन्ति । प्रयाजाः सविभक्तिकाः कार्या इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् । तस्माद् अध्येयं व्याकरणम् ।

यो वा इमाम् ।

यो वा इमां पदशः स्वरशोऽक्षरशो वर्णशो वाचं विदधाति स आर्त्विजीनो भवति । आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम् ।

चत्वारि ।

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्याँ आविवेश ॥

चत्वारि शृङ्गा। चत्वारि पदजातानि। नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः त्रयः कालाः। द्वे शीर्षे। सुपस्तिङश्च। सप्त हस्तासः। सप्त विभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु बद्धः। उरसि कण्ठे शिरसि। वृषभो वर्षणात्कामानाम्। रोरवीति रौतिः शब्दकर्मा महो देवो मर्त्याँ आविवेश। महता देवेन नस्तादात्म्यं यथा स्यादित्यध्येयं व्याकरणम्।

अथवा।

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥

ये मनीषिणः। मनस ईषिणो मनीषिणः। गुहायां त्रीणी निहितानि नेङ्गयन्ति न चेष्टन्ते। तुरीयं वाचो मनुष्या वदन्ति। तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते।

उत त्वः।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः॥

अपि खल्वेकः पश्यन्नपि न पश्यति। शृण्वन्नपि न शृणोत्येनाम्। अविद्वांसमाहार्धम्। त्वस्मै अन्यस्मै तन्वं विसस्रे। तनुं विवृणुते। जायेव पत्य उशती सुवासाः। यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते। एवं वाग् वाग्विदे स्वमात्मानं विवृणुते। वाङ्नो विवृणुयादित्यध्येयं व्याकरणम्।

सक्तुमिव।

सक्तु मिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥

सक्तुः सचतेर्दुर्धावो भवति। कसतेर्वा स्याद्विपरीतस्य। विकसितो भवति। तितउ परिपवनं भवति। ततवद्वा तुन्नवद्वा। धीराः प्रज्ञान-

वन्तो ध्यानवन्तो मनसा प्रज्ञानेन वाचमक्रत वाचमकृषत। अत्रा सखायः सख्यानि जानते। अत्र सखायः सख्यानि संजानते। सायुज्यानि जानते। क एष दुर्गमो मार्ग एकगम्यः। वाग्विषयः। के पुनस्ते। वैयाकरणाः। कुत एतत्। भद्रैषां लक्ष्मीर्निहिताधि वाचि। एषां वाचि भद्रा लक्ष्मीर्निहिता भवति।

सारस्वतीम्।

याज्ञिकाः पठन्ति। आहिताग्निरपशब्दं प्रयुज्ञानः प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत् इति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्।

दशम्यां पुत्रस्य।

दशम्यां पुत्रस्य जातस्य नाम विदध्याद्धोषवदाद्यन्तरन्तःस्थमभिनिष्ठानान्तं द्व्यक्षरं चतुरक्षरं वा कृतं नाम कुर्यान्न तद्धितमिति। न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। तस्मादध्येयं व्याकरणम्।

सुदेवो असि।

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव॥

सप्त सिन्धवः। सप्त विभक्तयः। काकुजिह्वा सास्मिन्विद्यत इति काकुदं तालु। सूर्मिः स्थूला लोहप्रतिमेति।

एवं 'सिद्धे शब्दार्थसंबन्धे' इत्यादिवार्त्तिकोक्तान्यत्रापि प्रयोजनान्यनुसंधेयानि।

*अथ निरुक्तप्रयोजनमुच्यते।* अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्। 'गौः ग्मा ज्मा क्ष्मा क्षा क्षमे'त्यारभ्य 'वसवः वाजिनः देवपत्न्यो देवपत्न्य' इत्यन्तो यः पदानां समाम्नातस्तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते। एतावन्ति पृथिवीनामानि,

एतावन्ति हिरण्यनामानीत्येवं तत्र तत्र विस्पष्टमभिहित्वात्। तदेतन्निरुक्तं त्रिकाण्डम्। तच्चानुक्रमणिकाभाष्ये दर्शितम्—

आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।
तृतीयं दैवतं चेति समाम्नायस्त्रिधा स्थितः॥
गौराद्यपारपर्यन्तमाद्यं नैघण्टुकं मतम्।
जहाद्युल्बमृबीसान्तं नैगमं संप्रचक्षते॥
अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते।
अग्न्यादिदेवीऊर्जाहुत्यन्तः क्षितिगतो गणः॥
वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः।
सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति॥
गौरादिदेवपत्न्यन्तं समाम्नायमधीयते। इति।

एकार्थवाचिनां पर्यायशब्दानां संघो यत्र प्रायेणोपदिश्यते तत्र निघण्टुशब्दः प्रसिद्धः। तादृशेष्वमरसिंहवैजयन्तीहलायुधादिषु दश निघण्टव इति व्यवहारात्। एवमत्रापि पर्यायशब्दसंघोपदेशादाद्यकाण्डस्य नैघण्टुकत्वम्। तस्मिन् काण्डे त्रयोऽध्यायाः। तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि। द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि। तृतीये तदुभयद्रव्यगतबहुत्वह्रस्वत्वादिधर्मविषयाणि।

निगमशब्दो वेदवाची। यास्केन तत्र तत्र 'अपि निगमो भवति'-इत्येवं वेदवाक्यानामवतारितत्वात् तस्मिन्निगम एव प्रायेण वर्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन् काण्ड उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम्। पञ्चमाध्यायरूपस्य तृतीयकाण्डस्य दैवत्वं विस्पष्टम्। पञ्चाध्यायरूपकाण्डत्रयात्मक एतस्मिन्ग्रन्थे परनिरपेक्षतया पदार्थस्योक्तत्वात्तस्य ग्रन्थस्य निरुक्तत्वम्।

तद्व्याख्यानं च 'समाम्नायः समाम्नातः' इत्यारभ्य 'तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवती'त्यन्तैर्द्वादशभिरध्यायैर्यास्को निर्ममे।

तदपि निरुक्तमित्युच्यते। एकैकस्य पदस्य संभाविता अवयवार्थास्तत्र निःशेषेणोच्यन्त इति व्युत्पत्तेः। तत्र हि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेति प्रतिज्ञायोच्चावचेष्वर्थेषु निपतन्तीति निपातस्वरूपं निरुच्यैवमुदाहृतम्। 'नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायम्। नेन्द्रं देवममंसतेति प्रतिषेधार्थीय' इति। 'दुर्मदासो न सुरायामित्युपमार्थीयः' ( नि० १।४ ) इति च। यच्च लोके केवलप्रतिषेधार्थीयस्यापि नकारस्य वेदे प्रतिषेधौपमालक्षणोभयार्थोदाहरणमस्मिन्ग्रन्थेऽवगम्यते। एवं ग्रन्थकारेणोक्तास्तत्तत्पदनिर्वचनविशेषाः।

न च निर्वचानां निर्मूलत्वं शङ्कनीयम्। एतद्व्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषांचिदुक्तत्वात्। 'तदाहुतीनामाहुतित्वमिति। तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते' ( ऐ० आ० २।४।३ ) इति। 'यदप्रथयत्तत्पृथिव्याः पृथिवीत्वम्' ( तै० ब्रा० १।१।३।७ ) इति च। ग्रन्थकारोऽपि तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यति। केषांचिन्निर्वचनानां व्याकरणबलेन सिद्धावपि न सर्वेषां सिद्धिरस्ति। अत एव ग्रन्थकार आह। 'तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च' (नि० १।१५) इति। तस्माद्वेदार्थावबोधायौपयुक्तं निरुक्तम्।

*तथा छन्दोग्रन्थोऽप्युपयुज्यते।* छन्दोविशेषाणां तत्र तत्र विहितत्वात्। तस्मात्सप्त चतुरुत्तराणि च्छन्दांसि प्रातरनुवाकेऽनूच्यन्त इति ह्याम्नातम्। गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतानि सप्त च्छन्दांसि। चतुर्विंशत्यक्षरा गायत्री। ततोऽपि चतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक्। एवमुत्तरोत्तराधिका अनुष्टुबादयोऽवगन्तव्याः। तथान्यत्रापि श्रूयते। गायत्रीभिर्ब्राह्मणस्यादध्यात्, त्रिष्टुब्भी राजन्यस्य, जगतीभिर्वैश्यस्येति। तत्र मगणयगणादिसाध्यो गायत्र्यादिविवेकश्छन्दोग्रन्थमन्तरेण न सुविज्ञेयः। किंच 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्ते वा पात्यते प्रमीयते वा पापीयान्भवति। तस्मादेतानि मन्त्रे मन्त्रे विद्यादि'ति श्रूयते। तस्मात्तद्वेदनाय छन्दोग्रन्थ उपयुज्यते।

*ज्योतिषस्य प्रयोजनं* तस्मिन्नेव ग्रन्थे विहितम्—'यज्ञकालार्थसिद्धये' इति। कालविशेषविधयश्च श्रूयन्ते। संवत्सरमेतद् व्रतं चरेत्संवत्सरमुख्यं भूत्वेत्येवमादयः संवत्सरविधयः। वसन्ते ब्राह्मणोऽग्निमादधीत। ग्रीष्मे राजन्य आदधीत। शरदि वैश्य आदधीतेत्याद्या ऋतुविधयः। मासि मासि सत्रपृष्ठान्युपयन्ति। मासि मास्यतिग्राह्या गृह्यन्त इत्याद्या मासविधयः। यं कामयेत वसीयांस्यादिति तं पूर्वपक्षे याजयेदित्याद्याः पक्षविधयः। 'एकाष्टकायां दीक्षेरन् फल्गुनीपूर्णमासे दीक्षेरन्' (तै० सं० ७।४।८।१) इत्याद्यास्तिथिविधयः। प्रातर्जुहोति सायं जुहोतीत्याद्याः प्रातःकालादिविधयः। कृत्तिकास्वग्निमादधीत' (तै० ब्रा० १।१।२।१) इत्याद्या नक्षत्रविधयः। अतः कालविशेषानवगमयितुं ज्योतिषमुपयुज्यते।

[ सायणीयऋग्वेदभाष्यभूमिकायाः ]

---

# ३०—वेदोपाङ्गानि

अथ चत्वार्युपाङ्गानि वेदानां सम्प्रचक्षते।
धर्मशास्त्रं पुराणं च मीमांसा न्यायविस्तरः॥ इति।

तत्र *धर्मशास्त्रं* नाम आचाराद्युपदेशका मन्वादिप्रणीताः स्मृतिग्रन्थाः। स्मृतिकाराश्च याज्ञवल्क्येनानुकीर्त्तिताः—

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्त्तकाः॥

(या० स्मृ० १।४-५) इति।

क्रतुः सुमन्तुर्बोधायनो व्याघ्रपादित्यादयोऽन्येऽपि स्मृतिकारा अभूवंस्तेषां ग्रन्था उपस्मृतिशब्देन व्यपदिश्यन्ते ।

*पुराणं* नाम सृष्टिस्थितिप्रलयानां वेदप्रसिद्धानां मनुहरिश्चन्द्रप्रभृतीनां च वर्णनाय व्यासमुनिविरचितो ग्रन्थः । तच्च पुराणमष्टादशविधम्—

ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं च गारुडम् ।
नारदीयं भागवतमाग्नेयं स्कान्दमेव च ॥
भविष्यं ब्रह्मवैवर्त्तं मार्कण्डेयं च वामनम् ।
मात्स्यं कौर्मं च वाराहं तथा ब्रह्माण्डसंज्ञितम् ॥
अष्टादश पुराणानि व्यासोक्तानि विदुर्बुधाः । इति ।

*मीमांसा* नाम वेदवाक्यार्थविचारार्थकं शास्त्रम् । तच्च पूर्वमुत्तरं चेति द्विविधम् । तत्र पूर्वमीमांसा 'अथातो धर्मजिज्ञासे'त्यादिद्वादशाध्यायीरूपा धर्म्ममीमांसा भगवता जैमिनिना कृता । उत्तरा तु ब्रह्ममीमांसा 'अथातो ब्रह्म जिज्ञासे'त्यादिचतुरध्यायीरूपा भगवता व्यासेन कृतेत्याहुः ।

*न्यायविस्तरो* नाम प्रमाणैरर्थपरीक्षणोपदेशकं शास्त्रम् । गौतमेन कणादेन च मुनिना कृतम् ।

तदेवं वेदार्थविद्भिराचार्यैर्जनानां सुहृद्भावमुररीकृत्य वेदार्थज्ञापनायाङ्गानि चोपाङ्गानि च प्रवर्त्तितानि । तदनुसारेणैवार्वाचीनैः सर्वैर्वेदार्थो यथाकथञ्चित् विज्ञायते । नत्वन्यथा ज्ञातुं शक्येत । तथा चोक्तं पूर्वाचार्यैः—'न प्रत्यक्षमनृषेरस्ति मन्त्रः' ( बृ० दे० ८।१२९ ) इति । सोऽयं साङ्गोपाङ्गो वेदः प्रवृत्तनिवृत्तलक्षणधर्म्मस्य नीतिव्यवहारादिज्ञापकविद्यानां च भूमिरित्याह याज्ञवल्क्यः—

पुराणन्यायमीमांसाधर्म्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्दश ॥

( या० स्मृ० १।३ ) इति ।

षडङ्गानि चत्वार्युपाङ्गानि चत्वारो वेदाश्चेत्येतानि चतुर्दशविद्यानां धर्म्मस्य च स्थानानि क्षेत्रभूमिरित्यर्थः।

[ आर्यविद्यासुधाकरात् ]

---

## ३१—पुराणमतसंग्रहः

अथ संक्षेपतो वच्मि पुराणादिनिरूपितं धर्म्मम्।

तत्र तावत् पुराणानि ब्राह्मादीनि प्रथमप्रकाशे[1] नामतो निर्दिष्टानि। तेषु च वर्णाश्रमादिधर्म्माश्चित्तशुद्धिद्वारोपास्यदेवताराधनयोग्यतासम्पादकत्वानुष्ठेयाः परन्तु प्राधान्यं विष्णुविरञ्चिशिवादिदेवताभक्तिलक्षणधर्म्मस्यैव यतस्तत्तद्देवतानां सम्यगाराधनेनैवाशेषपुरुषार्थसिद्धिरिति प्रतिपाद्यते। तथा च पद्मपुराणे वैशाखमाहात्म्ये अम्बरीषनारदसंवाद उक्तम्—

अथ भक्तिं प्रवक्ष्यामि विविधां पापनाशिनीम्।
त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा॥
लौकिकी वैदिकी वापि भवेदाध्यात्मिकी तथा।
ध्यानधारणया बुद्ध्या देवानां स्मरणञ्च यत्॥
विष्णुप्रीतिकरी चैषा मानसी भक्तिरुच्यते।
मन्त्रवेदनमस्कारैरधिसन्ध्यं विचिन्तनैः॥
जाप्यैश्चारण्यकैश्चैव वाचिकी भक्तिरुच्यते।
व्रतोपवासनियमैस्तथेन्द्रियनिरोधनैः॥
कायिकी सा तु निर्दिष्टा भक्तिः सर्वार्थसाधिका।
भूषणैर्हेमरत्नाङ्कैश्चित्राभिर्वाग्भिरेव वा॥

---

१ वेदोपाङ्गानीति निबन्धोऽत्र द्रष्टव्यः।

वासःप्रभृतिभिः सूत्रैः पवनैर्व्यजनास्थितैः ।
नृत्यवादित्रगीतैश्च सर्वबल्युपहारकैः ॥
भक्ष्यभोज्यान्नपानैश्च या पूजा क्रियते नरैः ।
नारायणं समुद्दिश्य भक्तिः सा लौकिकी मता ॥
ऋग्यजुःसामजाप्यानि संहिताध्ययनानि च ।
क्रियन्ते विष्णुमुद्दिश्य सा भक्तिर्वैदिकी मता ॥
इष्टिर्वृत्तिः सोमपानं याज्ञिकं कर्म्म सर्वशः ।
अग्निभूम्यनिलाकाशजलशङ्करभास्करम् ॥
यमुद्दिश्य कृतं कर्म्म तत् सर्वं विष्णुदैवतम् ।
आध्यात्मिकीयं विविधा ब्रह्मभक्तिः स्थिता नृप ॥ इति ॥

तथा अग्निपुराणेऽप्युक्तम्—

अग्निष्टोमादिककर्म्माणि सापायनि कलौ युगे ।
गङ्गास्नानं हरेर्नाम निरपायमिदं द्वयम् ॥

इति । सापायानि हिंसादोषसहितानि कलौ युग इत्यनेन युगान्तरव्यवच्छेदः । तथा चायमर्थः पर्यवस्यति । कलावनुष्ठितान्यपि अग्निष्टोमादिमहाक्रतुरूपाणि कर्म्माणि न नियमतः श्रेयोजनकानि भवन्ति, किन्तु प्रत्यवायविमिश्राण्येव । कलिकालभवानां मानवानां युगान्तरीयब्राह्मणादिवत् ज्ञानशक्त्यादेरभावेन यथाविधि कर्म्म कर्त्तुमशक्तत्वादिति । तथा चोक्तं विष्णुपुराणे—

प्रायश्चित्तान्यशेषाणि तपः कर्म्मात्मकानि वै ।
यानि चेषामशेषाणां कृष्णानुस्मरणं परम् ॥
कृते पापेऽनुतापो हि यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं हरिसंस्मरणं परम् ॥
प्रातर्निशि तथा सायं मध्याह्नादिषु संस्मरन् ।
नारायणमवाप्नोति सद्यः पापक्षयं नरः ॥

विष्णुस्मरणसंक्षीणसमस्तक्लेशसञ्चयः ।
मुक्तं प्रयाति स्वर्गाप्तिस्तस्य विघ्नो निगद्यते ॥
वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥ इति ॥

तथा ब्रह्मपुराणेऽपि—

द्विजो वा राक्षसो वापि पापी वा धार्म्मिकोऽपि वा ।
राम रामेति यो वक्ति स मुक्तो भवबन्धनात् ॥
राम रामेति रामेति ये वदन्ति दिवानिशम् ।
तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ॥ इति ॥

तथा भगवद्गीतासु गीयते—

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥
सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ इति ।

तदेवं सर्वत्र पुराणेषु प्रस्तुतदेवताभक्तिमाहात्म्यमुपवर्ण्यते । तदेव च दृढयितुं वर्णनीयदेवतायाः परब्रह्माभिन्नत्वमवलम्ब्य तत एव जगत्सृष्टिस्थितिप्रलयानां वर्णनं, मन्वन्तराणां, महर्षीणां, सूर्य सोमवंशीय राजर्षीणां धर्म्ममर्यादापालकानां, तेषामनुग्रहार्थं तत्तद्देवतावतारचरित्राणाञ्च ख्यापकानि नानाविधाख्यानानि तत्र तत्र वर्णितानि सन्ति । इति दिङ्मात्रमिह प्रदर्शितम् ।

[ आर्यविद्यासुधाकरात् ]

# ३२—तान्त्रिकसाहित्यम्

अथ तान्त्रिकमतमुच्यते। नानाविधदेवतोपासनामार्गप्रतिपादको ग्रन्थ विशेषस्तन्त्रम्। तत आगतं तान्त्रिकम्। प्रकारेण मन्त्रजपध्यान-पूजाबलिदानादिभिरुपासिता सती चतुर्विधानपि पुमर्थानुपासकेभ्यः प्रयच्छतीति तान्त्रिकमतडिण्डिमः।

तन्त्राणि त्रिविधानि समयाचारकुलमिश्रकभेदात्। तमवैदिक-मार्गमनुरुध्य श्रीविद्याप्रतिपादकानि तन्त्राणि *समयाचारतन्त्राणि*। तानि च वसिष्ठसंहिता, सनकसंहिता, सनन्दनसंहिता, सनत्कुमार-संहिता, शुकसंहिता चेति पञ्चविधानि। *कुलतन्त्राणि* तु महामाया-शम्बरतन्त्रादीनि चतुःषष्टिसंख्याकानि सन्ति। एषु कुलतन्त्रेषु मद्य-मांसाद्युपहारैरतिबीभत्सदुराचारैरपि देवतार्चनमन्त्रमयानुष्ठानप्रकारा उपनिबद्धाः। कुलमार्गवेदमार्गोभयानुसारेण प्रवृत्तानि तन्त्राणि *मिश्र-काणीत्युच्यन्ते*। तानि च भुवनेश्वरीतन्त्रं दक्षिणामूर्त्तिसंहिता ज्योत्स्ना-पक्षतन्त्रं कलाविधितन्त्रमित्यादीन्यनेकविधानि सन्ति।

तान्येतानि कौलतन्त्राणि मिश्रकतन्त्राणि च भगवता शिवेन ये ये शूद्रादयो वैदिकधर्म्मेष्वनधिकारिणस्तेषामैहिकामुष्मिकक्षुद्रवासना-नुसारितत्तदिष्टफलसाधनसिद्ध्युपायप्रदर्शनार्थं प्रणीतानि। तस्मान्नात्र त्रैवर्णिकानामधिकारोऽस्ति। श्रुतिस्मृतिनिषिद्धाचाररूपत्वात्। अत एव ज्ञानार्णवतन्त्रे स्पष्टमेवाभिहितं भगवता शिवेन—"कौलमिश्रक-मार्गे हि हेयौ गौरि द्विजातिभिः" इति। एवं सत्यपि ये द्विजातयः क्षुद्रफललिप्सया वैदिकविधिनिषेधानतिक्रम्यायोग्यानुष्ठानेषु मोहात्प्रव-र्त्तन्ते ते महान्तं प्रत्यवायभारं शिरसा वहन्तः सन्तः स्वयमेव प्रतारिता भवन्ति। तस्मात् प्राणिविप्रलम्भेच्छादिलक्षणपुरुषदोषायत्तं प्रतारकत्वं न महेश्वरस्यास्तीति ध्येयम्। स्पष्टञ्चेदं "चतुःषष्ट्या तन्त्रैः सकलम-भिसन्धाय भुवनम्" इति सौन्दर्यलहरीस्तोत्रपद्यस्य गौरीकान्तभट्टा-चार्यकृतायां तरिनामकटीकायाम्।

कौलमार्गप्रतिपादकानि चतुःषष्टिस्तन्त्राणि वामकेश्वरतन्त्रे निर्दिष्टानि। यथा—

चतुःषष्टिश्च तन्त्राणि मातॄणामुत्तमानि हि।
महामायाशम्बरञ्च योगिनीजालशम्बरम्॥
तत्त्वशम्बरकञ्चैव भैरवाष्टकमेव च।
बहुरूपाष्टकञ्चैव यामलाष्टकमेव च॥
चन्द्रज्ञानं मालिनी च महासम्मोहनं तथा।
वामजुष्टं महादेवं वातुलं वातुलोत्तरम्॥
हृद्भेदं तन्त्रभेदञ्च गुह्यतन्त्रञ्च कामिकम्।
कलावादं कलासारं तथान्यत् कुण्डिकामतम्॥
मत्तोत्तरञ्च वीणाख्यं त्रोतलं त्रोतलोत्तरम्।
पञ्चामृतं रूपभेदं भूतोड्डामरमेव च॥
कुलसारं कुलोड्डीशं कुलचूडामणिस्तथा।
सर्वज्ञानोत्तमञ्चैव महाकालीमतं तथा॥
अरुणेशं मोदनीशं त्रिकुडीश्वरमेव च।
पूर्वपश्चिमदक्षं च उत्तरञ्च निरुत्तरम्॥
विमलं विमलोर्जञ्च देवीमतमतः परम्। इति।

एतैस्तन्त्रैः प्रतिपाद्यं वस्तु संक्षिप्यात्र निरूप्यते। तत्रान्यस्मिन् पदार्थेऽन्यथाप्रतिभानरूपमायाप्रपञ्चरचनोपायप्रतिपादकमैन्द्रजालिक-विद्यात्मकम् प्रथमं *महामायाशम्बराख्यं* तन्त्रम्। योगिनीसमूहदर्शनोपायप्रतिपादकं *योगिनीजालशम्बराख्यं* द्वितीयं तन्त्रम्। पृथिव्यादितत्त्वानामन्यत्रान्यबोधोपायप्रतिपादकं *तत्त्वशम्बरतन्त्रम्*। इदमपीन्द्रजालविद्याविशेषरूपमेव। *भैरवाष्टकं* यथा—सिद्धभैरवतन्त्रं मायिकभैरवतन्त्रं कङ्कालभैरवतन्त्रं कालाग्निभैरवतन्त्रं शक्तिभैरवतन्त्रं योगिनीभैरवतन्त्रं महाभैरवतन्त्रं भैरवनाथतन्त्रञ्चेति। एतान्यष्टौ तन्त्राणि कापालिकमतप्रतिपादकानि।

बहुरूपा नाम शक्तिस्तत्प्रतिपादकानामष्टानां तन्त्राणां गणो *बहुरूपाष्टकम्*। तद्यथा—ब्राह्मीतन्त्रं माहेश्वरीतन्त्रं कौमारीशिवदूतीतन्त्रतिमि। *यामलाष्टकम्*—रुद्रयामलादीन्यष्टौ तन्त्राणि कुलक्रमागतायाः शक्त्युपासनायाः एव प्रतिपादकानि। कामेश्वर्यादीनां षोडशनित्यानां चन्द्रकलान्तर्वर्त्तिनीनामुपासनाप्रतिपादकं कापालिकमतप्रदर्शकञ्च *चन्द्रज्ञानतन्त्रम्*। समुद्रयानोपायप्रतिपादकं *मालिनीतन्त्रम्*। जाग्रतामपि जनानां निद्रितकरणोपायप्रतिपादकं *महासम्मोहनतन्त्रम्*। *वामजुष्टं* वामकेश्वरतन्त्रं तद्धि चतुःशतीत्यपि कथ्यते। अत्र सुरामांसाद्युपहारेणोपासनामार्गः प्रतिपाद्यते। कुलाचारप्रदर्शनपूर्वकवटुकादिसिद्ध्युपायप्रतिपादकं *महादेवतन्त्रम् वातुलं वातुलोत्तरं कामिकञ्चेति* तन्त्रत्रयं क्षेत्रकर्षणादिविधिप्रतिपादकम्।

*हृद्भेदतन्त्र* कापालिकाचारप्रतिपादकम्। *तन्त्रभेदगुह्यतन्त्रयोः* प्रकाशं रहस्यं वा परकृतमन्त्रप्रयोगाणां परावृत्त्युपायाः प्रतिपाद्यन्ते। *कलावादतन्त्रं* कामशास्त्रम्। *कलासारतन्त्रं* रूपादिवृद्ध्युपायप्रदर्शकम्। *कुण्डकामततन्त्रं* गुटिकासिद्धिप्रदर्शकम्। गुटिकेति पानपात्रस्य संज्ञा। *मत्तोत्तरतन्त्रं* रससिद्धिप्रतिपादकम्। *वीणातन्त्रं* हि वीणा नाम सम्भोगयक्षिणी तस्याः साधनोपायप्रदर्शकम्।

*त्रोतलतन्त्रे* गुटिकाञ्जनपादुकादिसिद्धयः प्रतिपादिताः। *त्रोतलोत्तरतन्त्रे* चतुःषष्टिसहस्रयोगिनीनां दर्शनोपाया उक्ताः। *पञ्चामृततन्त्रे* पृथिव्यादिभूतपञ्चकसाधनेनामरत्वसिद्धिः कापालिकसम्मता प्रतिपाद्यते *रूपभेदादिषु पञ्चसु तन्त्रेषु* जारणमारणमोहनोच्चाटनवशीकरणादिप्रयोगाः प्रतिपाद्यन्ते *सर्वज्ञानादितन्त्रपञ्चकं* कापालिकसिद्धान्तैकदेशिदिगम्बरमताचारप्रदर्शकम्। *पूर्वतन्त्रादिदेवीमतपर्यन्तं तन्त्राष्टकं* दिगम्बरैकदेशिक्षपणकमताचारप्रदर्शकम्। इमानि तन्त्राणि शिवप्रोक्तानीत्याहुः। इति तान्त्रिकमतसंग्रहः।

[ आर्यविद्यासुधाकरात् ]

# ३३—संस्कृतकवीनां विषये प्राचोना उक्तयः

## वाल्मीकिः

कवीन्दुं नौमि वाल्मीकिं यस्य रामायणीं कथाम् ।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः ॥

यस्मादियं प्रथमतः परमामृतौघ-
निर्वोषि( ष )णा सरससूक्तितरङ्गभङ्गिः ।
गङ्गेव धूर्जटिजटाञ्चलतः प्रवृत्ता
वृत्तेन वाक्तमहमादिकविं प्रपद्ये ॥

भास्वद्वंशवतंसकीर्तिरमणीरङ्गप्रसङ्गस्तनद्-
वादित्रप्रथमध्वनिर्विजयते वल्मीकजन्मा कविः ।
पीत्वा यद्वदनेन्दुमण्डलगलत्काव्यामृतान्धेः किम-
प्याकल्पं कविनूतनाम्बुदमयी कादम्बिनी वर्षति ॥

## व्यासः

नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥
व्यासवाक्यजलौघेन कुतर्कतरुहारिणा ।
वेदशैलावतीर्णेन नीरजस्का मही कृता ॥
व्यासगिरां निर्यासं सारं विश्वस्य भारतं वन्दे ।
भूषणतयैव संज्ञा यदङ्कितां भारती वहति ॥

## पाणिनिः

स्वस्ति पाणिनये तस्मै यस्य रुद्रप्रसादतः ।
आदौ व्याकरणं काव्यमनु जाम्बवतीजयः ॥

## भासः

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥

## गुणाढ्यः

शश्वद्बाणद्वितीयेन नमदाकारधारिणा ।
धनुषेव गुणाढ्येन निःशेषो रञ्जितो जनः ॥
समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना ।
हरलीलेव लोकस्य विस्मयाय बृहत्कथा ॥
मन्ये बृहत्कथाम्भोधेर्बिन्दुमादाय निर्मिता ।
तेनेतरकथाकन्या न विभाति यदग्रतः ॥

## कालिदासः

कवयः कालिदासाद्याः कवयो वयमप्यमी ।
पर्वते परमाणौ च पदार्थत्वं प्रतिष्ठितम् ॥
निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥
कविरमरः कविरचलः कविरभिनन्दश्च कालिदासश्च ।
अन्ये कवयः कपयश्चापलमात्रं परं दधति ॥
पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥

## सुबन्धुः

कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥

## दण्डी

जाते जगति वाल्मीकौ शब्दः कविरिति स्थितः ।
व्यासे जाते कवी चेति कवयश्चेति दण्डिनि ॥
त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥

## बाणः

हृदि लग्नेन बाणेन यन्मन्दोऽपि पदक्रमः ।
भवेत्कविकुरङ्गाणां चापलं तत्र कारणम् ॥
शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरुच्यते ।
शीलाभट्टारिकावाचि बाणोक्तिषु च सा यदि ॥
जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि ।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति ॥
श्लेषे केचन शब्दगुम्फविषये केचिद्रसे चापरेऽ-
लङ्कारे कतिचित्सदर्थविषये चान्ये कथावर्णने ।
आ सर्वत्र गभीरधीरकविताविन्ध्याटवीचातुरी-
सञ्चारी कविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः ॥

## भवभूतिः

सुकविद्वितयं मन्ये निखिलेऽपि महीतले ।
भवभूतिः शुकश्चायं वाल्मीकिस्तु तृतीयकः ॥
भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥
रत्नावलीपूर्वकमन्यदास्तामसीमभोगस्य वचोमयस्य ।
पयोधरस्येव हिमाद्रिजायाः परं विभूषा भवभूतिरेव ॥

## राजशेखरः

बभूव वल्मीकभवः कविः पुरा
ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेखया
स वर्तते सम्प्रति राजशेखरः ॥

पातुं श्रोत्ररसायनं रचयितुं वाचः सतां सम्मता
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः ।
भोक्तुं स्वादु फलञ्च जीविततरोर्यद्यस्ति ते कौतुकं
तद् भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः ॥

## मुरारिः

भवभूतिमनादृत्य निर्वाणमतिना मया ।
मुरारिपदचिन्तायामिदमाधीयते मनः ॥

मुरारिपदभक्तिश्चेत्तदा माघे रतिं कुरु ।
मुरारिपदभक्तिश्चेत्तदा माऽघे रतिं कुरु ॥

देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ।

## विजया

सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ ।
या वैदर्भगिरां वासः कालिदासादनन्तरम् ॥

## विज्जिका

नीलोत्पलदलश्यामां विज्जिकां मामजानता ।
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती ॥

## पण्डितराजो जगन्नाथः

मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित्केषांचित्खलु हि विदधीरन्नपि मुदम् ।
कथं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः ॥

## विभिन्नकवयः ।

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥

माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे ।
स्मरन्ते भारवेरेव कवयःकपयो यथा ॥

रामायणभारतबृहत्कथानां कवीन्नमस्कुर्मः ।
त्रिस्रोता इव सरसा सरस्वती स्फुरति यैर्भिन्ना ॥

प्राचेतसव्यासपराशराद्याः प्राञ्चः कवीन्द्रा जगदञ्चितास्ते ।
गोष्ठी नवीनापि महाकवीनां पूज्या गुणज्ञैर्भुवनोपकर्त्री ॥

धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः।
हर्षोहर्षो हृदयवसतिः पञ्चबाणस्तुबाणः
केषां नैषा कथय कविताकामिनी कौतुकाय॥

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयीकविक्ष्मापतिः॥

माघश्चोरो मयूरो मुररिपुरपरो भारविः सारविद्यः
श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः।
श्रीदण्डी डिण्डिमाख्याः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः
ख्याताश्चान्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति॥

45942
22.1.74

I. I. A. S. LIBRARY

Acc. No. 45942

Call No.

Author : Chaturvedi Giridhara Sarma

Title : Nibandhadarsa : a collection of ideal Sanskrit essays


| Borrower's name (Block letters) | Signature & date |
| --- | --- |
| Dr. A.P. Francis | [illegible] |
| Dr A.P. Francis | [illegible] |